ववृधे च पुनर्लोकान् क्रान्तुकाम इवौजसा ।
तर्जनायासुरेन्द्राणां वर्द्धमानं नभस्तले ।।३७
ऋषयश्चैव गन्धर्वास्तुष्टुवुर्मधुसूदनम् ।
सर्वान् किरीटेन लिहन् साभ्रमम्बरमम्बरैः ।।३८
पद्भ्याक्रम्य वसुधां दिशः प्रच्छाद्य बाहुभिः ।
स सूर्यकरतुल्याभं सहस्रारमरिक्षयम् ।।३६
दीप्ताग्निसदृशं घोरं दर्शनेन सुदर्शनम् ।
सुवर्णरेणुपर्यन्तं वज्रनाभं भयापहम ।।४०
मेदोऽस्थिमज्जारुधिरैः सिक्तन्दानवसम्भवैः ।
अद्वितीयप्रहरणं क्षुरपर्यन्तमण्डलम् ।।४१
स्रग्दाममालाविततं कामगं कामरूपिणम् ।
स्वयंस्वयम्भुवा सृष्टं भयदं सर्वविद्विषाम् ।।४२

इनकी भुजाऐं दशों दिशाओं में व्यापक होती हुई बढ़ गयीं थीं और भगवान् केशव ने उनको सब प्रदिशाओं में—भूमि तथा आकाश मे पूरित कर दिया था ।। ३६ ।। फिर महान् ओज से समस्त लोकों का क्रमण करने की इच्छा वाले प्रभु और भी वर्धित हो गये थे तथा नभस्तल में भी उन असुरेन्द्रों के तर्जन के लिये वे बद्धमान हो गये थे । अम्बरों के द्वारा अभ्र सहित अम्बर की भाँति किरीट के द्वारा सबका स्पर्श करते हुए वे उस समय में हो गये थे तथा वहाँ पर मधुसूदन प्रभु का संस्तवन ऋषिगण और गन्धर्व लोग करने लगे थे ।। ३७, ३८ ।। प्रभु ने अपने चरणों से सम्पूर्ण वसुधा को समाक्रान्त करके बाहुओं से सभी दिशाओं को प्रच्छादित कर दिया था तथा उनने फिर सूर्य्य की किरणों के तुल्य आभा वाले—सहस्र अरों से समन्वित और अरियों के क्षय को करने वाले उस चक्र को प्रयुक्त किया था ।। ३६ ।। वह चक्र दीप्त अग्नि के

समान महान् घोर था तथा देखने से वह सुन्दर दर्शन वाला अर्थात् सुदर्शन नामधारी था। सुवर्ण रेणुपर्यन्त—वज्रनाभ—भयों का अपहरण करने वाला—दानवों के शरीरों से समुत्पन्न मेदा, अस्थि, मज्जा तथा रुधिर से सिक्त—क्षुर पर्यन्त मण्डल वाला—एक परम अद्वितीय प्रहरण (अस्त्र)—स्रगदाम (मालाऐं) से विनत—स्वेच्छया गमन करने वाला—कामरूपी—समस्त शत्रुओं को भय देने वाला और स्वयं ही स्वयम्भू प्रभु के द्वारा वह सृजित किये जाने वाला था ॥४०-४२॥

महर्षिरोषैराविष्टं नित्यमाहवदर्पितम् ।
क्षेपणाद्यस्य मुह्यन्ति लोकाः सस्थाणुजङ्गमाः ॥४३
क्रव्यादानि च भूतानि तृप्ति यान्ति महामृधे ।
तदप्रतिमकर्मोग्रं समानं सूर्यवर्चसा ॥४४
चक्रमुद्यम्य समरे क्रोधदीप्तो गदाधरः ।
समुष्णन् दानवं तेजः समरे स्वेन तेजसा ॥४५
चिच्छेद वाहूश्चक्रेण श्रीधरः कालनेभिनः ।
तच्च वक्त्रशतं घोरं साग्निपूर्णाट्टहासि वै ॥४६
तस्य दत्यस्य चक्रेण प्रममाथ बलाद्धरिः ।
स च्छिन्नबाहुर्विशिरा न प्राकम्पतदानवः ॥४७
कबन्धोऽवस्थितः संख्ये विशाखइव पादपः ।
सम्वितत्यमहापक्षौवायोःकृत्वासमञ्जवम् ॥४८
उरसा पातयामास गरुडःकालनेमिनम् ।
स तस्य देहो विमुखो विबाहुश्च परिभ्रमन् ॥४९

वह ऊपर में बतलाये गुणगणों वाला सुदर्शन चक्र महर्षियों के रोषों से समाविष्ट था और नित्य ही युद्ध में दर्प से समायुक्त रहने वाला था। जिसके क्षेपण करने से सभी स्थावर एवं जङ्गम लोक मूर्च्छित हो जाया करते हैं। महान् युद्ध में क्रव्याद आदि जो भूत हैं वे उस चक्र के द्वारा प्रवाहित हुए शत्रुओं के रक्त के पान से परम तृप्ति को प्राप्त

हुआ करते हैं ऐसे उस अनुपम कर्म के करने से उग्र और सूर्य के वर्चस के तुल्य उस अपने सुदर्शन चक्र को उठाकर समर में क्रोध से दीप्त गदाधर ने छोड़कर अपने तेज के द्वारा युद्धस्थल में दानवों के तेज का छेदन कर दिया था और श्रीधर प्रभु ने उस अपने चक्र से कालनेमि की बाहुओं को भी काट डाला था। उस दानव के अग्नि से परिपूर्ण अट्टहास वाले सौ परम घोर मुखों का श्री हरि ने उसी चक्र के द्वारा बलपूर्वक प्रमथन कर दिया था। किन्तु वह दानव बाहुओं शिर के कट जाने पर भी वहाँ पर प्रकम्पित नहीं हुआ था। उसका वह कबन्ध (धड़) युद्ध स्थल में बिना शाखा वाले पादप के समान अवस्थित था। गरुड़ ने अपने पंखों को फैलाकर तथा वायु के समान वेग को करके अपने उरस्थल के द्वारा उस कालनेमि के धड़ को नीचे गिरा दिया था और उसका वह बिना मुख तथा बाहुओं वाला देह इधर-उधर परिभ्रमण कर रहा था ।। ४३–४९।

निपपात दिवन्त्यक्तवा क्षोभयन् धरणीतलम् ।
तस्मिन्निपतितेदैत्येदेवाः सर्षिगणास्तदा ।।५०
साधु साध्विति वैकुण्ठ समेताः प्रत्यपूजयन् ।
अपसर्पन्तु दैत्याश्च युद्धे दृष्टपराक्रमाः ।।५१
ते सर्वे बाहुभिर्व्याप्ता न शेकुश्चलितुं रणे ।
कांश्चित् केशेषु जग्राह कांश्चित् कण्ठेष्ववपीडयन् ।।५२
चकर्ष कस्यचिद्वक्त्रं मध्येगृह्णादथापरम् ।
ते गदाचक्रनिदग्धा गतसत्वा गतासवः ।।५३
गगनाद्भ्रष्टसर्वाङ्गा निपेतुर्धरणीतले ।
तेषु दत्येषु सर्वेषु हतेषु पुरुषोत्तमः ।।५४
तस्थौशकप्रिय कृत्वा कृतकर्मा गदाधरः ।
तस्मिन् विमर्दे निवृत्ते संग्रामे तारकामये ।।५५
तं देशमाजगामाशु ब्रह्मा लोकपितामहः ।

सर्वैर्ब्रह्मर्षिभिः सार्द्धं गन्धर्वाप्सरसाङ्गणैः ।।५६

वह धरणी तल को क्षोभित करता हुआ दिवलोक को त्याग कर के भूमि पर गिर गया था। उस समय में उस महा दानवेश्वर के निपतित हो जाने पर समस्त देवगण और ऋषि वृन्द "साधु–साधु" अर्थात् वहुत ही अच्छा हुआ यह कहते हुए सब एकत्रित होकर भगवान् वैकुण्ठनाथ की पूजा करने लने थे। युद्ध में दैत्यगण पराक्रम देख लेने वाले अपसर्पण कर जावें। किन्तु बाहुओं से व्याप्त वे सब रणस्थल में चल नहीं सकते थे। उनमें से कुछ को तो केश पकड़ कर ग्रहण किया था और कुछ को कण्डों में ताड़ित किया था ।। ५०, ५१, ५२ ।। किसी के मुख को पकड़ कर कर्षित किया था और दूसरे को मध्य भाग में ग्रहण किया था। वे सब गदा और चक्र के प्रहारों से निर्दग्ध—गत प्राण और हीन तत्वों वाले हो गये थे ।। ५३ ।। गगन से उद्भ्रष्ट समस्त अङ्गों वाले धरणी तल में सब निपतित हो गये थे। उन सब दैत्यों के निहत हों जाने पर पुरुषोत्तम प्रभ गदाधारी महेन्द्र का कर्म्म सम्पादन करके तथा इन्द्र का प्रियकर्म करके उस बिमर्द तारकामय सग्राम के निर्वृत होने पर वहाँ पर हीं समवस्थित हो गये थे। उसी स्थल पर लोकों के पिता यह ब्रह्मा जी समस्त ब्रह्मर्षिगण और गन्धर्व एवं अप्सरागणों के साथ शीघ्र ही आकर उपस्थित होगये थे ।५४–५६।।

देवदेवो हरिं देवं पूजयन् वाक्यमब्रवीत् ।
कृतं देव महत्कर्म सुराणां शल्यमुद्धृतम् । ५७
वधेनानेन दैत्यानां वयं च परितोषिताः ।
योऽयं त्वया हतो विष्णो ! कालनेमी महासुरः ।।५८
त्वमेकोऽस्य मृधेहन्ता नान्यः कश्चन विद्यते ।
एषदेवान्परिभवन्लोकांश्चससुरासुरान् ।।५९
ऋषीणां कदन कृत्वा मामपि प्रतिगजति ।
तदनेन तवाग्र्येण परितुष्टोऽस्मि कर्मणा ।।६०

यदयं कालकल्पस्तु कालनेमी निपातितः ।
तद्रा गच्छस्व भद्रन्ते गच्छाम दिवमुत्तमम् ॥६१
ब्रह्मर्षयस्त्वां तत्रस्थाः प्रतीक्षन्ते सदोगताः ।
कञ्चाहं तव दास्यामि वर वरवताम्बर ! ॥६२
सुरेष्वथ च दैत्येषु वराणां वरदो भवान् ।
निर्यातयैतत्त्रैलोक्यं स्फीत निहतकण्टकम् ॥६३

देवों के देव ने श्री हरिदेव का अभ्यर्चन करते हुए यह वाक्य कहा था कि हे देव ! आपने बहुत बड़ा कर्म सम्पादित किया है और सुरगणों के शल्य को आपने उद्धृत कर डाला है। दैत्यों के इस बध से आपने हम सबको परितोषित कर दिया है जो कि हे विष्णो ! आपने इस महासुर कालनेमि को निहत कर डाला है ॥ ५७, ५८ ॥ इस युद्ध में आप ही एक इसके हनन करने वाले थे अन्य कोई भी आपके अतिरिक्त नहीं है। इससे सब देवों को परिभूत कर दिया है और सुरों एवं असुरों के सहित लोकों का भी परिभव किया है। यह ऐसा दुष्ट था कि यह ऋषियों का कदन करके मुझको भी अपनी गर्जना दिखाता था। आपके अत्युत्तम इस कर्म्म से मैं बहुत ही परितुष्ट हुआ हूं ॥ ५९, ६० ॥ जो यह काल के सदृश कालनेमि आपके द्वारा निपतित हुआ है यह बहुत ही अच्छा हो गया। अब आप पधारिये आप का परम मङ्गल होवे—अब हम भी उत्तम दिवलोक को चलते हैं। वहाँ पर सदोगत समुपस्थित ब्रह्मर्षि गण आपकी प्रतीक्षा कर रहे हैं। हे वरदान देने वालों में परमश्रेष्ठ ! मैं आपको कौन–सा वरदान दूँगा। आप सुरों में और दैत्यों में वरदानों को प्रदान करने वाले वरद हैं। इस परम विस्तृत त्रैलोक्य को निहत कण्टक वाला निर्यात कर डालिये ॥ ६१ । ६२ । ६३ ॥

अस्मिन्नेव मृधे विष्णो ! शक्राय सुमहात्मने ।
एवमुक्तो भगवता ब्रह्मणा हरिरव्ययः ॥६४

देवांश्छक्रमुखान् सर्वानुवाच शुभया गिरा ।
शृण्वन्तु त्रिदशाः सर्वे यावन्तोऽत्र समागताः ॥६५
श्रवणावहितैः श्रोत्रैः पुरस्कृत्य पुरन्दरम् ।
अस्माभिः समरे सर्वे कालनेमिमुखा हताः ॥६६

दानवा विक्रमोपेताः शक्रादपि महत्तराः ।
अस्मिन्महति संग्रामे दैतेयौ द्वौ विनिःसृतौ ॥६७

विरोचनश्च दैत्येन्द्रः स्वर्भानुश्च महाग्रहः ।
स्वां दिशं भजतां शक्रो दिशं वरुण एव च ॥६८

याम्यांयमः पालयितामुराञ्च धनधिपः ।
ऋक्षैः सह यथायोगं गच्छतां चैवचन्द्रमाः ॥६९

अब्दं ऋतुमुखे सूर्यो भजतामयनैः सह ।
आज्यभागाः प्रवर्तन्तां सदस्यैरभिपूजिताः ॥७०

हे विष्णो ! इसी युद्ध में आपने महान् आत्मा वाले इन्द्र के लिये यह सब कर दिया है । इस प्रकार से भगवान् ब्रह्माजी के द्वारा अविनाशी श्री हरि से कहा गया था । तब श्री हरि नें इन्द्र जिनमें प्रधान थे उन समस्त देवा से परम शुभ वाणी से कहा था—विष्णु भगवान् ने कहा था—अब सब देवगण श्रवण करलो जितने यहाँ पर इस समय में समागत हुए हैं ॥ ६४, ६५ ॥ श्रवण मे परम समाहित श्रोत्रों से पुरन्दर आगे को करके हमने समर में कालनेमि प्रमुख सब दानव निहत कर दिये थे । ये समस्त दानव विक्रम से उपेत थे तथा इन्द्र से भी महत्तर थे । इस महान् संग्राम में दो दैतेय विनिःसृत हुए थे ॥ ६६, ६७॥ एक तो दैत्येन्द्र विरोचन था दूसरा महान् ग्रह स्वर्भानु था । अब इन्द्र अपनी दिशा का सेवन करें और वरुण अपनी दिशा में चले जावें ॥ ६८ । ६९ ॥ याम्य दिश में यम चले जावें । धनाधिप उत्तर दिशा में पहुँच जावें । ऋक्षों के सहित यथा योग चन्द्रमा भी चले जावें । ऋतुमुख में अयनों के सहित

सूर्य्य अब्द का सेवन करे। सदस्यों के द्वारा अभिभूजित आज्यभाग प्रवृत्त हो जावें ॥ ६९, ७० ॥

हूयन्तामग्नयो विप्रैर्वेददृष्टेन कर्मणा।
देवाश्चाप्यग्निहोमेन स्वाध्यायेन महर्षयः ॥७१
श्राद्धेन पितरश्चैव तृप्तिं यान्तु यथासुखम्।
वायुश्चरतु मार्गस्थ स्त्रिधा दीप्यतु पावकः ॥७२
त्रींस्तु वर्णांश्च लोकांस्त्रींस्तर्पयंश्चात्मजैर्गुणैः।
क्रतवः सम्प्रवर्तन्तां दीक्षणीयैर्द्विजातिभिः।
दक्षिणाश्चोपपाद्यन्तां याज्ञिकेभ्यः पृथक् पृथक।
गान्तु सूर्यो रसान् सोमो वायुः प्राणांश्च प्राणिषु ॥७४
तर्पयन्तः प्रवर्तन्तां सर्वएव स्वकर्मभिः।
यथावदानुपूर्व्येण महेन्द्रमलयोद्भवाः ॥७५
त्रैलोक्यमातर:सर्वा: समुद्रयान्तु सिन्धवः।
दैत्येभ्यस्त्यज्यतां भीश्च शान्तिव्रजतदेषताः ॥७६
स्वस्ति वोऽस्तु गमिष्यामि ब्रह्मलोकं सनातनम्।
स्वगृहे स्वर्गलौके वा संग्रामे वा विशेषतः ॥७७

वेदों के द्वारा दृष्ट कर्म्म से विप्रों के द्वारा अग्नियों में हवन किया जावे। अग्नि के होम से देवगण—स्वाध्याय से महर्षि गण और श्राद्ध से पितृगण सुखपूर्वक तृप्ति को प्राप्त करें। वायु अपने मार्ग में स्थित होकर सञ्चरण करें और पावक तीन प्रकार दीप्त होवे। दीक्षणीय द्विजातियों के द्वारा क्रतुगण तीन वर्णों को और तीन लोकों को अपने गुणों से तृप्ति करते हुए सम्प्रवृत्त होवें ॥ ७१, ७२, ७३ ॥ याज्ञिकों के लिये पृथक २ दक्षिणाऐं उपफल होवें। सूर्य गौ को—सोम रसों को और वायु प्राणियों में प्राणों को प्रदान करें। सभी अपने २ कर्म्मों के द्वारा तृप्त करते हुए प्रवत्त होवें। यथावत् आनुपूर्वी से महेन्द्र और मलय में उद्भव पाने वाले स्वकर्मों से तृप्ति देते हुए प्रवर्त्तित हो जावें। त्रैलोक्य

की माताऐं समस्त सिन्धु समुद्र में गमन करें। सब देवता लोग अब दैत्यों के द्वारा होने वाले भय का त्याग कर देवें। और सबका कल्याण होवे। अब मैं सनातन ब्रह्मलोक को गमन करूँगा। अथवा घर में—स्वर्ग लोक में तथा विशेष रूप से संग्राम में गमन करूँगा ॥ ७४। ७५ ७६। ७७ ॥

विश्रम्भो वो न मन्तव्यो नित्यं क्षुद्रा हि दानवाः।
छिद्रेषु प्रहरन्त्येते न तेषां संस्थिति ध्रुवा ॥७८
सौम्यानामृजुभानां भवतामार्जवन्धनम्।
एवमुक्त्वा सुरगणान् विष्णुःसत्यपराक्रम ॥७६
जगाम ब्रह्मणा सार्द्धं स्वलोकन्तु महायशाः।
एतदाश्चर्यमभवत् संग्रामे तारकामये ॥
दानवानाञ्च विष्णोश्च यन्मान्त्व परिपृष्टवान् ॥८०

आपको विश्रम्भ नहीं मानना चाहिए। ये दानव नित्य ही क्षुद्र हैं। छिद्रों में ही प्रहार किया करते हैं और उनकी संस्थिति निश्चित नहीं है ॥ ७८ ॥ आप लोग परम सौम्य तथा सरल भावों वाले हैं। आपका आर्जन (सरलता) ही धन है। इस प्रकार से सत्य पराक्रम वाले भगवान विष्णु ने सुरगणों से कह कर फिर महान् यश वाले वे ब्रह्मा जी के साथ ही स्वर्गलोक को चले गये थे। उस तारकामय संग्राम में यह एक आश्चर्य हो गया था जिसको दानवों का और भगवान् विष्णु का ही कहना चाहिए और यही आपने मुझसे पूछा था ॥७६। ८० ॥

७२—भव माहात्म्य वर्णन

अतः पद्मोद्भवस्तात विस्तेण त्वयेरितः ।
समासाद्भवमाहात्म्यं भैरवस्य विधीयताम् ।।१
तस्यापि देवदेवस्य शृणुध्वं कर्म चोत्तमम् ।
आसीद्दैत्योऽन्धको नाम भिन्नाञ्जनचयोपमः ।।२
तपसा महतायुक्तोह्यबध्य स्त्रिदिवौकसाम् ।
स कदाचिन् महादेवंपार्वत्या सहितंप्रभुम् ।।३
क्रीडमानं तदा दृष्ट्वा हर्तुं देवीं प्रचक्रमे ।
तस्य युद्धं तदा घोरमभवत् सह शम्भुना । ४
आवन्त्ये विषये घोरे महाकालवनं प्रति ।
तस्मिन्युद्धे तदा रुद्रश्चान्धकेनातिपीडितः ।।५
सुषुवे वाणमत्युग्रनाम्ना पाशुपतं हि तत् ।
रुद्राबाणविनिर्भेदाद्रुधिरादन्धकस्य तु ।।६
अन्धकाश्च समुत्पन्नाः शतशोऽथ सहस्रशः ।
तेषां विदार्यभाणानां रुधिरादपरे पुनः ।।७

ऋषिगण ने कहा—हे भगवन् ! आपके द्वारा वर्णित विस्तारपूर्वक पद्मोद्भव का श्रवण कर लिया है । अब आप संक्षेप से भैरव का भव माहात्म्य वर्णित कीजिए ।। १ ।। महा महर्षि सूतजी ने कहा—देवों के देव उसका भी उत्तम कर्म का आप श्रवण करो । एक अन्धक नाम वाला भिन्नाञ्जन चय वाला दैत्य था ।। २ ।। वह दैत्येन्द्र महान् तप से युक्त था और देवों का बध न करने के योग्य था । उसने किसी समय में पार्वती के सहित प्रभु महादेव को क्रीड़ा करते हुए देख लिया था और उसी समय में उस दैत्य ने देवी पार्वती के हरण करने का उपक्रम किया था । उसी समय में उस दैत्य का शम्भु के साथ परम घोर युद्ध हुआ था ।। ३, ४ ।। आनन्त्य घोर विषय में महाकाल बन के प्रति

उस समय में उस महायुद्ध में अन्धक के द्वारा रुद्रदेव को अत्यन्त उत्पीड़ित किया था ।५।। पाशुपत नाम वाले अत्यन्त उग्र वाण को प्रसूत किया था । रुद्रदेव के बाण के द्वारा विशेष निर्भेद को प्राप्त होने वाले अन्धक के रुधिर से सैकड़ों और सहस्रों अन्धक समुत्पन्न हो गये थे। जब उनका विदारण किया गया तो फिर विदीर्यमाण उनके रुधिर से दूसरे और फिर अन्धक पैदा होगये थे ।। ६, ७ ॥

वभूवुरन्धका घोरा र्येव्याप्तमखिलं जगत् ।
एव मायाविनं दृष्ट्वा तञ्च देवस्तदान्धकम् ।।८
पानार्थमन्धकास्रस्य सोऽसृजन्मातरस्तदा ।
माहेश्वरी तथाब्राह्मी कौमारी म।लिनीतथा ।।६
सौपर्णी ह्यथ वायव्या शाक्री वै नऋती तथा ।
सौरी सौम्या शिवा दूती चामुण्डा चाथ वारुणी ।।१०
वाराहीनारसिंहीच वैष्णवीच चलच्छिखा ।
शतानन्दाभगानन्दा पिच्छिलाभगमालिनी ।।११
बला च।तिबला रक्ता सुरभीमुखमण्डिका ।
मातृनन्दा सुनन्दाच विडाली शकुनी तथा ।।१२
रेवतोच महारक्ता तथैग पिलपिच्छिका ।
जयाच विजया चैव जयन्ती चापराजिता ।।१३
काली चैव महाकाली दूती चैव तथैव च ।
सुभगा दुर्भगा चैव कराली नन्दिनी तथा ।।१४

उस समय में परम घोर अन्धक उत्पन्न हो गये थे जिनसे यह समस्त जगत् एकदम व्याप्त हो गया था । उस समय में इस प्रकार से मायावी उस अन्धक को देव ने देखकर उस अन्धकासत्र के पान के लिए उस समय में उन्होंने माताओं का सृजन किया था । अब उन माताओं के नाम बतलाये जाते हैं—माहेश्वरी—ब्राह्मी—कौमारी—मालिनी—सौपर्णि —वायव्या—शाक्री—नैऋती—सौरी—सौम्या—शिवा—दूती—

चामुण्डा—वारुणी ॥ ८ । ९ । १० ॥ वाराही—नारसिंही—वैष्णवी—चलच्छिखा—शतानन्दा—भगानन्दा—पिच्छला—भगमालिनी—बला—अतिबला—रक्ता—सुरभी—मुखमण्डिका—मातृनन्दा—सुनन्दा—बिडाली—शकुनी—रेवती—महारक्ता—पिलपिच्छिका—जया—विजया—जयन्ती—अपराजिता—काली—महाकाली दूती—सुभगा—दुर्भगा—कराली—नन्दिनी ॥११-१४॥

अदितिश्च दितिश्चैव मारीर्वं मृत्युरेव च ।
कर्णमोटी तथा ग्राम्या उलूकीच घटोदरी ॥१५
कपाली वज्रहस्ता च पिशाची राक्षसी तथा ।
भुशुण्डी शाङ्करी चण्डा लाङ्गली कुटभी तथा ॥१६
खेटा सुलोचना धूम्रा एकवीरा करालिनी ।
विशालदंष्ट्रिणी श्यामा त्रिजटीकुक्कुटीतथा ॥१७
वैनायकी च वैताली उन्मत्तोदुम्वरी तथा ।
सिद्धिश्च लेलिहाना च केकरी गर्दभीतथा ॥१८
भ्रुकुटी बहुपुत्रीच प्रेतयाना विडम्विनी ।
क्रौञ्चा शैलमुखी चैव विनता सुरमा दनुः ॥१९
उषा रम्भा मेनकाच सलिलाचित्ररूपिणी ।
स्वाहास्वधा वषट्कारा धृतिर्ज्येष्ठाकपर्दिनी ॥२०
माया विचित्ररूपा च कामरूपा च सङ्गमा ।
मुखेविला मङ्गला च महानासा महामुखी ॥२१

अदिति—दिति—मारी—मृत्यु—कर्णमोटी—ग्राम्या—उलूकी—घटोदरी—कपाली—वज्रहस्ता—पिशाची—राक्षसी—भुशुण्डी—शाङ्करी—चण्डा—लाङ्गली—कुटभी—खेरा—सुलोचना—धूम्रा—एक वीरा—करालिनी—विशाली दंष्ट्रिणी—श्यामा—त्रिजटी—कुक्कुटी—वैनायकी—वैताली—उन्मत्ता—उदुम्बरी—सिद्धि—लेलिहाना—केकरी—गर्दभी—भृकुटी—बहुपुत्री—प्रेतयाना—बिडम्बिनी—क्रौञ्चा—शैलमुखी—विनता—सुरमा—दनु—उषा—रम्भा—

मेनका-पलिला-चित्ररूपिणी-स्वाहा—स्वधा-वषट्कारा-धृति--ज्येष्ठा-कमर्दिनी-माया--विचित्र रूपा-कामरूपा--सङ्गना--मुखेविला--मङ्गला-महानाशा-महामुखी ॥१५-२१॥

कुमारी रोचनाभीमा सदाहा सा मदोद्धता ।
अलम्वाक्षी कालपर्णी कुम्भकर्णीमहासुरी ॥२२
केशिनी शङ्खिनीलम्बा पिङ्गलालोहितामुखी ।
घण्टारवाथदष्ट्राला रोचना काकजङ्घिका ॥२३

गोकर्णिकाच मुखिकामहाग्रीवा महामुखी ।
उल्कामुखीधूमशिखा कम्पिनी परिकम्पिनी ॥२४
मोहना कम्पनाक्ष्वेला निर्भया बाहुशाहिनी ।
सर्पकर्णी तथैकाक्षी विशोकानन्दिनीतथा ॥२५

जोत्स्नामुखीच रभसा निकुम्भा रक्तकम्पना ।
अविकारा महाचित्रा चन्द्रसेना मनोरमा ॥२६
अदर्शना हरत्पापा मातङ्गी लम्बमेखला ।
अवाला वञ्चना काली प्रमोदा लाङ्गलावती ॥२७
चिता चित्तजला कोणा शान्तिकाघविनाशिनी ।
लम्बस्तनी लम्बसटा विसटा वासचूर्णिनी ॥२८

कुमारी—रोचना—भीमा—सदाहा--मदोद्धता – अलम्बाक्षी—कालपर्णी—कुम्भपर्णी--महासुरी—केशिनी-शखिनी—लम्बा--पिङ्गला-लोहितामुखी—घन्टारवा – दष्ट्राला-रोचना-काक जङ्घिका-गोकर्णिका-मुखिका—महाग्रीवा – महामुखी-उल्कामुखी-धूमशिखा--कम्पिनी-परिकम्पिनी—मोहना---कम्पना क्ष्वेला—निर्भया—बाहुशाहिनी—सर्पकर्णी—एकाक्षी—विशोका—ज्योत्स्नामुखी—रभसा-निकुम्भा---रक्त कम्पना--अविकारा-महाचित्रा-चन्द्रसेना —मनोरमा-अदर्शना-हरत्पापा-मातङ्गी-लम्ब मेखला-अवाला--बञ्चना-काली-प्रमोदा—लाङ्गलावती--चिन्ता-

चित्त–जला – कोणा–शान्तिका– अघ विनाशनी – लम्बस्तनी—-लम्बसटा–बिसटा–वास चूर्णिनी ।।२२–२७।

स्खलन्ती दीर्घकेशीच सुचिरा सुन्दरी शुभा ।
अयोमुखी कटुमुखी क्रोधनीच तथाशनी ।।२९
कुटुम्त्रिका मुक्तिका च चन्द्रिका बलमोहिनी ।
सामान्या हासिनी लम्बा कोविदारी समासवी ॥३०
कंकुकर्णी महानादा महादेवी महोदरी ।
हुङ्कारी रुद्रसुसटा रुद्रेशी भूतडामरी ।।३१
पिण्डजिह्वा चलज्ज्वाला शिवा ज्वालामुखी तथा ।
एताश्चान्याश्च देवेशः सोऽसृजन्मातृस्तदा ।।३२
अन्धकानां महाघोराः पपुस्तद्रुधिरं तदा ।
ततोऽन्धकासृजः सर्वाः परां तृप्तिमुपागताः ।।३३
तासु तृप्तासु सम्भूता भूय एवान्धकप्रजाः ।
अर्दितस्तैर्महादेवः शूलमुद्गरपाणिभिः ।।३४
ततः स शङ्करो देवस्त्वन्धकैर्व्याकुलीकृतः ।
जगाम शरणं देवं वासुदेवमजं विभुम् ।।३५

स्खलन्ती, दीर्घकेशी, सुचिरा, सुन्दरी, शुभा, अयोमुखी, कटुमुखी, क्रोधनी, अशनी, कुटुम्बिका, मुक्तिका, चन्द्रिका, बलमोहिनी, सामान्या, हासिनी, लम्बा, कोविदारी, समासवी, कंकुकर्णी, महानादा, महादेवी, महोदरी, हुंकारी, रुद्र सुसटा, रुद्रेशी, भूतडामारी, पिण्डजिह्वा, चलज्ज्वाला, शिवा, ज्वालामुखी, इन इतनी तथा अन्य माताओं का देवेश्वर ने उस समय में सृजन किया था ।। २९, ३०, ३१, ३२ ।। उस समय में इन महा घोराओं ने अन्धकों क रुधिर का पान किया था । इसके अनन्तर अन्धकों के रुधिर से सभी माताऐं परम तृप्ति को प्राप्त हुई थीं । उनके तृप्त होने पर भी पुन: अन्धकों की प्रजा उत्पन्न हुई थीं । शूल और मुद्गर हाथों में धारण करने वाले उनके द्वारा महादेव बहुत ही अर्दित

हुए थे। इसके उपरान्त वह देव शंकर अन्धकों के द्वारा व्याकुल कर दिये गये थे और फिर वे अज—प्रभु वासुदेव भगवान् की शरणागति में प्राप्त हुए थे ।।३३-३५।।

ततस्तु भगवान् विष्णुः सृष्टवान् शुष्करेवतीम् ।
या पपौ सकलन्तेषामन्धकानामसृक् क्षणात् ।।
यथा यथा च रुधिरं पिबन्त्यन्धकसम्भवम् ।।३६।।
तथा तथाऽधिकं देवी संशुष्यति जनाधिप ! ।
पीयमाने तथातेषामन्धकानां तथासृजि ।।
अन्धकास्तु क्षयन्नीताः सर्वे ते त्रिपुरारिणा ।।३७।।
मूलान्धकन्तु विक्रम्य तदा शर्वस्त्रिलोकधृक् ।
चकार वेगाच्छूलाग्रे सचतुष्टाघशङ्करम् ।।३८
अन्धकस्तु महावीर्यस्तस्य तुष्टोऽभवद्भवः ।
सामीप्यं प्रददौ नित्यं गणेशत्वं तथैव च ।।३९
ततो मातृगणाः सर्वे शङ्करं वाक्यमब्रुवन् ।
भगवन् ! भक्षयिष्यामः स देवासुरमानुषान् ।।४०
त्वत्प्रसादाज्जगत् सर्वं तदनुज्ञातुमर्हसि ।
भवतीभिः प्रजाः सर्वा रक्षणीयाः न संशयः ।।४१
तस्माद्घोरानभिप्रायान्मनः शीघ्रं निवर्त्यताम् ।
इत्येवं शङ्करेणोक्तमनादृत्य वचस्तदा ।।४२

इसके अनन्तर भगवान् विष्णु ने शुष्क रेवती की सृष्टि की थी जिसने क्षण भर में ही उन अन्धकों के रक्त को पी लिया था। हे जनाधिप ! जैसे २ वे उस अन्धक के रुधिर का पान करती थीं वैसे २ ही देवी अधिक शुष्क हो जाया करती थी। उस प्रकार से अन्धकों के रक्त का पान कर लेने पर वे सब अन्धक त्रिपुरारि के द्वारा क्षय को प्राप्त कर दिये गये थे ।। ३६, ३७ ।। उस समय में जो मूल अधिक था उस पर त्रिलोकी के धारण करने वाले भगवान् शिव ने विक्रम करके वेग के साथ

उसको अपने त्रिशूल के अग्रभाग पर कर दिया था। उस अन्धक ने फिर भगवान् शंकर का स्तवन किया था। वह अन्धक महान् वीर्य वाला था और उससे भगवान् भव परम तुष्ट हो गये थे। फिर तो शंकर ने उसको अपनी समीपता को रहने का पद तथा गणेशत्व पद का प्रदान किया था ।। ३८, ३९ ।। इसके अनन्तर सब मातृगणों ने भगवान् शंकर से यह वाक्य कहा था—हे भगवन्! हम अब सब देव-असुर और मानवों का भक्षण करेंगी क्योंकि यह सम्पूर्ण जगत् आपके ही प्रसाद से समुत्पन्न हुआ है और स्थित है सो अब आप हमको आज्ञा प्रदान करने के योग्य होते हैं। भगवान् शङ्कर ने उनसे कहा था। शंकर बोले—आप सबको इन प्रजाओं की रक्षा करनी चाहिए। इसमें कुछ भी संशय नहीं है। इसलिये इन घोर जो प्रजाओं के भक्षण कर जाने के अभिप्राय हैं उनसे शीघ्र ही अपने मन को हटालो। इस प्रकार से कहे हुए इन भगवान् शंकर के वचनों का उन मातृगणों ने उस समय में अनादर कर दिया था ।। ४०, ४१, ४२ ।।

भक्षयामसुरत्युग्रास्त्रैलोक्यं सचराचरम् ।
त्रैलोक्ये भक्ष्यमाणे तु तदा मातृगणेन वै ।।४३
नृसिहमूर्ति देवेश प्रदध्यो भगवाञ्छिवः ।
अनादिनिधनं देवं सर्वलोकभवोद्भवम् ।।४४
दैत्येन्द्रवक्षोरुधिरचर्चिताग्रमहानखम् ।
विद्युज्जिह्व महादंष्ट्रं स्फुरत्केसरकण्टकम् ।।
कल्पान्तामरुतक्षुब्ध सप्तपर्णसमस्वनम् ।।४५
वज्रतीक्ष्णनखं घोरमाकर्णव्यादिताननम् ।
मेरुशैलप्रतीकाशमुदयार्कसमेक्षणम् ।।४६
हिमाद्रिशिखराकारं चारुदंष्ट्रोज्वलाननम् ।
नखनिःसृतरोषाग्नि ज्वालाकेसरमालिनम् ।।४७
वज्राङ्गदं सुमुकुटं हारकेयूरभूषमम् ।

श्रोणीसूत्रेण महता काञ्चनेन विराजितम् ॥४८
नीलोत्पलदलश्यामं वासोयुगविभूषणम् ।
तेजसाक्रान्तसकलब्रह्माण्डागारसंकुलम् ॥ ४९

अत्युग्र स्वरूप वाली उन माताओं ने इस चराचर सम्पूर्ण जगत् तथा त्रैलोक्य का भ्रमण करना आरम्भ कर दिया था। उस समय में मातृगण के द्वारा इस त्रिलोकी के भक्ष्यमाण होने पर भगवान् शिव ने देवेश श्री नृसिंह मूर्त्ति का ध्यान किया था जिनका स्वरूप आदि और अन्त से रहित है और जो इस सम्पूर्ण लोक के उत्पत्ति को करने वाले हैं। दैत्येन्द्र हिरण्य कशिपु के वक्षः स्थल के रुधिर से चर्चित महान् नखों वाले—विद्युत के तुल्य जीभ से युक्त—महान् दाढ़ों वाले—स्फुरित हुए केसरों के कण्टकों से सम्युत–कल्प के अन्त में क्षोभ से पूर्ण मारुत से समन्वित तथा सप्तपर्ण वृक्षों के तुल्य ध्वनि वाले थे। बज्र के समान तीक्ष्ण नखों वाले–घोर–कानों तक व्याहित मुख बाले—मेरु पर्वत के सदृश–उदय कालीन सूर्य के समान नेत्रों वाले–हिमालय को शिखर के समान आकार से संयुत–सुन्दर दाढ़ों समुज्ज्वल मुख वाले–नखों से निकली हुई रोषाग्नि की ज्वालाओं की माला वाले—बज्र के अङ्गों के धारण कर्त्ता–मुकुट से युक्त---हार और केयूरों के आभरण से भूषित---तेज से समाक्रान्त सम्पूर्ण ब्रह्माण्ड के आगार से संकुल उनका स्वरूप था। ॥ ४३--४९ ॥

पवनं भ्राम्यमाणानां हुतहव्यवहार्चिषाम् ।
आवर्तसदृशाकारैः संयुक्तं देहलोमजैः ॥५०
सर्वपुष्पविचित्राञ्च धारयन्तं महास्रजम् ।
स ध्यातमात्रो भगवान् प्रददौतस्य दर्शनम् ॥५१
यादृशेनैवरूपेण ध्याते रुद्रेण धीमता ।
तादृशेनेव रूपेण दुर्निरीक्ष्येण दैवतः ॥५२

प्रणिपत्य तु देवेशं तदा तुष्टाव शङ्करः ।
नमस्तेऽस्तु जगन्नाथ ! नरसिंहवपुर्धर ! ॥५३
दैत्यनाथासृजापूर्ण ! नखशक्तिविराजित ! ।
ततः सकलसंलग्नहेमपिङ्गलविग्रह ! ॥५४
नतोऽस्मिपद्मनाभ ! त्वांसुशक्र ! जगद्गुरो ।
कल्पान्ताम्भोदनिर्घोष ! सूर्यकोटिसमप्रभ ॥५५
सहस्रयमसंक्रोध ! सहस्रेन्द्रपराक्रम ! ।
सहस्रधनदस्फीत ! सहस्रवरुणात्मक ! ॥५६

हुत की हुई हव्य को वहन करने वाले अग्नि की भ्रम्यमाण अर्चियों के पवन, आवर्त्त के सदृश आकारों वाले देह के लोमजों से संयुक्त, सभी तरह के पुष्पों से अद्भुत महामाला को धारण करने वाले श्री नृसिंह का स्वरूप था । जैसे ही शिव ने उनका उपर्युक्त स्वरूप से समन्वित वपु का ध्यान किया था वैसे ही तुरन्त उन्होंने शिव को अपना दर्शन दिया था । जिस प्रकार के स्वरूप का धीमान् रुद्रदेव के द्वारा ध्यान किया गया था उसी प्रकार के देवों के द्वारा भी दुर्निरीक्षणीय स्वरूप में वह वहाँ उपस्थित हुए थे । भगवान् शंकर ने उनको प्रणिपात करके फिर स्तुति की थी । भगवान् शंकर ने कहा---हे जगत् के स्वामिन् ! आप तो नर और सिंह दोनों के स्वरूप को धारण करने वाले हैं । ऐसे आपको नमस्कार है । हे दैत्यनाथों के रक्त से आपूर्ण---हे नखों की शक्ति से विराजमान ! हे सम्पूर्ण संलग्न हेम के सदृश पिङ्गल विग्रह वाले ! हे पद्मनाभ ! मैं आपको प्रणत होता हूँ । हे सुरों के शक्र ! हे जगत् के गुरो ! हे कल्पान्त में अम्भोद के समान निर्घोष वाले ! आप तो करोड़ों सूर्य्यों के समान प्रभा वाले हैं । आपका क्रोध सहस्रों यमों के समान है । आप सहस्रों इन्द्रों के समान पराक्रम वाले हैं । आप सहस्रों धनदों के तुल्य सकीत हैं और आप सहस्रों वरुणों के स्वरूप वाले हैं । ॥ ५०--५६ ॥

सहस्रकालरचित ! सहस्रनियतेन्द्रिय ।
सहस्रभूमिसद्धैर्य ! सहस्रानन्त ! मूर्तिमन् ! ।।५७
सहस्रचन्द्रप्रतिम ! सहस्रग्रहविक्रम ! ।
सहस्ररुद्रतेजस्क ! सहस्रब्रह्मसंस्तुत ! ।।५८
सहस्रबाहुवर्गोग्र ! सहस्रास्य निरीक्षण ! ।
सहस्रयन्त्रमथन ! सहस्रबधमोचन ! ।।५९
अन्धकस्य विनाशयया:सृष्टा:मातरो मया ।
अनादृत्य तु मद्वाक्च्यम्भक्षयन्त्यद्यता:प्रजा: ।।६०
कृत्वा ताश्च न शक्तोऽहं संहर्तंमपराजित ।
स्वयङ्कृत्वा कथन्तासांविनाशमभिकारये ।।६२
एवमुक्त: स रुद्रेण नरसिंहवपुर्धर: ।
ससर्ज देवोजिह्वायास्तदावाणीश्वरीं हरि: ।।६२
हृदयाच्च तथा माया गुह्याच्च भवमालिनी ।
अस्थिभ्यश्च तथाकाला सृष्टापूर्वं महात्मना ।।६३

हे सहस्र कालों से रचित ! हे सहस्र नियत इन्द्रियों वाले ! हे सहस्र भूमि सद्धैर्य्य ! हे सहस्रानन्त ! हे मूर्त्तिमन् ! हे सहस्र चन्द्रों की प्रतिभा वाले ! आप तो सहस्रों ग्रहों के विक्रम वाले हैं और सहस्र चन्द्रों के तेज से सयुत हैं। आप सहस्रों ब्रह्माओं के द्वारा संस्तुत हैं। हे सहस्र बाहु बर्गोग्र ! हे सहस्राक्ष के समान नेत्रों वाले ! हे सहस्र यन्त्रय मन ! हे सहस्र बध मोचन ! मैंने अन्धक दैत्य के विनाश के लिये जिन मातृगण का सृजन किया था वे ही आज मेरे वचन का अनादर करके उन प्रजाओं का भक्षण कर रहे हैं। हे अपराजित! उस मातृगण को सृजन करके अब उसके संहार करने में मैं अशक्त हो रहा हूँ क्योंकि स्वयं ही मैंने जिसको बनाया था उसका विनाश मैं ही स्वयं कैसे करूँ। इस प्रकार से रुद्रदेव के द्वारा उन नरसिंह वपु के धारी प्रभु से जब कहा गया था उन हरिदेव ने जिह्वा की वाणीश्वरी की

रचना की थी। हृदय से माया—गुह्य से भवमालिनी और अस्थियों से कोली का पहिले उस महात्मा ने सृजन किया था ॥ ५७-६३ ॥

यया तद्रुधिरम्पीतमन्धकानां महात्मनाम् ।
याचास्मिन्कथिता लोकेनामत:शुष्करेवती ॥६४
द्वात्रिशन्मातर: सृष्टा गात्रेभ्यश्चक्रिणा तत: ।
तासां नामानि वक्ष्यामि तानि मे गदत: शृणु ॥६५

सर्वास्तासु महाभागा घण्टाकर्णी तथैव च ।
त्रैलोक्यमोहिनी पुण्या सर्वसत्ववशङ्करी ॥६६
तथा च चक्रहृदया पञ्चमी व्योमचारिणी ।
शङ्खिनी लेखिनी चैव कालसङ्कर्षणी तथा ॥६७

इत्येता: पृष्ठगाराजन् ! वागीशानुचरा: स्मृता: ।
सङ्कर्षणीतथाश्वत्थांवीजभावापराजिता: ॥६८
कल्याणी मधुदंष्ट्री च कमलोत्पलहस्तिका ।
इति देव्यष्टकं राजन् ! मायानुचरमुच्यते ॥६९

जिसने महात्मा अन्धकों का रुधिर पान किया था और जो नाम से लोक में शुष्क रेवती कही गयी थी। इसके पश्चात् चक्रधारी प्रभु ने अपने ही गात्रों से बत्तीस माताओं का सृजन किया था। उन सबके नामों को बतलाने वाले मुझसे अब तुम सुनलो ॥ ६४, ६५ ॥ उनमें सभी महान् भागों वाली थीं। घण्टा कर्णी—त्रैलोक्य मोहिनी—पुण्या सर्वसत्व शंकरी—चक हृदया—पाँचवीं व्योमचारिणी—शंखिनी—लेखिनी काल सकर्षिणी ये सब हे राजन् ! उस वागीशा के पीछे गमन करने वाली अनुचारिणी थीं—ऐसा कहा गया है। संकर्षणी—अस्वत्था—बीजभावा—अपराजिता—कल्याणी—मधुदंष्ट्री और कमला तथा उत्पल हस्तिका हे राजन् ! देवियों का जो अष्टक था वह मायानुचर कहा जाता है। ॥ ६६-६९ ॥

अजिता सूक्ष्महृदया वृद्धा वेशाश्मदंशना ।
नृसिंहभैरवा विल्वा गरुत्महृदया जया ॥७०
भवमालिन्यनुचरा इत्यष्टौ नृपमातरः ।
आकर्णनी सम्भटा च तथैवोत्तरमालिका ॥७१
ज्वालामुखी भीषणिकाकामधेनुश्चबालिका ।
तथापद्मकराराजन् ! रेवत्यनुचराःस्मृता ॥७२
अष्टौ महाबलाः सर्वा देवगात्रसमुद्भवाः ।
त्रैलोक्यसृष्टिसंहारसमर्थाः सर्वदेवताः ॥७३
ताः सृष्टमात्रादेवेन क्रुद्धामातृगणस्य तु ।
प्रधाविता महाराज ! क्रोधविस्फारितेक्षणाः ॥७४
अविषह्यतमन्तासां दृष्टितेजः सुदारुणम् ।
तमेव शरणं प्राप्ता नृसिंहो वाक्यमब्रवीत् ॥७५
यथा मनुष्याः पशवः पालयन्तिचिरात् सुतान् ।
जयन्ति ते तथैवाशु यथावैदेवतात् सुतान् ॥७६
भवत्स्तु तथालोकान्पालयन्तु मयेरिताः ।
मनुजैश्च तथा देवैर्यजध्वं त्रिपुरान्तकम् ॥७७

अजिता, सूक्ष्महृदया, वृद्धा, वेशाश्म दशना, नृसिंह भैरवा, बिल्वा गरुत्महृदया, जया और भवमालिनी ये आठ अनुचर नृप माताऐं थीं । आर्कपानी, सम्भरा, उत्तर मालिका, ज्वालामुखी, भीषणिका, कामधेनु, बालिका, देगजन् ! पद्मकरा ये रेवती की अनुचारिणी थीं—ऐसा कहा गया है । ये आठ महाबल वाली और सभी देव के गात्रों से समुत्पन्न होने वाली थीं । ये सब देवता त्रैलोक्य की सृष्टि एवं संहार करने में समर्थ थीं । वे देव के द्वारा सृष्ट मात्र होते ही हे महाराज ! अति क्रुद्ध होकर क्रोध से त्रिस्फारित नेत्रों वाली मातृगण के पीछे प्रधावित हुईं थी । उनकी दृष्टि का तेज अविषह्यतम और परम सुदारुण था । उन सबने उन्हीं की शरणागति प्राप्त की थी तब श्री नृसिंह प्रभु ने यह वाक्य कहा था—जिस

प्रकार से मनुष्य और पशु चिरकाल तक सुतों का पालन किया करते हैं उसी भाँति देवगण के समान शीघ्र ही जय को प्राप्त होते हैं। आप लोग मेरे द्वारा प्रेरित होकर लोकों का पालन करें तथा मनुष्य और देवगण सब त्रिपुरान्तक का अभ्यर्चन किया करें।।७०, ७१, ७२, ७३, ७४।। ।।७५, ७६, ७७।।

नच बाधा प्रकर्तव्या ये भक्तास्त्रिपुरान्तके।
येच मां संस्मरन्तीह तेच रक्ष्याः सदानराः ।।७८
बलिकर्म करिष्यन्ति युष्माकं ये सदा नराः।
सर्वकामप्रदारतेषां भविष्यध्वन्तथैच ।।७९
उच्छासनादिकं ये च कथयन्ति मयेरितम्।
तेच रक्ष्याः सदालोकार्रक्षितव्यं मदासनम् ।।८०
रौद्रीं चैव परां मूर्ति महादेवः प्रदास्यति।
युष्मन्मुख्या महादेव्यस्तदुक्तं परिरक्षय ।।८१
मया मातृगणः सृष्टो योऽयं विगतसाध्वसः।
एष नित्यं विशालाक्ष्यो मयैव सह रंस्यते ।।८२
मया साद्धं तथा पूजां नरेभ्यश्चैव लप्स्यथ।
पृथक् सुपूजिता लोकैः सर्वान् कामान् प्रदास्यथ ।।८३
शुष्कां संपूजयिष्यन्ति ये च पुत्रार्थिनो जनाः।
तेषां पुत्रप्रदा देवी भविष्यन्तिनसंशयः। ८४

भगवान् त्रिपुरान्तक के जो भी भक्तगण हों उनको कोई भी बाधा नहीं करनी चाहिए। जो मनुष्य यहां पर मेरा स्मरण किया करते हैं उनकी भी सदा रक्षा करनी चाहिए। जो नर आपका सर्वदा बलिकर्म्म किया करते हैं अर्थात् आपको बलि समर्पित करते हैं उनकी समस्त कामनाओं के प्रदान करने वाले आप लोग उसी भाँति बन जाइये। मेरे द्वारा प्रेरित जो उच्छाशनादिक का कथन करते हैं उन लोकों की सदा रक्षा करनी चाहिये और मेरे आसन की भी सुरक्षा करने की कृपा करें। महादेव परा

रौद्री मूर्त्ति का प्रदान करेंगे। आपमें जो मुख्य महादेवियाँ हैं वे सब उपर्युक्त सबकी रक्षा करें। मेरे द्वारा इस मातृगण का सृजन किया गया है जो यह इस समय में विगत भय वाला है यह नित्य ही विशाल नेत्रों वाली मेरे ही साथ रमण में रमण करेंगे। मेरे ही ये नरों से पूजा प्राप्त करेंगी। यदि इन्हें पृथक् भी समर्चन किया जावेगा और लोग ऐसा करेंगे तो ये सभी मनोकामनाओं की प्राप्ति करा देंगी। जो पुत्रों के प्राप्त करने की इच्छा वाले हैं उन जनों को यह देवी पुत्र प्रदा अवश्य ही हो जायेंगी—इसमें तनिक भी संशय का कोई अवसर ही नहीं रहता है ॥ ७८, ७९ ॥ ॥८०, ८१, ८२, ८३, ८४॥

एवमुक्त्वा तु भगवान् सह मातृगणेन तु।
ज्वालामालाकुलवपुस्तत्रैवान्यरधीयत ॥८५
तत्र तीर्थं समुत्पन्नं कृतशौचेति यज्जगुः।
तत्रापि पूर्वजो देवो जगदार्तिहरो हरः ॥८६
रौद्रस्य मातृवर्गस्य दत्त्वा रुद्रस्तु पार्थिव।
रौद्रां दिव्यां तनुं तत्रमातृमध्येव्यवस्थितः ॥८७
सप्त ता मातरो देव्यः सार्द्धनारीनरः शिवः।
निवेश्य रौद्रं तत् स्थानं तत्रैवान्तरधीयत ॥८८
स मातृवर्गस्य हरस्य मूर्त्तिर्यदा यदा याति च तत्समीपे।
देवेश्वरस्यापि नृसिंहमूर्तेः पूजां विधत्ते त्रिपुरान्धकारिः ॥८९

इस प्रकार से कहकर वह भगवान् मातृगण के साथ ही ज्वालाओं की मालाओं से समाकुल वपु वाले वहां पर अन्तर्हित हो गये थे ॥८५॥ वहां पर एक तीर्थ की उत्पत्ति हो गई थी जिसको कृतशौचा—इस नाम से गान किया जाता था। वहां पर भी पूर्वज देव इस जगत् की आर्त्ति का (पीड़ा का) हरण करने वाले हर ही थे ॥८६॥ हे पार्थिव! भगवान् रुद्रदेव रौद्र मातवर्ग को रौद्र एवं दिव्य तब प्रदान करके वहां पर मातृ मध्य में व्यवस्थित हो गये थे। वे सात तो माताऐं देविया हैं और सार्द्ध

नारी नर शिव हैं । उस रौद्र स्थान को निवेशित करके वहीं पर अन्तर्धान हो गये थे । वह जब जब भी वह मातृ वर्ग की हर की मूर्त्ति उसके समीप में जाती है तब त्रिपुरान्धकारि शिव देवेश्वर नृसिंह मूर्त्ति की भी पूजा किया करते हैं ।।८७, ८८, ८९।।

७३—वाराणसी माहात्म्य

श्रुतोऽन्धकबधः सूत ! यथावत्त्वदुदीरितः ।
वाराणस्यास्तु माहात्म्य श्रोतुच्छिाम साम्प्रतम् ।।१
भगवान् पिङ्गलः केन गणत्वं समुपागतः ।
अन्नदत्त्वञ्च सम्प्राप्तो वाराणस्यां महाद्युतिः ।।२
क्षेत्रपालः कथं जातः प्रियत्वञ्च कथङ्गतः ।
एतदिच्छाम कथितं श्रोतुं ब्रह्मसुत ! त्वया ।।३
शृणुध्वं वै यथा लेभे गणेशत्वं स पिङ्गलः ।
अन्नदत्वं च लोकानां स्थानं वाराणसी त्विह ।।४
पूर्णभद्रसुतः श्रीमानासीद्यज्ञः प्रतापवान् ।
हरिकेश इतिख्यातो ब्रह्मण्यो धार्मिकश्च ह ।।५
तस्य जन्मप्रभृत्येव शर्वे भक्तिरनुत्तमा ।
तदासीत्तन्नमस्कारस्तन्निष्ठस्तत्परायणः ।।६
आसीनश्च शयानश्च गच्छंस्तिष्ठन्ननुव्रजन् ।
भुञ्जानोऽथ पिबन्वापि रुद्रमेवान्वचिन्तयत् ।।७

ऋषि वृन्द ने कहा—हे सूतजी ! आपके द्वारा वर्णित ठीक २ रीति से हमने अन्धक का वध श्रवण कर लिया अब इस समय में वाराणसी पुरी का माहात्म्य हम श्रवण करने की सब अभिलाषा रखते हैं । ।।१।। भगवान् पिङ्गल किस के द्वारा अथवा किस कारण से गणत्व को प्राप्त हुए थे ? यह महा द्युति से सुसम्पन्न वाराणसी में अन्न दत्त्व को

भी सम्प्राप्त हो गये हैं ? ।।२।। यह क्षेत्रपाल कैसे हुए और प्रियत्व की प्राप्ति भी किस तरह से हुई थी ? हे ब्रह्माजी के पुत्र ! यह सब आपके द्वारा वर्णित हम सब श्रवण करना चाहते हैं। महा महर्षि श्री सूतजी ने कहा—उस पिङ्गल ने जिस रीति से गणेशत्व की प्राप्ति की थी उसे आप लोग सुनिये। लोकों को अन्न देने वाले और यहां पर यह वाराणसी का स्थान जैसे प्राप्त हुआ वह भी सुनिये ।।३, ४।। पूर्णभद्र का पुत्र प्रताप वाला श्रीमान् यक्ष था। वह हरिकेश—इस नाम से विख्यात था और परम धार्म्मिक तथा ब्रह्मण्य था ।।५।। उसकी जन्म के आरम्भ से ही लेकर भगवान् शिव में अतीव उत्तम भक्ति थी। उस समय में शिव को ही नमस्कार करने वाला—उन्हीं में पूर्ण निष्ठा रखते हुए यह सर्वदा उन्हीं में परायण रहा करता था ।।६।। यह बैठा हुआ—शयन करता हुआ—गमन करते हुए—स्थित रहते हुए—अनुव्रजन करते हुए—भोजन करने की दशा में तथा पान करते हुए भी रुद्र का ही सदा अनुचिन्तन किया करता था ।।७।।

तमेवं युक्तमनसम्पूर्णभद्रः पिताब्रवीत् ।
न त्वां पुत्रमहं मन्येदुर्जातो यस्त्वमन्यथा । ८
न हि यक्ष कुलीनानामेतद्वृत्तं भवत्युत ।
गुह्यका वत यूयं वै स्वभावात् क्रूरचेतसः ।।९
क्रव्यादाश्चैव किं भक्षा हिंसाशीलाश्च पुत्रक ।
मैवं कार्षीर्नते वृत्तिरेवं दृष्टा महात्मना ।।१०
स्वयम्भुवा यथादिष्टा त्यक्तव्या यदि नो भवेत् ।
आश्रमान्तरजं कर्म न कुर्युर्गृहिणस्तु तत् ।।११
हित्वा मनुष्यभावं च कर्मभिर्विविधैश्चर ।
यत्त्वमेवं विमार्गस्थो मनुष्याज्जात एवच ॥१२
यथावद्विविधन्तेषां कर्म तज्जातिसंश्रयम् ।
मयापि विहितं पश्य कर्मैतन्नात्र संशयः ।।१३

इस प्रकार से युक्त मन वाले उससे उसके पिता पूर्ण ने कहा था—मैं पुत्र तुझको दुर्जात नहीं मानता हूं जो कि तू अन्यथा रहा करता है। ॥८॥ यक्ष कुलों में समुत्पन्नों का यह चरित नहीं हुआ करता है। खेद है आप लोग गुह्यक हैं स्वभाव से क्रूर चित्त वाले हुआ करते हैं ॥६॥ हे पुत्रक ! क्रव्याद लोग क्या भक्षण करने वाले हैं और हिंसा करने के स्वभाव वाले होते हैं। ऐसा मत करो। महान् आत्मा वाले के द्वारा तुम्हारी इस प्रकार की वृत्ति नहीं देखी गयी है ॥१०॥ स्वयम्भू ने जो समादिष्ट की है यदि आपमें हो तो उसे त्याग देना चाहिये। जो गृही होते हैं वे दूसरे आश्रम में उत्पन्न होने वाले कर्म को नहीं किया करते हैं और न उन्हें करना ही चाहिये ॥११॥ मनुष्यों के भाव को छोड़ कर विविध भाँति के कर्म्मों के द्वारा चरण करो। जो तू इस प्रकार से विमार्ग में स्थित है तो तू मनुष्य से ही समुत्पन्न हुआ है। यथावत् उनके अनक कर्म है जो उनकी जाति का संश्रय रखने वाला है। मैंने भी कर्म्म किया है उसे देखो। इससे इसमे कुछ भी सशय नहीं होगा ॥१२, १३॥

एवमुक्त्वा स तँ पुत्रं पूर्णभद्रः प्रतापवान् ।
उवाचनिष्क्रमन्क्षिप्रं गच्छपुत्र ! यथेच्छसि । १४
ततः स निर्गतस्त्यक्त्वा गृहं स.म्बन्धिनस्तथा ।
वाराणसीं समासाद्यतपस्तेपे सुदुश्चरम् ॥१५
स्थाणुभूतो ह्यनिमिषः शुष्ककाष्ठोपलोपमः ।
सन्नियम्येन्द्रियग्राममवातिष्ठत निश्चलः ॥१६
अथ तस्यंवर्मानिशन्ततत्परस्य तदा शिषः ।
सहस्रमेकं वर्षाणां दिव्यमप्यध्यवर्तत ॥१७
वल्मीकेन समाक्रान्तो भक्ष्यमाणः पिपीलिकैः ।
वज्रसूचीमुखैस्तीक्ष्णैं विध्यमानस्तथंव च ॥१८
निर्मांसरुधिरत्वक् च कुन्दशङ्खेदुसप्रभः ।
अस्थिशेषोऽभवच्छर्वं देवं वै चिन्तयन्नपि ॥१६

एतस्मिन्नन्तरे देवी विज्ञापयत शङ्करम् ।
उद्यानं पुनरेवेह द्रष्टुमिच्छामि सर्वदा ।।२०
क्षेत्रस्य देव माहात्म्यं श्रोतुं कौतूहल हि मे ।
यतश्च प्रियमेतत्ते तथास्य फलमुत्तमम् ।।२१

श्री सूत महर्षि ने कहा—वह प्रताप वाले पूर्णभद्र ने उस अपने पुत्र से इस प्रकार से कहकर फिर हे पुत्र ! तू यहां से निष्क्रमण करते हुए बहुत शीघ्र जहां भी चाहता है चला जा ।।१४।। इसके उपरान्त वह वहां से निर्गत होकर अपने गृह और समस्त सम्बधियों का परित्याग कर चला गया था । फिर वाराणसी पुरी में प्राप्त होकर उसने परम दुश्चर तप किया था ।।१५।। वहां पर पलकें पूर्णतया खोले हुए-एक स्थाणु (वृक्ष का ढूंठ) के रूप वाला—सूखा हुआ काष्ठ तथा पाषाण के सदृश होकर अपनी सम्पूर्ण इन्द्रियों के समुदाय को भली भाँति नियन्त्रित करके एक दम निश्जल होकर अवस्थित होगया था ।।१६।। इसके अनन्तर उसको निरन्तर इस प्रकार से तप मे तत्पर हुए को उस समय में एक सहस्र दिव्य वर्ष व्यतीत हो गये थे ।।१७।। उसका शरीर सर्पों की बाँबियों से समाक्रान्त हो गया था—पिपीलिकाऐं (चीटियां) उस शरीर को खा रही थीं तथा तीक्ष्ण वज्रसूची मुख कीटों से वह उसका वपुपूर्ण या विंधा हुआ सा हो गया था ।।१८।। यद्यपि उसका शरीर बिना माँस-रुधिर और त्वचा वाला ही था किन्तु फिर भी कुन्द—इन्दु और शंख के समान प्रभा से पूर्ण था । देवेश्वर का ही चिन्तन करते हुए वह पूरा शरीर केवल अस्थियों का ही एक ढाँचा शेष रह गया था । इसी बीच में देवी ने श्री शङ्कर भगवान् को विज्ञापित किया था ।।१९।। देवी ने कहा—मैं सर्वदा उस उद्यान को यहाँ पर देखने की अभिलाषा करती हूँ ।।२०।। हे देव ! इस उत्तम क्षेत्र के माहात्म्य को श्रवण करने के लिये मेरे हृदय में अत्यधिक कौतूहल हो रहा है । क्योंकि यह आपका प्रिय है तथा इसका उत्तम फल है ।।२१।।

इति विज्ञापितो देवः शर्वाण्या परमेश्वरः ।
शर्वः पृष्टोयथातथ्यमाख्यातुमुपचक्रमे ।।२२
निर्जगाम च देवेशः पार्वत्या सह शङ्करः ।
उद्यानं दर्शयामास देव्या देवः पिनाकधृक् ।।२३
प्रोत्फुल्लनानाविधगुल्मशोभितं लताप्रतानावनतं मनोहरम् ।
विरूढ़पुष्पैः परितः प्रियंगुभिः सुपुष्पितैः कण्टकितैश्च केतकैः ।।२४
तमालगुल्मैर्निचितं सुगन्धिभि सकर्णिकारैकुलैश्च सर्वशः ।
अशोकपुन्नागवरैः सुपुष्पितैर्द्विरेफमालाकुलपुष्पसञ्चयैः ।।२५
क्वचित्प्रफुल्लाम्बुजरेणुरूषितैर्विहङ्गमैश्चारुकलप्रणादिभिः ।
विनादितं सारसमण्डनादिभिः प्रमत्तदात्यूहरुतैश्च वल्गुभिः ।।२६
क्वचिच्च चक्राह्वरवोपनादितं क्वचिच्च कादम्बकदम्बकैर्युतम् ।
क्वचिच्च कारण्डवनादनादितं-
क्वचिच्च मत्तालिकुलाकुलीकृतम् ।२७।।
मदाकुलाभिस्त्वमराङ्गनाभि र्निषेवितञ्चारु सुगन्धिपुष्पम् ।
क्वचित् सुपुष्पैः सहकारवृक्षैर्लतोपगूढैस्तिलकद्रुमैश्च ।।२८

शर्वाणी के द्वारा परमेश्वर देव को यह विज्ञापित किया गया था और याथातथ्य को जब शिव प्रभु से पूछा गया तो वह पूछे हुए होकर इसे कहने के लिये उपक्रम करने लगे थे ।।२२।। देवेश्वर भगवान् शङ्कर पार्वती देवी के साथ ही निकलकर चले गये थे । फिर पिनाकधारी देव ने वह उद्यान देवी को दिखलाया था ।।२२।। देवों के देव बोले—यह उद्यान विकसित नाना भाँति के गुल्मों से शोभा वाला था । लताओं के प्रतानों से अवनत एवं मनोहर था । दोनों ओर विरूढ पुष्पों वाले प्रियंगुओं से—सुन्दर पुष्पों से समान्वत कण्टकित केतूकों से—सुगन्ध युक्त तमाल के गुल्मों से निर्मित और सब ओर कर्णिकारों के सहित वकुलों से वह समन्वित था ।।२४, २५।। द्विरेफों (भौंरों) की मालाओं से समाकुल पुष्पों के सञ्चय वाले सुपुष्पित अशोक पुन्नाग वरों से सयुत है ।।२५।। इस उद्यान में कहीं

चरु प्रफुल्ल कमलों के रेणु से रूषित तथा चारु एवं कल (मधुर) प्रणाद करने वाले विहंगमों से यह निनादित हो रहा था तथा किसी जगह पर सारस मण्डन आदि से एवं परम वल्गु प्रमत्त दात्यूहों के शब्दों से शब्दायमान था ॥२६॥ किसी स्थल पर चक्रवाकों की ध्वनियों से निनादित और कहीं पर कदम्बों के समूहों से यह उद्यान संयुत था। किसी स्थान में कारण्डवों की कल ध्वनियों से निनादित था और कहीं पर प्रमत्त अलियों के कुलों से आकुलीकृत हो रहा था ॥ २७ ॥ महान् कुलों वाली भ्रमरों की अङ्गनाओं के द्वारा सेवित तथा सुन्दर एवं सुगन्धित पुष्पों से परिपूर्ण यह उद्यान था। कहीं पर सुन्दर पुष्पों वाले सहकार के वृक्षों से तथा लताओं से उपगूढ तिलक के द्रुमों से समन्वित था ॥२८॥

प्रगीतविद्याधरसिद्धचारणं प्रवत्तनृत्याप्सरसाङ्गणाकुलम् ।
प्रहृष्टनानाविधपक्षिसेवितं प्रमत्तहारीतकुलोन्नादितम् ॥२६
मृगेन्द्रनादाकुलसत्वमानसैः क्वचित् वचितुद्वन्द्वकदम्बकैर्मृगैः ।
प्रफुल्लानानाविधचारुपङ्कजैः सरस्तटाकैरुपशोभितं क्वचित् ॥३०
निविडनिचुलनीलं नीलकण्ठाभिरामं-
मदमुदितविहङ्गव्रातनादाभिरामम् ।
कुसुमिततरुशाखालीनमत्तद्विरेफ—
नवकिशलयशोभाशोभितप्रान्तशाखम् ॥३१॥
क्वचिच्च दन्तिक्षतचारुवीरुधं क्वचिल्लतालिङ्गितचारुवृक्षकम् ।
क्वचिद्विलासालसगामिबर्हिणं निषेवितं किं पुरुषव्रजैः क्वचित् ॥३२
पारावतध्वनिविकूजितचारुश्रृङ्गैरभ्रङ्कषैः सितमनोहरचारुरूपैः ।
आकीर्णपुष्पनिकुरम्बविमुक्तहासैर्विभ्राजितं-
त्रिदशदेवकुलैरनेकैः ॥३३॥
फुल्लोत्पलागुरुसहस्रवितानयुक्तै ।
स्तोयावयंस्तमनुशोभितदेवमार्गम् ॥

मार्गान्तरागलितपुष्पविचित्रभक्ति-
सम्बद्धगुल्मविटपैर्विहगैरुपेतम् ।।३४
तुङ्गाग्रै र्नीलपुष्पस्तबकभरनतप्रान्तशाखैरशोकै-
र्मत्तालिव्रातगीतश्रुतिसुखजननैर्भासितान्तर्मनोज्ञैः ।
रात्रौ चन्द्रस्य भासा कुसुमिततिलकैरेकतां सम्प्रयातं
च्छायासुप्तप्रबुद्धस्थितहरिणकुलालुप्तदर्भाङ्कुराग्रम् ।।३५

वह उद्यान विद्याधर—सिद्ध और चारणों के गीतों से परिपूर्ण—नृत्य करने में प्रवृत्त हुई अप्सराओं के गणों से समाकुल था। परम प्रहर्ष वाले अनेक भाँति के पक्षियों के द्वारा यह उद्यान सेवित था। यह उद्यान प्रमत्त हारीत नाम वाले पक्षियों के समूह से उपनादित था ।।२९।। किसी स्थल पर मृगेन्द्रों की गर्जनों से सत्वों के मानसों को समाकुलित करने वाला था। कोई भाग इसका मृगों के जोड़ों के समुदायों से युक्त था। कहीं पर खिले हुए अनेक तरह के चारु कमलों से युक्त सरोवर और तड़ागों के द्वारा यह उद्यान शोभा वाला था ।।३०।। यह उद्यान घने निचुलों से नील वर्ण वाला—नील कण्ठों से अभिराम—मद से परम प्रसन्न पक्षियों के समूहों के नाद से परम मनोहर था। पुष्पों वाले वृक्षों की शाखाओं में जिस उद्यान में भौंरे प्रमत्त होते हुए लीन हो रहे थे और नूतन पत्रों की शोभा से शोभित प्रान्त शाखाओं वाला वह उद्यान था। कहीं पर गजों के द्वारा किये गये क्षतों से सुन्दर वीरुधों वाला था और कहीं पर लताओं के द्वारा सुन्दर वृक्षों का आलिङ्गन किया जा रहा था। किसी स्थल पर विलास में अलस गमन करने वाले वर्हि वाला तथा कहीं किम्पुरुषगण उस उद्यान का सेवन कर रहे थे ।।३१, ३२।। पारावतों की ध्वनि से विशेष रूप से कूजित सुन्दर शिखरों से जो कि आकाश को छूने वाले बहुत ही ऊँचे थे और श्वेत एवं मनोहर चारु रूप से युक्त थे वह उद्यान विभ्राजित हो रहा था और समाकीर्ण पुष्पों के निकुरम्ब से विमुक्त हास्य वाले अनेक देवों के कुलों के द्वारा वह सेवित था ।।३३।। खिले हुए

बड़े २ सहस्रों उत्पलों के वितानों से युक्त तोयाशयों से शोभा वाले देवमार्ग वाला वह उद्यान बहुत ही सुन्दर हो रहा था। मार्ग के बीच में गलित हुए पुष्पों से विचित्र भक्ति से सम्बद्ध झाड़ियों तथा विटपों से समायुक्त था बहुतही ऊंचे जिनके अग्रभाग हैं ऐसे नीले पुष्पों के स्तवकों के भार से अवनत शाखाओं वाले अशोक के वृक्षों से समायुक्त था तथा अत्यन्त प्रमत्त भ्रमरों के समुदायों के गुञ्जित गीतों से कानों को सुख समुत्पन्न करने वाले और अन्दर मनोज्ञता को भासित करने वाले तिलकों के कुसुमों के द्वारा तथा रात्रि में चन्द्र की दीप्ति से एकता को प्राप्त हुआ और छाया में प्रसुप्त होकर फिर जगे हुए संस्थित हिरनों के कुलों से आलुप्त दर्भों के अंकुरों वाला वह उद्यान था अर्थात् वहां पर लेटे हुए हरिणों के समूह से डाभों के अकुर दवे हुए हो गये थे ॥३४, ३५॥

हंसानां पक्षपातप्रचलितकमलस्वच्छविस्तीर्णतोयम्
तोयानां तीरजातप्रविकचकदलीवाटनृत्यन्मयूरम् ।
मायूरैः पक्षचन्द्रैः क्वचिदपि पतित रञ्जितक्ष्माप्रदेशम्
देशे देशे विकीर्णप्रमुदितविलसन्मत्ताहारीतवृक्षम् ॥३६
सारङ्गः क्वचिदपि सेवितप्रदेशं सच्छन्नं कुसुमचयः क्वचिद्विदैः ।
हृष्टाभिः क्वचिदपि किन्नराङ्गनाभिः
क्षीबाभिः समधुरगीतवृक्षखण्डम् ॥३७
संसृष्टैः क्वचिदुपलिप्तकीर्णपुष्पैरावासैः परिवृतपादपं मुनीनाम् ।
आमूलात् फलनिचितैः क्वचिद्विशालैरुत्तुङ्गैः
पनसमहीरुहैरुपेतम् ॥३८

फुल्लातिमुक्तकलतागृहसिद्धलीलं,
सिद्धाङ्गनाकनकनूपुरनादरम्यम् ।
रम्यप्रियंगु तरुमञ्जरिसक्तभृङ्ग भृङ्गावलीषु ॥
स्खलिताम्बुकदम्बपुष्पम् ॥३९॥
पुष्पोत्करानिलविघूर्णितपादपाग्रमग्रेसरो भुवि निपातितवंशगुल्मम् ।
गुल्मान्तरप्रभृतिलीनमृगासमूहं संमुह्यतान्तनुभृतामपवर्गदातृ ॥४०

चन्द्रांशुजालधवलैस्तिलकैर्मनोज्ञैः
सिन्दूरकुङ्कुमकुसुम्भनिभैरशोकैः ।
चामीकराभनिचयैरथ कर्णिकारैः
फुल्लारविन्दरचितं सुविशालशाखैः ॥४१
क्वचिद्रजतपर्णाभैः क्वचिद्विद्रुमसन्निभैः ।
क्वचित्काञ्चनसङ्काशैः पुष्पैराचितभूतलम् ॥ ४२

अभी तक निरन्तर उसी उद्यान की शोभा का ही वर्णन किया जा रहा है वह उद्यान हंसों के पंखों के प्रपात से विचलित होने वाले कमलों के द्वारा परम स्वच्छ एव विस्तीर्ण जल वाला था। जलाशयों के तट पर समुत्पन्न एवं प्रविकच कदलियों के वाट में नृत्य करने वाले मयूरों से युक्त वह उद्यान था। किसी स्थल पर गिरे हुए मयूरों के पक्ष चन्द्रों के द्वारा रञ्जित क्षमा प्रदेश वाला था तथा देश-देश में विकीर्ण—प्रमुदित–विलसत् मस्त हारीतों से संयुत वृक्षों वाला उद्यान था ॥३६॥ कहीं पर सारङ्गों सेवित प्रदेश वाला और किसी स्थल पर विचित्र कुसुमों से चयों से संछन्न -किसी स्थान पर परम क्षीब एवं प्रहर्षित किन्नरों की अङ्गनाओं के द्वारा सुमधुर गीतों वाले वृक्षों के खण्डों से समन्वित वह उद्यान था ॥३७॥ कही पर संसृष्ट तथा उपलिप्त प्रकीर्ण पुष्पों से युक्त मुनियों के निवास स्थानों से परिवृत पादपों से समन्वित वह उद्यान था। कहीं पर अत्यन्त विशाल एवं उत्तुङ्ग और मूल से ही लेकर फलों से निचित पनस कटहट) के वृक्षों से उपेत वह उद्यान था ॥३८॥ विकसित और अतिमुक्त लताओं के गृहों में सिद्धों की लीला वाला था तथा सिद्धों की अङ्गनाओं के सुवर्ण रचित नूपुरों के नाद से परम सुन्दर वह उद्यान था। परमरम्य प्रियंगु के वृक्षों की मञ्जरियों में संसक्त भ्रमरों से समन्वित तथा भृङ्गों की कतारों में स्खलित होने वाले जल कदम्बों के पुष्पों से संयुत वह उद्यान था ॥३९॥ कुसुमों के उत्करों से मिश्रित वायु से विघूर्णित वृक्षों के अग्रभाग वाला तथा भूमण्डल में निपातित बाँसो की

झाडियों से युक्त था । गुल्मों के बीच में लीन होने वाले मृगों के समुदाय वाला—सम्मोह को प्राप्त देहधारियों को अपवर्ग को देने वाला था । चन्द्रमा की किरणों के समान धवल मनोज्ञतिलकों से तथा सिन्दूर, कुंकुम और कुसुम्भ के तुल्य अशोकों से–चामीकर (सुवर्ण) की आभा के समान कर्णिकारों से और परम विशाल शाखाओं के द्वारा फुल्ल अरविन्दों से रचित वह उद्यान था । कहीं पर तो रजत वर्णों की आभा वाले—कहीं पर द्रुमों के सदृश–कहीं पर सुवर्ण के समान पुष्पों से समाचित भूतल वाला वह उद्यान था ।।४१, ४२।।

पुन्नागेषु द्विजगणविरुतं रक्ताशोकस्तबकभरनमितम् ।
रम्योपान्तं श्रमहरपवनं फुल्लाब्जेषु भ्रमरविलसितम् ।।४३
सकलभुवनभर्ता लोकनाथस्तदानीन्तु-
हिमशिखरिपुत्र्याः सार्द्धमिष्टैर्गणेशैः ।
विविधतरुविशालं मत्तहृष्टान्यपुष्ट-
मुपवनतरुरम्यं दर्शयामास देव्याः ।।४४
उद्यानं दर्शितं देव ! शोभया परया युतम् ।
क्षेत्रस्य तु गुणान् सर्वान्पुनर्वक्तुमिहार्हसि ।।४५
अस्य क्षेत्रस्य माहात्म्यमविमुक्तस्य तत्तथा ।
श्रुत्वापि हि न मे तृप्तिरतो भूयोवदस्वमे ।।४६
इदं गुह्यत क्षेत्रं सदा वाराणसी मम ।
सर्वेषामेव भूतानां हेतुर्मोक्षस्य सर्वदा ।।४७
अस्मिन् सिद्धाः सदा देवि ! मदीयं व्रतमास्थिताः ।
नानालिङ्गधरा नित्यं मम लोकाभिकाङ्क्षिणः ।।४८
अभ्यसन्ति परं योगं मुक्तात्मानो जितेन्द्रियाः ।
नानावृक्षसमाकीर्णे नानाविहगकूजिते ।।४९

वह दिव्य उद्यान ऐसा मनोरम था जिसमें पुन्नागों में द्विजगणों (पक्षियों) का कूजन हो रहा था और जो रक्त अशोकों के स्तवकों के भार

से नमित था जिसके उपान्त परमरम्य थे—शारीरिक श्रम को हरण करने वाला वायु जिसमें वहन कर रहा था तथा विकसित कमलों में जिस उद्यान में भ्रमरों का विलास हो रहा था ॥४३॥ उस समय में समस्त भुवनों के भरण करने वाले—लोकों के नाथ ने अपने इष्ट गणेशों के साथ में तुहिना शिखर हिमालय अद्रिराज की पुत्री देवी पार्वती को अनेक प्रकार के वृक्षों अत्यन्त विशाल—मत्त एवं हृष्ट अन्यो के द्वारा पुष्प और उपवन के तरुओं से रम्य उस उद्यान को दिखा दिया था ॥४४॥ देवी ने कहा—हे देव ! परा शोभा से युक्त इस उद्यान को तो आपने दिखला दिया है। अब समस्त इस क्षेत्र के गुणों को यहाँ पर आप कहने के योग्य हैं। अविमुक्त इस क्षेत्र के माहात्म्य को श्रवण करके भी मुझे पूर्ण तृप्ति नहीं हुई है। इसलिये इसे ही आप पुनः मुझे श्रवण कराइये ॥४५, ४६॥ देवों के देव ने कहा—यह अत्यन्त ही गुह्यतम क्षेत्र है जो सदा मेरा वाराणसी है। यह सर्वदा सभी प्राणियों के मोक्ष का हेतु होता है ॥४७॥ हे देवि ! इस क्षेत्र में सदा सिद्धगण मेरे ही व्रत में समास्थित रहते हैं। ये लोग विभिन्न प्रकार के चिन्हों के धारण करने वाले और नित्य ही मेरे लोक के प्राप्त करने की अभिकाङ्क्षा वाले थे ॥४८॥ मुक्त आत्मा वाले जितेन्द्रिय लोग अनेक वृक्षों से समाकीर्ण और नाना प्रकार के विहङ्गों से कूजित इस स्थल मे पर योग का अभ्यास किया करते हैं ॥४९॥

कमलोत्पलपुष्पाढ्यैः सरोभिः समलङ्कृते।
अप्सरोगणगन्धर्वैः सदा संसेवितेशुभे ॥५०
रोचते मे सदा वासोयेन कार्येण तच्छृणु।
मन्मना मम भक्तश्च मयि सर्वार्पितक्रियः ॥५१
यथा मोक्षमिहाप्नोति ह्यन्यत्र न तथा क्वचित्।
एतन्मम परं दिव्यं गुह्याद्गुह्यतरं महत् ॥५२
ब्रह्मादयस्तु जानन्ति येऽपि सिद्धा मुमुक्षवः।
अतः प्रियतमं क्षेत्रं तस्माच्चेह रतिर्मम ॥ ५३

विमुक्तं न मया यस्मान्मोक्ष्यते वा कदाचन।
महत् क्षेत्रमिद तस्यादविमुक्तमिदंस्मृतम् ।।५४
नैमिषेऽथ कुरुक्षेत्रे गङ्गाद्वारे च पुष्करे।
स्नानात्संसेविताद्वापि न मोक्षः प्राप्यते यतः ।।५५
इह संप्राप्यते येन तत एतद्विशिष्यते।
प्रयागे च भवेन्मोक्ष इह वा मत्परिग्रहात् ।।५६

कमल-उत्पल पुष्पों से आढ्य सरोवरों से समलंकृत-अप्सराओं के गण और गन्धर्वों के द्वारा सदा से सेवित शुभ स्थल यह है। जिस कार्य्य के कारण मुझे सदा इसका निवास पसन्द है उसे भी सुनलो। मेरे में ही मनको निवेशित करने वाला मुझ में ही सर्वस्व समर्पित कर देने वाला तथा सब किये हुए कर्मों को भी मेरी ही सेवा में अर्पित करने वाला मेरा भक्त जिस प्रकार से यहां मोक्ष की प्राप्ति कर लेता है वैसा अन्य किसी भी स्थान में नहीं कर सकता है। यह ही मेरा परम दिव्य-महत् और गुह्य से गुह्यतम क्षेत्र है ।।५०, ५१, ५२।। ब्रह्मादिक देवगण और जो भी मुमुक्षु सिद्ध लोग हैं वे इसे भली भाँति जानते हैं। इसीलिये मेरा यह सबसे अधिक प्रिय क्षेत्र है और इसी कारण से मेरी यहा पर अत्यधिक रति है। इसी से मैंने इसको कभी नहीं छोड़ा है और न भविष्य में भी मेरे द्वारा इसका त्याग किया जायगा इसी से उसका यह महत् क्षेत्र है और यह उसका अविमुक्त कहा गया है ।।५३, ५४।। नैमिष—कुरुक्षेत्र गङ्गाद्वार और पुष्कर में स्नान करने से तथा सेवित करने से भी मोक्ष प्राप्त नहीं किया जाता है। नहीं परम दुर्लभ मोक्ष यहाँ पर सम्प्राप्त कर लिया जाया करता है इसी से यह सब से विशिष्ट होता है। या तो प्रयाग में इस मोक्ष की प्राप्ति होती है अथवा यहाँ पर मेरे परिग्रह करने से मुक्ति हो जाती है ।।५५, ५६।।

प्रयागादपि तीर्थाग्र्यादिदमेव महत् स्मृतम्।
जैगीषव्यः परां सिद्धि योगतः स महातपाः ।।५७

अस्य क्षेत्रस्य माहात्म्याद्भक्त्या च मम भावनात् ।
जैगीषव्यो महाश्रेष्ठो योगिनां स्थानमिष्यते ।। ५८
ध्यायतस्तत्र मां नित्यं योगाग्निर्दीप्यते भृशम् ।
कैवल्यं परमं याति देवानामपिदुर्लभम् ।। ५९
अव्यक्तलिंगैर्मुनिभिः सर्वसिद्धान्तवेदिभिः ।
इह संप्राप्यते मोक्षो दुर्लभो देवदानवैः ।।६०
तेभ्यश्चाहं प्रयच्छामि भोगैश्वर्यमनुत्तमम् ।
आत्मनश्चैव सायुज्यमीप्सितं स्थानमेवच ।।६१
कुबेरस्तु महायक्षस्तथा शर्वार्पितक्रियः ।
क्षेत्रसम्वसनादेव गणेशत्वमवाप ह ।। ६२
सम्वर्तो भविता यश्च सोऽपि भक्त्या ममैव तु ।
इहैवाराध्य मां देवि ! सिद्धि यास्यत्यनुत्तमाम् ।। ६३

समस्त तीर्थों में प्रथम प्रयाग से भी यह ही महान् तीर्थ कहा गया है । वह महान् तपस्वी जैगीषव्य योग से परम सिद्धि को इस क्षेत्र के ही माहात्म्य से— भक्ति से और मेरी भावना से महान् श्रेष्ठ जैगीषव्य योगियों के स्थान को प्राप्त करता है ।।५७, ५८।। वहां पर नित्य ही मेरा ध्यान करने वाले की योगाग्नि अत्यन्त दीप्त हो जाया करती है और फिर वह देवों को भी दुर्लभ परम कैवल्य पद को प्राप्त करता है । अव्यक्त लिङ्गों वाले—सम्पूर्ण सिद्धान्तों को जानने वाले मुनियों के द्वारा यहां पर ही मोक्ष की प्राप्ति की जाया करती है जो देवों और दानवों के द्वारा भी अतीव दुर्लभ है ।।५९, ६०।। उन मेरे परम भक्तों को मैं अत्युत्तम भोग एवं ऐश्वर्य्य प्रदान किया करता हूं । तथा उनको अपना सायुज्य पद एवं अभीप्सित स्थान का प्रदान किया करता हूं । महान् यक्ष कुबेर तथा शिव के लिये ही अपनी समस्त क्रियाओं को अर्पित कर देने वाला इसी क्षेत्र में सम्वास करने ही से गणेशत्व के पद को प्राप्त हो गया था ।। ६१, ६२ ।। और जो सम्वर्त्त होगा वह भी मेरी ही भक्ति से हे

देवि ! यहां पर ही मेरी समाराधना करके अत्युत्तम सिद्धि को प्राप्त करेगा ।। ६३ ।।

पराशरसुतो योगी ऋषिर्व्यासो महातपाः ।
धर्मकर्त्ता भविष्यश्च वेदसंस्थाप्रवर्तकः ।।६४
रंस्यते सोऽपि पद्माक्षि ! क्षेत्रेऽस्मिन् मुनिपुङ्गवः ।
ब्रह्मा देवर्षिभिः सार्द्धं विष्णुर्वायुर्दिवाकरः ।।६५
देवराजस्तथा शक्रो येऽपि चान्ये दिवौकसः ।
उपासन्ते महात्मानः सर्वे सामेवसुव्रत ।।६६
अन्येऽपि योगिनः सिद्धाश्छन्नरूपा महाव्रताः ।
अनन्यमनसोभूत्वा मामिहोपासतेसदा ।।६७
अलर्कश्च पुरीमेताम् मत्प्रसादादवाप्स्यति ।
स चैनां पूर्ववत्कृत्वा चातुर्वर्ण्याश्रमाकुलाम् ।।६८
स्फातां जनसमाकीर्णां भक्त्याच सुचिरंनृपः ।
मयि सर्वार्पितप्राणो मामेव प्रतिपत्स्यते ।।६९
ततः प्रभृति चार्वङ्गि ! येऽपि क्षेत्रनिवासिनः ।
गृहिणो लिङ्गिनो वापि मद्भक्ता मत्परायणाः ।।७०
मत्प्रसादाद्भजिष्यन्ति मोक्षं परमदुर्लभम् ।
विषयासक्तचित्तोऽपि त्यक्तधर्मरतिर्नरः ।।७१
इहक्षेत्रेमृतः सोऽपिसंसारंन पुनर्विशेत् ।
ये पुनर्निर्ममा धीराःसत्वस्था विजितेन्द्रियाः ।।७२

पराशर मुनि का पुत्र—महान् तपस्वी और योगी ऋषि व्यासदेव धर्म्मों का करने वाला–आगे भविष्य में होने वाला वेदों की संस्था का प्रवर्त्तक होगा ।।६४।। हे पद्माक्षि ! वह मुनियो में परम श्रेष्ठ भी इसी क्षेत्र में रमण करेगा । ब्रह्मा—देवर्षियों के साथ विष्णु–वायु–दिवाकर–देवों का राजा इन्द्र और अन्य जो देवगण हैं वे सभी महान् आत्माओं

वाले हे सुव्रते ! मेरी ही उपासना किया करते हैं। इनके अतिरिक्त अन्य भी योगीजन—सिद्धगण और छिपे हुए महान व्रतों वाले लोग अनन्य मन वाले होकर यहां पर सर्वदा मेरी ही उपासना किया करते हैं। अलर्क इस पुरी को मेरे ही प्रसाद से प्राप्त करेगा और वह इस पुरी को पूर्व की ही भाँति करके जो चारों वर्णों से समाकुल–स्फीत और जनों से समाकीर्ण है। वह नृप बहुत समय पर्यन्त अपनी भक्ति की उत्कट भावना के द्वारा प्राप्त करेगा और फिर सर्वार्पित प्राण वाला होकर अन्त में मुझ को ही प्राप्त कर लेगा। हे चार्वङ्गि ! तभी से लेकर जो भी इस क्षेत्र के निवास करने वाले गृही एवं लिङ्गों के धारण करने वाले—मुझमें ही परायण रहने वाले मेरे भक्त परम दुर्लभ मोक्ष का सेवन करेंगे और वह मेरे ही प्रसाद से होगा। विषयों में समासक्त चित्त वाला भी धर्म में रति के त्याग करने वाला मनुष्य इस परम पुण्य मय क्षेत्र में मृत्युगत होकर फिर ससार में प्रवेश प्राप्त नहीं किया करता है और जो निर्मम एवं धीर तथा सत्त्वस्थ इन्द्रियों को नियन्त्रित रखने वाले हैं उनकी तो बात ही क्या है ।।६५।। ।।६६, ६७, ६८, ६९, ७०, ७१, ७२।।

व्रतिनश्च निरारम्भाः सर्वे ते मयि भाविताः ।
देहभङ्गं समासाद्य धीमन्तः सङ्गवर्जिताः ।।
गता एव परं मोक्षं प्रसादान्मम सुव्रते ।।७३
जन्मान्तरसहस्रेषु युञ्जन् योगमवाप्नुयात् ।
तमिहैव परं मोक्षं मरणादधिगच्छति ।।७४
एतत्सङ्क्षेपतो देवि ! क्षेत्रस्यास्य महत्फलम् ।
अविमुक्तस्य कथितं मया ते गुह्यमुत्तमम् ।।७५
प्रत्यूहश्च तथा सौरिश्चौक्षिर्वै कार्दमायनिः ॥४३
तथा गृत्समदो राजन् ! सनकश्च महान् ऋषिः ।
प्रवरास्तु तथोक्तानामार्षयाः परिकीर्तिता ॥४४
भृगुर्गृत्समदश्चैव आर्षावेतौ प्रकीर्त्तितौ ।
परस्परमवैवाह्या ऋषी वै परिकीर्तितौ ॥४५
एते तवोक्ता भृगुवंशजाता महानुभावा नृप गोत्रकाराः ।
एषां तु नाम्ना परिकीर्तितेन पापं समग्रं विजहातिजन्तु ॥४६

भृगु—वध्य्रश्व—दिवोदास ये सब परस्पर में अवैवाह्य ऋषिगण परिकीर्त्तित किये गये हैं। एकायन—याज्ञपति--मत्स्यगन्ध—प्रत्यूह—सौरि—औक्षि—कार्दमायानि—हे राजन् ! गृत्समद और महान् ऋषि सनक ये कहे हुए ऋषियों में प्रवर तथा आर्षेय कहे गये हैं। भृगु—गृत्समद ये दोनों आर्ष कीर्त्तित किये गये हैं। ये दोनों परस्पर में ऋषि अवैवाह्य कीर्तित हुए हैं। ये भृगु के वंश में उत्पन्न महानुभाव गोत्र करने वाले हैं। हे नृप! इन नामों के कीर्त्तन से जन्तु समग्र पापों को त्याग दिया करता है ।४२, ४३, ४४, ४५, ४६॥

७८–आङ्गिरसवंशज ऋषियों के नाम गोत्र वंश प्रवर वर्णन

मरीचितनया राजन् ! सुरूपा नाम विश्रुता ।
भार्या चाङ्गिरसो देवास्तस्याः पुत्रा दश स्मृताः ।।१
आत्मायुर्दमनो दक्षः सदःप्राणस्तथैव च ।
हविष्मांश्च गविष्ठश्चऋतः सत्यश्च ते दश ।।२
एते चाङ्गिरसोनाम देवा वै सोमपायिनः ।
सुरूपा जनयामास ऋषीन् सर्वेश्वरानिमान् ।।३
बृहस्पतिङ्गौतमञ्च संवर्त्तमृषिमुत्तमम् ।
उतथ्यं वामदेवं च अजस्यमृषिजन्तथा ।।४
इत्येते ऋषयःसर्वेगोत्रकाराःप्रकीर्तिताः ।
तेषां गोत्रसमुत्पन्नान् गोत्रकारान्निबोध मे ।।५
उतथ्योगौतमश्चैव तौलेयोऽभिजितस्तथा ।
साधंनेमिःसलोगाक्षिःक्षीरः कौष्टिकिरेवच ।।६
राहुकणिः सौपुरिश्च कैरातिःसामलोमकिः ।
पौषजितिर्भार्गवतो ह्यृषिरौरीडवस्तथा ।।७

श्री मत्स्य भगवान् ने कहा—हे राजन् मरीचि के पुत्री सुरूपा—इस नाम से प्रसिद्ध भार्या थी। आङ्गिरस देव उसके दश पुत्र बताये गये हैं ।।१।। आत्मायु—दमन–दक्ष—सदः प्राण–हविष्मान्—गविष्ठ—ऋत–सत्ये ये दश उनके नाम थे। ये सब आङ्गिरस नाम वाले सोमपायी देव थे। इन सर्वेश्वर सब ऋषियों को सुरूपा ने ही जन्म दिया था ।।२, ३।। वृहस्पति–गौतम-सम्वर्त्त–उत्तम ऋषि—उतथ्य—वामदेव—अजस्य—ऋषिज—ये सब ऋषिगण गोत्रकार कहे गये हैं। अब उनके गोत्र में समुत्पन्न जो गोत्र कार हैं उनको भी मुझसे जान लेना चाहिये। उतथ्य–गौतम—तौलेय—अभिजित—सार्धनेमि—सलौगाक्षि–क्षीर—कौष्टिक—राहुकणि–सौपुरि–कैराति–सामलोमकि—पौषजिति—भागवत—ऋषि—ऐरीडव ।।४-७।।

कारोटकः सजीवी च उपविन्दुसुरैषिणौ ।
वाहिनोपतिवैशाली क्रोष्टा चौवारुणायनिः ।।८
सोमोत्रायनिकासोरुकौशल्याः पार्थिवास्तथा ।
रौहिण्यायनिरेवाग्नी मूलपः पाण्डुरेव च ।।६
क्षपाविश्वकरोऽग्निश्च पारिकारारिरेव च ।
ह्यार्षेयाः प्रवराश्चैव तेषां च प्रवरान् शृणु ।।१०
अङ्गिराः सुवचोतथ्य उशिजश्च महानृषिः ।
परस्परमववाह्या ऋषयः परिकोर्तिताः ।।११
आत्रेयायनिसौवेष्टच्यौ अग्निवेश्यः शिलास्थलिः ।
बालिशायनिश्चौकेपी वाराहिर्बाष्कलिस्तथा ।।१२
सौटिश्चत्रिणकर्णिश्चप्रावहिश्चाश्वलायनिः ।
वाराहिर्बर्हिसादी च शिखाग्रीविस्तथैव च ।।१३
कारकिश्च महाकापिस्तथा चोडुपतिः प्रभुः ।
कौचकिर्धूमितश्चैव पुष्पान्वेषिस्तथैव च । १४

कारोटक—सजीवी—उपविन्दु—सुरैषिण—वाहिनीपति-वैशाली-क्रोष्टा—वारुणायनि—सोमोत्रायनि—-कासोरु—-कौशल्य—-पार्थिव—रौहिण्यायनि—अग्नि—मूलप—-पाण्ड—क्षपाविश्वकर—अरि—पारिकारारि—येह्यार्षेय और प्रवर थे अब आगे उनके प्रवरों का श्रवण करो । अङ्गिरा-सुवचोतथ्य—उशिज—महानृषि—-ये सब परस्पर में अवैवाह्य ऋषिगण कीर्त्तित किये गये हैं । आत्रेयायनि—सौवेष्टय—अग्निवेश्य—-शिलास्थलि—वालिशायनि—एकेपि—वाराहि—वर्हिसाही—शिखाग्रीवि—कारकि—महाकापि—उडुपति प्रभु—कौचकि—धूमति—पुष्पान्वेषी ।।८, ६, १०, ११, १२।। ।।१३, १४।।

सोमतन्विर्ब्रह्मतन्विः सालडिर्बालडिस्तथा ।
देवरारिर्देवस्थानिर्हारिकार्णिः सरिद्भुविः ।।१५
प्रावेपिः साद्यसुग्रीविस्तथा गोमेदगन्धिकः ।

मत्स्याच्छाद्यो मूलहरः फलाहारस्तथैव च ।।१६
गाङ्गोदधिः कौरुपतिः कौरुक्षेत्रिस्तथैव च ।
नायकिर्जैत्यद्रौणिश्च जैह्वलायनिरेव च ।।१७
आपस्तम्बिमौञ्जवृष्टिमार्ष्टिपिङ्गलिरेव च ।
पैलश्चैव महातेजाः शालङ्कायनिरेव च ।।१८
द्व्याख्येयो मारुतश्चैषां त्र्यार्षेयः प्रवरो नृप ! ।
अङ्गिराः प्रथमस्तेषां द्वितीयश्च वृहस्पतिः ।।१६
तृतीयश्च भरद्वाजः प्रवराः परिकीर्तिताः ।
परस्परमवैवाह्या इत्येते परिकीर्तिताः ।।२०
काण्वायनाः कोपचयास्तथा वात्स्यतरायणाः ।
भ्राष्टृकृद्राष्ट्रपिण्डी च लैन्द्राणिः सायकायनिः ।।२१

सोमतन्दि-ब्रह्मतन्वि-सालडि-वालडि-दे।रारि देव स्थानि-हारिकर्णि-सरिद्भुवि-प्रावेपि-साद्य सुग्रीवि—गोमेद गन्धिक-मत्स्याच्छाद्य—मूलहर-फलाहार-गङ्गोदधि-कोरुपति-कौरुक्षेत्रि-नामकि—जैत्यद्रौणि—जैह्वलायनि-आपस्तम्बि-मौञ्ज वृष्टि-मार्ष्टपिङ्गालि-पैल-महातेजा—शालङ्कायनि—द्व्याख्येय-मारुत—त्र्यार्षेय—प्रवर-हे नृप ! उनमें अंगिरा प्रथम था और द्वितीय वहस्पति था। तीसरा भरद्वाज ये सब प्रवर कीर्तित किये गये हैं। ये परस्पर में अवैवाह्य कहे गये हैं। काण्वायन-कोपचय-वात्स्य तरायण—भ्राष्ट्रकृत—राष्ट्रपिण्डी—लैन्द्राणि-सायकायनि ।।१५।।।।१६, १७, १८, १६, २०, २१।।

क्रोष्टाक्षो वहुवीती च तालकृन्मधुरावहः ।
लावकृद्गालविद्गाथो मार्कटिः पौलिकायनिः ।।२२
स्कन्द्रसश्च तथा चक्री गार्ग्यः श्यामायनिस्तथा ।
वालाकिः साहरिश्चैव पञ्चार्षेयाः प्रकीर्तिताः ।।२३
अङ्गिराश्च महातेजा देवाचार्यो बृहस्पतिः ।
भरद्वाजस्तथा गर्गः सैन्यश्च भगवानृषिः ।।२४

परस्परमवैवाह्या ऋषयः परिकीर्तिताः ।
कपीतरः स्वस्तितरो दाक्षिःशक्तिःपतञ्जलिः ।।२५
भूयसिर्जलसन्धिश्चविन्दुर्मादिःकुसीदकिः ।
ऊर्वस्तु राजकेशी च वौषडिः शंसपिस्तथा ।।२६
शालिश्चकलशीकण्टःऋषिःकारीरयस्तथा ।
काटयोधान्यायनिश्चैवभावास्यायनिरेव च ।।२७
भारद्वाजिःसौबुधिश्च लघ्वी देवमतीस्तथा ।
त्र्यार्षेयोऽभिमतश्चैव प्रवरो भूमिपोत्तम ।।२८

क्रोष्टाक्षी—बहुवीती—तालकृत—मधुरावह—लावकृत्—गालविद्—गाथी—मार्कटि—पौलकायनि—स्कन्दस–चक्री–गार्ग्य–श्यामायनि-बालाकि, साहरि, ये पाँच आर्षेय प्रकीर्तित हुए हैं । अङ्गिरा, महातेजा, देवाचार्य्य बृहस्पति, भरद्वाज, गर्ग, सैन्य, भगवान् ऋषि ये परस्पर में अवैवाह्य ऋषिगण कहे गये हैं । कपीतर, स्वस्तितर, दाक्षि, शक्ति, पतञ्जलि, भूयसि, जलसन्धि, विन्दु, मादि, कुसीदकि, ऊर्व, रजकेशी, वौषडि, शंसपि, शालि, कलशीकण्ट, ऋषि कारीरय, काटय, धान्यायनि भावास्यायनि, भारद्वजि, सौबुधि, लम्वी, देवमती, हे भूमिपोत्तम ! ये त्र्यर्षेय, अभिमत प्रवर वाले थे ।।२२, २३, २४, २५, २६, २७, २८।।

अङ्गिरा दमबाह्यश्च तथा चैवाप्युरुक्षयः ।
परस्परायणवर्णी च लौक्षिगार्ग्य हरिस्तथा ॥२६
गालविश्चैव त्र्यार्षेयः सर्वेषां प्रवरो मतः ।
अङ्गिरा संकृतिश्चैव गौरवीतिस्तथैव च ।।३०
परस्परमवैवाह्या ऋषयः परिकीर्तिताः ।
बृहदुक्थो वामदेवस्तथा त्रिः प्रवरा मताः ।।३१
अङ्गिरा बृहदुक्थश्च वामदेवस्तथैव च ।
कुत्साकुत्सैरवैवाह्या एवमाहुः पुरातना ।।३२

रथीतराणां प्रवरा त्र्यार्षेयाः परिकीर्तिताः ।
अङ्गिराश्च विरूपश्च तथैवच रथीतरः ।।३३
रथीतराह्यवैवाह्या नित्यमेव रथीतरैः ।
विष्णुर्वृद्धिः शिवमतिर्जतृणः कत्तृणस्तथा ।।३४
पुत्रवश्च महातेजास्तथा वैरपरायणः ।
त्र्यार्षेयोऽभिमतस्तेषां सर्वेषां प्रवरो नृप ! ।।३५

अङ्गिरा, दमवाह्य, उरुक्षय, परस्परायणत्रपर्णी, लौक्षि, गार्ग्य, हरि, गालवि, त्र्यार्षेय, सबका प्रवर माना गया है। अङ्गिरा, संकृति, गौर वीति ये सब परस्पर में अवैवाह्य ऋषिगण कीर्त्तित किये गये हैं। वृहदुक्थ, वामदेव ये त्रिप्रवर माने गए हैं। अङ्गिरा, वृहदुक्थ, वामदेव, कुत्साकुत्सै से ये अवैवाह्य थे–ऐसा पुरातन मनीषीगण कहते हैं। रथीतरों में प्रवर ये त्र्यार्षेय परिकीर्त्तित हुए हैं। अङ्गिरा, विरूप और उसी भाँति से रथीतर। रथीतरों से नित्य हीं विवाहन करने के योग्य थे। विष्णु वृद्धि, शिवमति, जतृण, कत्तृण, पुत्रव, महातेजा, वैरपारायण हे नृप ! इन सबका त्र्यार्षेय प्रवर अभिमत था ।।२९।३०।३१।३२।३३।३४।३५।।

अङ्गिरा मत्स्यदग्धश्च मुद्गलश्च महातपाः ।
परस्परमवैवाह्या ऋषयः परिकीर्तिताः ।।३६
हंसजिह्वो देवजिह्वो ह्यग्निजिह्वो विराडपः ।
अपाग्नेयस्त्वश्वयुश्च परण्यस्ताविमौद्गलाः ।।३७
त्र्यार्षेयाभिमतास्तेषां सर्वेषां प्रवराः शुभाः ।
अङ्गिराश्चैव ताण्डिश्च मौद्गल्यश्च महातपाः ।।३८
परस्परमवैवाह्या ऋषयः परिकीर्तिताः ।
अपाण्डुश्च गुरुश्चैव तृतीयः शाकटायनः ।।३९
ततः प्रागाथमा नारी मार्कण्डो मरणः शिवः ।
कटुमर्कटपश्चैव तथा नाडायनाह्यृषिः ।।४०
श्यामायनस्तथैवैषां त्र्यार्षेयाः प्रवरा शुभाः ।

अङ्गिराश्चाजमीणश्च कटचश्चैव महातपाः ॥४१
परस्परमवैवाह्या ऋषयः परिकीर्तिताः ।
तित्तिरिः कपिभूश्चैव गार्ग्यश्चैव महानृषिः ॥४२

अङ्गिरा, मत्स्यदग्ध, मुद्गल, महातपा ये ऋषिगण आपस में अवैवाह्य कहे गये हैं । हंसजिह्व, देवजिह्व, अग्नि जिह्व, विराडप, अपाग्नेय, अश्वयु, परण्यास्ताविमद्गल ये उनके त्र्यर्षेय सबके परम शुभ प्रवर अभिमत हुए हैं । अङ्गिरा, ताण्डि, मौद्गल्य, महातपा ये सब ऋषिगण आपस में विवाह न करने के योग्य थे–ऐसे कहे गये हैं । अपाण्डु, गुरु, तृतीय शाकटायन, इसके उपरान्त प्रागाथमा नारी, मार्कण्ड, मरण, शिव, कटुमकटप, नाडायन, ऋषि, श्यामायन उसी प्रकार से त्र्यार्षेय इनके शुभ प्रवर थे । अङ्गिरा, आजमीढ़, कटच, महातपा ये सब परस्पर में ऋषिगण अवैवाह्य कहे गये हैं । तित्तिरि, कपिभू, गार्ग्य और महान् ऋषि ।।३६, ३७, ३८, ३९, ४०, ४१, ४२।।

त्र्यार्षयो हि मतस्ते सर्वेषां प्रवरः शुभः ।
अङ्गिरास्तित्तिरिश्चैव कविभूश्च महानृषिः ॥४३
परस्परमवैवाह्या ऋषयः परिकीर्तिताः ।
अथ ऋक्षभरद्वाजौ ऋषिवान् मानवस्तथा ॥४४
ऋषिर्मैत्रवरश्चैव पञ्चार्षेयाः प्रकीर्तिताः ।
अङ्गिराः सभरद्वाजस्तथैव च बृहस्पतिः ॥४५
ऋषिर्मित्रवरश्चैव ऋषिवान् मानवस्तथा ।
परस्परमवैवाह्या ऋषयः परिकीर्तिताः ॥४६
भारद्वाजो हुतःशौङ्गःशैशिरेयस्तथैव च ।
इत्येते कथिताः सर्वे द्व्यामुष्यायणगोत्रजाः ॥४७
पञ्चार्षेयास्तथा ह्येषां प्रवराः परिकीर्तिताः ।
अङ्गिराश्च भरद्वाजस्तथैव च वृहस्पति ॥
मौद्गल्यः शैशिरश्चैव प्रवराः परिकीर्तिताः ॥४८

एते तवोक्ताङ्गिरसस्तु वंशे महानुभावा ऋषिगोत्रकारा।
येषान्तु नाम्ना परिकीर्तितेन पापं समग्रं पुरुषा जहाति ॥४६

उन सबका त्र्यर्षेय शुभ प्रवर माना गया है। अङ्गिरा, तित्तिरि, कविभू, महानृषि, ये सब परस्पर में अवैवाह्य ऋषिगण कीर्त्तित किये गये हैं। इसके उपरान्त ऋक्ष, भरद्वाज, ऋषिवान्, मानव ऋषि और मैत्रवर ये पाँच आर्षेय कीर्त्तित किये गये हैं। अङ्गिरा, भरद्वाज वृहस्पति ऋषि, मित्रवर, ऋषिवान् मानव ये सब परस्पर में अवैवाह्य ऋषिगथ कहे गये हैं। भारद्वाज, हुत, शौङ्ग, शैशिरेय, ये सब द्व्यामुष्यायण गोत्र में समुत्पन्न कहे गए थे ॥४३, ४४, ४५, ४६, ४७। इन सबके पाँच आर्षेय प्रवर परिकीर्त्तित हुए हैं उनमें अंगिरा, भरद्वाज, वृहस्पति, मौद्गल्य, शैशिर ये प्रवर कहे गये हैं ॥४८॥ ये सब आङ्गिरस के वंश में महानुभाव गोत्रकार ऋषिगण आपको बतला दिये गये हैं। जिनके केवल नाम मात्र के ही कीर्त्तन करने से पुरुष अपना समग्र पाप को त्याग दिया करता है ॥४६॥

७७–अत्रिवंशज ऋषियों के नाम गोत्र वंश प्रवर वर्णन

अत्रिवंशसमुत्पन्नान् गोत्रकारान्निबोध मे।
कर्दमायनशाखेयास्तथा शारायणाश्च ये ॥१
उद्दालकिः शोणकर्णिरथौ शौक्तवश्च ये।
गौराग्रीवा गौरजिनस्तथा चैत्रायणाश्च ये ॥२
अर्द्धपण्या वामरथ्या गोपनास्तकिबिन्दवः।
कणजिह्वो हरप्रीतिर्नैद्राणिः शाकलायनिः ॥३
तैलपश्च सवैलेय अत्रिर्गोणीपतिस्तथा।
जलदो भगपादश्च सौपुष्पिश्च महातपाः ॥४

छन्दोगेयस्तथै तेषां ह्यार्षेयाः प्रवरा मताः ।
श्यावाश्च तथा त्रिश्चआर्चनानशएव च ।।५
परस्परमवैवाह्या ऋषयः परिकीर्तिताः ।
दाक्षिर्बलिः पर्णविश्च ऊर्णनाभिः शिलार्दनिः ।।६
वीजवापी शिरोषश्च मौञ्जकेशो गविष्ठिरः ।
भलन्दनस्तथै तेषां त्र्यार्षेयाः प्रवरा मताः ।।७

श्री मत्स्य भगवान् ने कहा--अत्रि के वंश में उत्पन्न होने वाले गोत्रकारों का ज्ञान मुझसे प्राप्त करलो जो कर्दमायन शाखेय तथा शारायण थे । उद्दालकि, शोण, कर्णिरथ और जो शौक्रतव थे । जो गौर ग्रीव, गौरजिन तथा चैत्र यण थे । अर्द्धपण्य, वामरथ्य, गोपन, तकिविन्दु, कणजिह्व, हरप्रीति, नैद्राणि, शाकलायनि, तैलय, सवैलेय, अत्रि, गोणीपति-जलद, भगपाद, सौ पुष्पि, महातपा और छन्दोगेय, इनके ह्यार्षेय प्रवर माने गये हैं । श्यावाश्व, त्रिश्व और आर्चनानश ये आपस में अवैवाह्य ऋषिगण कहे गये हैं । दक्षि, बलि, पर्णवि, ऊर्णनभि शिलार्दनि, वीजवापी शिरीष, मौञ्जकेश, गविष्ठिर और भलन्दन ये इनके प्रवर और त्र्यार्षेय माने गये हैं ।।१-७।।

अत्रिगविष्ठिरश्चैव तथा पूर्वातिथिः स्मृतः ।
परस्परमवैवाह्या ऋषयः परिकीर्तिताः ।।८
आत्रेयपुत्रिकापुत्रानत ऊर्ध्वं निबोध मे ।
कालेयाश्च सचालेया वासरथ्यास्तथैव च ।।९
धात्रेयाश्चैव मैत्रेयास्त्र्यार्षेयाः परिकीर्तिताः ।
अत्रिश्च वामरथ्यश्च पौत्रिश्चैवमहानृषिः ।।
परस्परमवैवाह्या ऋषयः परिकीर्तिताः ।।१०
इत्यत्रिवंशप्रभवास्तवाह्या महानुभावा नृपगोत्रकाराः
येषां तु नाम्ना परिकीर्त्तितेन पापं समग्रं पुरुषो जहाति ।।११

अत्रि, गविष्ठिर, पूर्वातिथि ये ऋषिगण परस्पर में अवैवाह्य परिकीत्तित किये गये हैं ।।८।। अव आत्रेय पुत्रिका के पुत्रों को भी मुझसे समझ लो । कालेय, सचालेय, वासरथ्य आत्रेय, मैत्रेय, यार्षेय कीर्त्तित किये गये हैं । अत्रि, वामरथ्य, पौत्रि, महान् ऋषि से सब ऋषिगण आपस में विवाह न करने के ही योग्य थे । ये सब अत्रि के वंश में उत्पन्न होने वाले नृपगोत्रकार महानुभाव हैं जो तुम्हारे सामने वर्णित कर दिये गए हैं । जिनके शुभ नामों के कीर्त्तन मात्र से ही पुरुष समग्र पाप का त्याग कर दिया करता है ॥८-११॥

८०–कुशिकवंशज ऋषियों के नाम गोत्र वंश प्रवर वर्णन

अत्रोरेवापरं वंशन्तव वक्ष्यामि पार्थिव ! ।
अत्रो सोमः सुतः श्रीमांस्तस्य वंशोद्भवान्नृप ।।१
विश्वामित्रस्तु तपसा ब्राह्मण्यं समवाप्तवान् ।
तस्य वंशमह् वक्ष्ये तन्मे निगदतः शृणु ॥२
विश्वामित्रो देवरातस्तथा वैकृतिगालवः ।
वतण्डश्च सलङ्कश्च ह्यभयश्चायतायनः ।।३
श्यामायना याज्ञवल्क्या जाबालाः सैन्धवायनाः ।
बाभ्रव्याश्व करीषाश्च संश्रुत्याः अथ संश्रुताः ॥४
उलूपा औपगह्चा पयोदजनपादपाः ।
खरवाचो हलयमाः साधिता वास्तुकौशिकाः ।।५
त्र्यार्षेयाः प्रवरास्तेषां सर्वेषां परिकीर्त्तिताः ।
विश्वामित्रो देवरात उद्दालश्च महायशाः ।।६
परस्परमवैवाह्या ऋषयः परिकीर्त्तिताः ।
देवश्रवाः सुजातेयाः सोसुकाः कारुकायनाः ।।७

तथा वैदेहराता ये कुशिकाश्च नराधिप ! ।
त्र्यार्येयोऽभिमतस्तेषां सर्वेषां प्रवरः शुभः ।।८

श्री मत्स्य भगवान् ने कहा—हे पार्थिव ! अब मैं अत्रि के दूसरे वंश का वर्णन करूंगा। हे नृप ! सोम अत्रिका सुत श्रीमान् सोम उसका वंशोद्भव था। विश्वामित्र ने तपश्चर्या के द्वारा ब्राह्मणत्व की प्राप्ति कर ली थी। मैं अब उसके वंश का भी वर्णन करूंगा। बतलाने वाले मुझसे उसका आप लोग श्रवण कर लेवें। विश्वामित्र—देवरात–वैकृतिगालव–वतण्ड—सलङ्क—अभय—आयतायन–श्यामायन—याज्ञवल्का—जावाल–सैन्धवायन—वाभ्रव्य—करीष—संश्रुत्य—सश्रुत—उलूप—ओपगहय—पयोद जन पादप—खरवाच—हलयम—साधित—वास्तु कौशिक—उन सबके त्र्यर्षेय प्रवर कीर्त्तित किए गए हैं। विश्वामित्र—देवरात—महायशा उद्दाल थे परस्पर में विवाह न करने के योग्य ही हैं—ऐसे ही ऋषिगण कहे गए हैं। देवश्रवा—सुजातेय—सौसुक—कारुकायन—तथा वैदेहर त—हे नराधिप ! जो कुशिक है इन सबका शुभ प्रवर त्र्यर्षेय अभिमत है ॥१-८॥

देवश्रवा देवरातो विश्वामित्रस्तथैव च ।
परस्परमवैवाह्या ऋषयः परिकीर्तिताः ।।९
धनञ्जयः कपर्देयः परिकूटश्च पार्थिव ! ।
पाणिनिश्चैव त्र्यार्षेयाः सर्व एते प्रकीर्तिताः ।।१०
विश्वामित्रस्तथाद्यश्च माधुच्छन्दस एव च ।
त्र्यार्षेयाः प्रवरा ह्येते ऋषयः परिकीर्त्तिताः ।।११
विश्वामित्रो मधुच्छन्दास्तथा चैवाघमर्षणः ।
परस्परमवैवाह्याऋषयः परिकीर्त्तिताः ।।१२
कमलायजिनश्चैव अश्मरथ्यस्तथैव च ।
वञ्चुलिश्चापि त्र्यार्षेयः सर्वेषां प्रवरो मतः ।।१३
विश्वामित्रश्चाश्वरथो वञ्जुलिश्च महातपाः ।

परस्परमवैवाह्या ऋषयःपरिकीर्तिताः ।।१४

देवश्रवा, देवरात्र तथा विश्वामित्र ये ऋषिगण परस्पर विवाह न करने के योग्य कहे गये हैं ।।६।। हे पार्थिव ! धनञ्जय, कपर्देय, परिकूट और पाणिनि ये सब त्र्यार्षेय कीर्त्तित किए गये हैं ।।१०।। विश्वामित्र तथा आद्य और माधुच्छन्दस ये त्र्यार्षेय प्रवर ऋषिवर्ग बताये गए हैं ।।११।। विश्वामित्र, मधुच्छन्द, अघमर्षण ये आपस में अवैवाह्य ऋषिगण कीर्त्तित हुए हैं ।।१२।। कमलायजनि, अश्मरथ्य, चञ्जुलि सबका त्र्यार्षेय प्रवर माना गया है । १३'। विश्वामित्र, अश्वरथ, महातपा वञ्जुलि ये परस्पर में अवैवाह्य ऋषिगण परिकीर्त्तित हुए हैं ।।१४।।

विश्वामित्रोलोहितश्च अष्टकः पूरणस्तथा ।
विश्वामित्रः पूरणश्च तयोर्द्वौप्रवरो स्मृतौ ।।१५
परस्परमवैवाह्याः पूरणाश्च परस्परम् ।
लोहिता अष्टकाश्चैषा त्र्यार्षेयाः परिकीर्तिताः ।।१६
विश्वामित्रो लोहितश्च अष्टकश्च महातपाः ।
अष्टका लोहितैर्नित्यमवैवाह्याः परस्परम् ।।१७
उदरेणः क्रथकश्च ऋषिश्चोदावहिस्तथा ।
शाटचायनिः करीराशी शालङ्कायनिलावकी ।।१८
मौञ्जायनिश्चभगवान्त्र्यार्षेयाःपरिकीर्तिताः ।
खिलिखिलीस्तथाविद्योविश्वामित्रस्तथैवच ।।
परस्परमवैवाह्या ऋषयः परिकीर्तिताः ।।१६।।
एते तवोक्ताः कुशिका नरेन्द्र ! महानुभावाःसततंद्विजेन्द्रा ।
येषान्तु नाम्ना परिकीर्तितेन पापं समग्रं पुरुषो जहाति ।।२०

विश्वामित्र और लौहित—अष्टक–पूरण–विश्वामित्र और पूरण इन दोनों के दो प्रवर कहे गए हैं । पूरण आपस में अवैवाह्य हैं । लोहित और अष्टक इनके त्र्यार्षेय बताये गए हैं ।।१५, १६।। विश्वामित्र, लोहित, महातपा अष्टक, ये अष्टक लोहितों के साथ आपस में अवैवाह्य हैं ।।१७।।

उदरेणु, ऋथक, ऋषि उदावहि,शाटचायनि, करीराशी,शालयङ्काय, निलावकि, मौञ्जायनि; भगवान् ये न्यार्षेय कीर्त्तित हुए हैं। खिलिखिलि, विद्य तथा विश्वामित्र ये परस्पर में ऋषिगण अवैवाह्य कहे गए हैं ।।१८,१९।। हे नरेन्द्र ! ये आपको द्विजेन्द्र महानुभाव सतत कुशिक सब बतला दिये गए हैं जिनके परम शुभ नामों के संकीर्त्तन मात्र से ही पुरुष अपने समस्त पापों को त्याग कर विशुद्ध हो जाया करता है ।।२०।।

* * *

८१—कश्यपवंशज-ऋषियों के नाम गोत्र वंश प्रवर वर्णन

मरीचेः कश्यपः पुत्रः कश्यपस्य तथा कुले ।
गोत्रकारान् ऋषीन् वक्ष्ये तेषां नामानि मे श्रृणु ।।१
आश्रायणि ऋषिगणो मेषकीरिटकायनाः ।
उदग्रजामाठराश्च भोजा विनयलक्षणाः ।।२
शालाहलेयाः कौरिष्टाः कन्यकाश्चासुरायणाः ।
मन्दाकिन्यां वै मृगयाः श्रुतया भोजयापनाः ।।३
देवयाना गोमयानह्यधश्छाया भयाश्च ये ।
कात्यायनाःशाक्रयाणाःर्वाह्र्योगगदायनाः ।।४
भवनन्दि महाचक्रि दाक्षपायन एव च ।
योधयानाः कातिवयो हस्तिदानास्तथैव च ।।५
वात्स्यायनानि कृतजा ह्याश्वलायनिनस्तथा ।
प्रागायणाः पौलमौलिराश्ववातायनस्तथा ।।६
कौवेरकाश्च श्याकारा अग्निशर्मायिणश्च ये ।
मेषपाः कैकरसपास्तथा चैव तु वभ्रवः ।।७

श्री मत्स्य भगवान् ने कहा—महामहर्षि मरीचि का कश्यप पुत्र हुआ था तथा कश्यप के कुल में जो गोत्रकार ऋषिगण हुए थे उनकी शुभ

नामावली अव आप मुझसे श्रवण करलो ।।१।। आश्रायणि ऋषिगण, मेष-कीरिटकायन, उदग्रजामाठर, भोज, विनय लक्षण, शालाहलेय, कौरिष्ट, कन्यक, आसुरायण, मन्दाकिनी में मृगय, श्रुतम, भोजयापन, देवयान, गोमयान, अधश्छय्या, भया, कात्यायन, शाक्रयाण, बर्हियोग गदायन, भवनन्दि, महाचक्रि, दाक्ष पायन, योधयान, कार्त्तिवय हस्तिदान, वात्स्यायनि कृतज, आश्वलायनि, प्रागायण, पौलमौलि, आश्व वातायन, कौवेरक, श्याकार, अग्निशर्मायण, मेषप, कंकरसप, तथा वभ्रव ।।२-७।।

प्राचेयो ज्ञानसंज्ञेया आग्ना प्रासेव्य एव च ।
श्यामोदरा वैवशपास्तथाचैवोद्वलायनाः ।।८
काष्ठाहारिणमारीचाआजिहायनहास्तिकाः ।
वैकर्णयाःकाश्यपेयाःसासिसाहारितायनाः ।।९
मान्तगिनश्च भृगवस्त्र्यार्षेयाः परिकीर्तिताः ।
वत्सरः कश्यपश्चेव निध्रवश्चमहातपाः ।।१०
परस्परमवैवाह्या ऋषयः परिकीर्तिताः ।
अतः पर प्रवक्ष्यामि द्व्यामुष्यायणगोजान् ।।११
अनसूयो नाकुरयः स्नातपो राजवर्तपः ।
शैशिरोदवहिश्चैव सैरन्ध्रीरोपसेवकिः ।।१२
या मुनिः काद्रुपिङ्गाक्षिः सजातम्बिस्थैव च ।
दिवावष्टाश्व इत्येते भक्त्या ज्ञेयाश्च काश्यपाः ।।१३
त्र्यार्षेयाश्च तथैवैषां सर्वेषां प्रवराः शुभाः ।
वत्सरः काश्यपश्चैव वसिष्ठश्चमहातपाः ।।१४

प्रचेय, ज्ञान संज्ञेय, अग्नि, प्रासेव्य, श्यामोदर, वैवशप, उद्वलायन, काष्ठाहारिण, मारीच, आजिहायन, हास्तिक, वैकर्णेय, काश्यपेय, सासिसाहारितायन, मान्तागिन, भृगुगण ये सब त्र्यार्षेय परिकीर्त्तित हुए हैं। अब यहां से आगे हम द्व्यामुष्यायण गोत्रजों के विषय में वर्णन करेंगे। अनसूय, नाकुरम, स्नातम्य, राज वर्त्तप शैशिरोदवहि, सैरन्ध्रीरोप सेवकि,

यामुनि, काद्रु पिङ्गाक्षि, सजातम्बि, दिवावष्टाश्व ये इतने भक्ति भाव से काश्यपों का ज्ञान प्राप्त करना चाहिए। इनके सबके त्र्यार्षेय शुभ प्रवर हैं। वत्सर, काश्यप, वसिष्ठ महातपा ।।८-१४।।

परस्परमवैवाह्या ऋषयः परिकीर्तिताः।
संयातिश्च नभश्चोभौ पिप्पल्योऽथ जलन्धरः ।।१५
भुजातपूरः पूर्यश्च कर्दमो गर्दभीमुखः।
हिरण्यबाहुकैरातावुभौ काश्यपगोभिलौ ।।१६
कुलहो वृषकण्डश्च मृगकेतुस्तथोत्तरः।
निदाघमसृणौ भत्स्या महान्तः केवलाश्च ये ।।१७
शाण्डिल्यो दानवश्चैव तथा व देवजातयः।
पैप्पलादिस्स प्रवरा ऋषयःपारकीर्तिताः ।।१८
त्र्यार्षेयाभिमताश्चैषां सर्वेषां प्रवराः शुभाः।
असितो देवलश्चैव कश्यपश्च महातपाः।।
परस्परमवैवाह्या ऋषयः परिकीर्तिताः ।।१९।।
ऋषिप्रधानस्य च कश्यपस्य दाक्षायणीभ्यः सकलंप्रसूतम्।
जगत्समग्रं मनुसिंह पुण्यं किं ते प्रवक्ष्याम्यहमन्तरेण।।२०

ये समस्त ऋषिगण परस्पर में अवैवाह्य बतलाये गये है। संयाति, नभ ये दोनों, पिप्पल्य, जलन्धर, भूजातपूर, पूर्व, कर्दम, गर्दभी मुख, हिरण्य वाहुक, काश्यप, गोभिल, कुलह, वृषकण्ड, मृगकेतु, उत्तर, निदाघ, मसृण, भत्स्य, महान्त, केवल, शाण्डिल्य, दानव, देवजाति, पैप्पलादिस ये सब ऋषिवृन्द प्रवर कहे गए हैं इन सबके शुभ प्रवर त्र्यार्षेय अभिमत हुए हैं। असित, देवल और महातपा कश्यप ये ऋषिगण परस्पर में अविवाह्य हैं—ऐसा कीर्तित किया गया है। समस्त ऋषियों में परम प्रधान कश्यप के दाक्षायणीयों से यह सम्पूर्ण प्रसूत हुआ है। यह सम्पूर्ण जगत् सिंह क तुल्य मनु का पुण्य रूप है। अब मैं इसके उपरान्त आपको क्या बतलाऊ ।।१५-२०।।

८२—वशिष्ठ वंशज ऋषियों के नाम गोत्र वंश प्रवर वर्णन

वसिष्ठवंशजान् विप्रान् निबोध वदतो मम ।
एकार्षेयस्तु प्रवरो वासिष्ठानां प्रकीर्तितः ॥१
वसिष्ठा एव वासिष्ठा अविवाह्या वसिष्ठजैः ।
व्याघ्रपादाऔपगवावैक्लवाः शाद्वलायनाः ॥२
कपिष्ठला औपलोमा अलब्धाश्चषठाः कठाः ।
गौपयानाबोधपाश्चदाकव्याह्यथवाह्यकाः ॥३
वालिशयाः पालिशयास्ततोवाग्ग्रन्थयश्चये ।
आपस्थूणाःशीतवृत्तास्तथाब्राह्मपुरेयकाः ॥४
लोमायनाः स्वस्तिकराः शाण्डिलिर्गौडिनिस्तथा ।
वाडोहलिश्च सुमनाश्चोपावृद्धिस्तथैव च ॥५
चौलिर्वौलिर्ब्रह्मबलः पौलिः श्रवस एव च ।
पौड़वो याज्ञवल्क्यश्च एकार्षेयामहर्षयः ॥६
वसिष्ठ एषां प्रवर अवैवाह्याः परस्परम् ।
शैलालयो महाकर्णः कौरव्यः क्रोधिनस्तथा ॥७

श्रीमत्स्य भगवान ने कहा—वसिष्ठ वश में समुत्पन्न विप्रों को बतलाते हुए मुझसे श्रवण करो। वासिष्ठों का एकार्षेय प्रवर प्रकीर्त्तित किया गया ह ॥१॥ वसिष्ठ ही वासिष्ठ हैं जो वसिष्ठ से समुत्पन्न होने वालों के साथ अविवाह्य हैं। व्याघ्रपाद, औपगव, वैक्लव, शाद्वलायन, कपिष्ठल औपलोम, अलब्ध, षठ, कठ, गौपयान, वोधप, दाकव्य, वाह्यक, वालिशय, पालिशय, वाग्ग्रन्थय, आपस्थूण, शीतवृत्त, ब्राह्म पुरेयक, लोमायन, स्वस्तिकर, शाण्डिलि, गौडिनि, वाडोहलि, सुमना, उपावृद्धः यौलि, वौलि, ब्रह्मबल, पौलि, श्रवस, पौड़व, याज्ञवल्का, ये सब एकार्षेय महर्षिगण हैं। इनका वसिष्ठ प्रवर है और परस्पर में अवैवाह्य हैं। शैलालय, महाकर्ण, कोड्य क्रोधिना ॥२-७॥

कपिञ्जलावालखिल्याभागवित्तायनाश्चये ।
कीलायनःकालशिखःकोरकृष्णासुरायणाः ।।८
शाकाहार्याः शाकधियः काण्वा उपलपाश्चये ।
शाकायनाउहाकाश्चअथमाषशरावयः ।।९
दाकायनावालवयोवाकयो गोरथास्तथा ।
लम्बायनाःश्यामवयो ये चकोडोदरायणाः ।।१०
प्रलम्बायनाश्च ऋषय औपमन्यव एव च ।
साङ्ख्यायनाश्चऋषयस्तथावै वेदशेरकाः ।।११
पालङ्कायन उद्गाहा ऋषयश्च बलेक्षवः ।
मातेया ब्रह्मबलिनः पर्णागारिस्तथैव च ।।१२
त्र्यार्षेयोऽभिमतश्चैषां सर्वेषां प्रवरस्तथा ।
भिगीवसुवशिष्ठश्च इन्द्रप्रमदिरेवच ।।१३
परस्परमवैवाह्या ऋषयः परिकीर्तिताः ।
औपस्थलास्वस्थलयो पालोहाला हलाश्च ये ।।१४

कपञ्जिल, बाल खिल्य, भाग वित्तायन, कीलायन, काल शिख, कोर कृष्ण, सुरायण, शाकाहार्य, शाकार्धी, काण्व, उपलप, शाकायन, उहाक, माषशरावय, दाकायन, बालवय, वाकय, गोरथ, लम्बायन, श्याम-वय कोडोदरायन, प्रलम्बायन ऋषिगण, औपमन्यव, साङ्ख्यायन ऋषि-वर्ग, वैदशेरक, पलङ्कायन, उद्गाह ऋषिगण, वलेक्षव, मातेय, ब्रह्मबलिन, पर्णागारि, इस सबके प्रवर त्र्यार्षेय अभिमत है। भिगोवसु, वशिष्ठ और इन्द्र प्रमदि ये ऋषिगण आपस में विवाह विधि नहीं करने के योग्य होते हैं—ऐसा ही कहा गया है। औपस्थल स्वस्थल ये—पालोहाल—हल ।।८-१४।।

माध्यन्दिनो मान्तयः पैप्पलादिर्विचक्षुषः ।
तैस्तृङ्गायन सैवल्काः कुण्डिनश्च नरोत्तम ! ।।१५
त्र्यार्षेयाभिमताश्चैषां सर्वेषां प्रवराः शुभाः ।

वसिष्ठमित्रावरुणौ कुण्डिनश्च महातपाः ॥१६
परस्परमवैवाह्या ऋषयः परिकीर्तिताः ।
शिवकर्णो वयश्चैव पादपश्च तथैव च ॥१७
त्र्यार्षेयोऽभिमतश्चैषां सर्वेषां प्रवरस्तथा ।
जातृकर्ण्योवसिष्ठश्च तथैवात्रिश्च पार्थिव ! ॥
पपस्परमवैवाह्या ऋषयः परिकीर्तिताः ॥१८
वसिष्ठवंशेऽभिहिता मयैते ऋषिप्रधानाः सततं द्विजेन्द्राः ।
येषां तु नाम्ना परिकीर्तितेन पापं समग्रं पुरुषो जहाति ॥१९

माध्यन्दिन, माक्षतप, पैप्पलादि, विचक्षुष, चैश्रृङ्गायन, सैवल्क, कुण्डिन हे नरोत्तम ! इन सब के परम शुभ प्रवर त्र्यार्षेय अभिमत हैं। वसिष्ठ, मित्रावरुण, महातपा, कुण्डिन ये ऋषि वृन्द परस्पर में अवैवाह्य हैं—ऐसा कीर्त्तित किया गया है। शिवकर्ण, वय, पादप, इन सबका त्र्यार्षेय प्रवर अभिमत है। हे पार्थिव ! जातृकर्ण्य वसिष्ठ तथा अत्रि ये ऋषि वृन्द आपस में विवाहन करने के योग्य ही कहे गये हैं। १५-१८॥ मैंने आपको वसिष्ठ के वंश में ऋषियों में प्रधान और निरन्तर द्विजेन्द्र आपको कह दिये गये हैं जिनके परम शुभ नामों के परिकीर्त्तन से पुरुष अपने सम्पूर्ण पापों का त्याग कर दिया करता है ॥१९॥

८३—ऋषियों के आख्यान में निमि का वर्णन

वसिष्ठस्तु महातेजानिमेः पूर्वपुरोहितः ।
बभूव पार्थिवश्रेष्ठ ! यज्ञास्तस्य समन्ततः ॥१
श्रान्तात्मापार्थिवश्रेष्ठ ! विशश्राम तदा गुरुः ।
तं गत्वा पार्थिवश्रेष्ठो निमिर्वचनमब्रवीत् ॥२
भगवन्यष्टुमिच्छामि तन्मां याजयमाचिरम् ।

तम्वाच महातेजा वसिष्ठःपार्थिवोत्तमम् ।।३
कञ्चित्कालं प्रतोक्षस्व तव यज्ञैः सुसत्तमैः ।
श्रान्तोऽस्मि राजन् ! विश्रम्य याजयिष्यामि ते नृपः।।४
एवमुक्तः प्रत्युवाच वसिष्ठं नृपसत्तम ! ।
पारलौकिककार्ये तु कः प्रतोक्षितुमुत्सहेत् ।।५
न च मे सौहृदं ब्रह्मन् ! कृतान्तेन बलीयसा ।
धर्मकार्ये त्वरा कार्या चलं यस्माद्धि जीवितम् ।।६
धर्मपथ्यौदनो जन्तुर्मृतोऽपि सुखमश्नुते ।
श्वः कार्य्यमद्य कुर्वीत पूर्वाह्णेचापराह्निकम् ।।७

श्री मत्स्य भगवान् ने कहा—महर्षि वसिष्ठ महान् तेजस्वी थे और निमि के पूर्व पुरोहित थे। हे पार्थिव श्रेष्ठ उसके चारों ओर यज्ञ थे उस समय में श्रान्त आत्मा गुरु में विश्राम किया था। उसके समीप में जाकर निमि ने यह वचन कहा था। हे भगवन् ! मैं देखना चाहता हूँ—मुझे शीघ्र यजन कराइये। महान् तेज वाले वसिष्ठ जी ने उस श्रेष्ठ राजा से कहा था—कुछ समय तक प्रतीक्षा करो। आपके परम श्रेष्ठ यज्ञों से हे राजन् ! मैं थक-सा गया हूँ मैं कुछ समय तक विश्राम करके ही याजन कराऊंगा ।।१-४।। इस प्रकार से जब कहा गया था उसने हे नृपश्रेष्ठ ! वसिष्ठ जी से कहा था कि पारलौकिक कार्य्य में कौन ममुष्य होगा जो प्रतीक्षा करने का उत्साह करेगा। हे ब्रह्मन् ! उस महान् बली यमराज से मेरी कोई मित्रता नहीं है। धर्म्म के कार्य्य में तो शीघ्रता करनी चाहिए क्योंकि यह मानव का जीवन तो चल और अस्थिर हुआ करता है ।।५, ६।। धर्म्म रूपी पथ्य ओदन वाला यह जन्तु मृत होकर भी सुख का आनन्दोपभोग किया करता है। जो कार्य्य अर्थात् धर्म्म सम्बन्धी कर्म्म कल करने का विचार हो उसे आज ही करना चाहिए और जो दोपहर के बाद करने का हो उसको दोपहर के पूर्व ही कर डाले—इसी प्रकार धार्म्मिक कृत्य को ही जितनी

शीघ्रता हो सके उतनी शीघ्रता से सम्पादित करने का सर्वदा विचार रखना मनुष्य का परम कर्त्तव्य है ॥७॥

न हि प्रतीक्षते मृत्युः कृतञ्चास्य न वा कृतम् ।
क्षेत्रापणगृहासक्तमन्यत्र गतमानसम् ॥८
वृकश्चोरणमासाद्य मृत्युरादाय गच्छति ।
नैकान्तेन प्रियः कश्चित्द्वेष्यश्चास्यन विद्यते ॥९
आयुष्ये कर्मणि क्षीणे प्रसह्य हरते जनम् ।
प्राणवायोश्चलत्वञ्च त्वया विदितमेव च ॥१०
यदत्र जीव्यते ब्रह्मन् ! क्षणमात्रन्तदद्भुतम् ।
शरीरं शाश्वतं मन्ये विद्याभ्यासे धनार्जने ॥११
अशाश्वतं धर्मकार्ये ऋणवानस्मि सङ्कटे ।
सोऽह संभृत सस्भारोभवन्मूलमुपागतः ॥१२
नचेद्याजयसे मा त्वं अन्यं यास्यामि याजकम् ।
एवमुक्तस्तदा तेन निमिना ब्राह्मणोत्तमः ॥१३
शशाप तं निमिं क्रोधाद्विदेहस्त्वं भविष्यसि ।
श्रान्तं मां त्वं समुत्सृज्य यस्मादन्यं द्विजोत्तमम् ॥१४

मृत्यु इसने कुछ किया है या अभी तक धर्म्म का कार्य नहीं किया है—इसकी बिल्कुल भी प्रतीक्षा नहीं किया करती है। वह तो एक वृक के ही समान चुप चाप समय पर आकर क्षेत्र–गृह–आपण आदि में समासक्त और दूसरे-दूसरे विषयों में मन लगाने वाले मनुष्य को लेकर चल दिया करता है। इसका न तो कोई प्यारा है और न किसी से इसका द्वेष ही है। यह तो कर्म में समासक्त जनको आपृण्य के क्षीण हो जाने पर बलात् पकड़ कर हरण कर लिया करता है। यह प्राण वायु चल है और इसकी चलता को आप भली भाँति से जानते ही हैं। हे ब्रह्मन् ! जो यहां पर जीवित रहा करता है उसका एक क्षणमात्र जीवित रहना भी एक अद्भुत आश्चर्य ही है। मैं तो विद्याभ्यास और धन के अर्जन में

ही इस शरीर को शाश्वत मानता हूँ। धर्म कार्य में मैं इसको अशाश्वत मानता हूँ। इस सङ्कट में ऋणवान् हूँ। वह मैं सम्भृत सम्भार वाला मूल को उपागत हुआ हो गया था। यदि आप मुझे याजन नही करायेंगे तो मैं किसी अन्य याजक के समीप में चला जाऊँगा। इस प्रकार से उस समय में उस निमि के द्वारा वह श्रेष्ठ ब्राह्मण जब कहा गया था तो उसने महान् क्रोध से उस निमि को शाप दे दिया था कि तू विदेह हो जायेगा क्योंकि परम श्रान्त मुझ को त्याग करके किसी अन्य द्विजोत्तम के समीप जाना चाहता है ।।८-१४।।

धर्मज्ञस्तु नरेन्द्र ! त्वं याजक कर्तुमिच्छसि ।
निमिस्तं प्रत्युवाचाथ धर्मकार्यरतस्य मे ।।१५
विघ्नङ्करोषि नान्येन याजनंच तथेच्छसि ।
शापंददासि यस्मात्वं विदेहोऽथभविष्यसि ।।१६
एवमुक्ते तु तौ जातौ विदेहौ द्विजपार्थिवौ ।
देहहीनौ तयोर्जीवौ ब्रह्माणमुपजग्मतुः ।।१७
तावागतौ समीक्ष्याथ ब्रह्मावचनमब्रवीत् ।
अद्यप्रभृति ते स्थानं निमिजीव ददाम्यहम् ।।१८
नेत्रपक्ष्मसु सर्वेषां त्वं वसिष्यसि पार्थिव ।
त्वत् सम्बन्धात्तथा तेषां निमेषः सम्भविष्यति ।।१९
चालयिष्यन्ति तु तदा नेत्रपक्ष्माणि मानवाः ।
एवमुक्ते मनुष्याणां नेत्रपक्ष्मसु सर्वशः ।।२०
जगाम निमिजोवस्तु वरदानात् स्वयम्भुवः ।
वसिष्ठ जीवं भगवान् ब्रह्मा वचनमब्रवीत् ।।२१

हे नरेन्द्र ! धर्म के ज्ञाता आप हैं और आप याजक करना चाहते हैं। इसके अनन्तर निमि ने उसको इसका उत्तर दिया था कि धर्म्म में रति रखने वाले मेरे कार्य में विघ्न करते हैं और अन्य के द्वारा कराये जाने वाले याजन को नहीं चाहते हैं। इसीलिए आप शाप दे रहे हैं कि

तू विदेह हो जायगा तो तू भी विदेह हो जायगा ! इस प्रकार से कहने पर वे दोनों ही द्विज और पार्थिव विदेह हो गये थे । उन दोनों के देह से हीन जीवात्मा ब्रह्माजी के समीप में पहुँचे थे । उन दोनों को समागत हुए देखकर ब्रह्माजी ने यह वचन कहा—आज से लेकर हे निमि के जीव ! तुझको मैं स्थान देता हूँ हे पार्थिव ! तुम सब के नेत्रों के पक्ष्म में निवास करोगे ।।१५-१६।। मनुष्य उस समय में नेत्रों के पक्ष्मों का चालन करेंगे । इस तरह से कहने पर सब ओर मनुष्यों के नेत्रों के पक्ष्मों पर वह निमि का जीव स्वयम्भू प्रभु के वरदान से चला गया था । फिर ब्रह्माजी ने **वसिष्ठ महर्षि** के जीव से यह वचन कहा था—।।२०, २१।।

मित्रावरुणयोः पुत्रो वसिष्ठ ! त्वं भविष्यसि ।
वसिष्ठेतिचते नाम तत्रापिचभविष्यति ।।२२
जन्मद्वयमतीतञ्च तत्रापि त्वं स्मरिष्यसि ।
एतस्मिन्नेव काले तु मित्रश्च वरुणस्तथा ।।२३
वदर्याश्रममासाद्य तपस्तेपतुरव्ययम् ।
तपस्यतोस्तयोरेवं कदाचिन्माधवे ऋतौ ।।२४
पुष्पितद्रुमसंस्थाने शुभे द्वयितमारुते।
उर्वशी तु वरारोहा कुर्वती कुसुमोच्चयम् ।।२५
सुसूक्ष्मरक्तवसना तयोर्दृष्टिपथङ्गता ।
तां दृष्ट्वा सुमुखीं सुभ्रूं नीलनीरजलोचनाम् ।।२६
उभौ चुक्षुभतुर्धैर्यात्तद्रूपपरिमोहितौ ।
तपस्यतोस्तयो वीर्यमस्खलच्च मृगासने ।।२७
स्कन्नं रेतस्ततो दृष्ट्वा शापभीतौ परस्परम् ।
चक्रतुः कलशे शुक्रं तोयपूर्णे मनोरमे ।।२८

हे वसिष्ठ ! तू मित्रावरुणों का पुत्र होगा । वहां पर भी 'वसिष्ठ'—यह तेरा नाम होगा ।।२२।। वहां पर भी तुझे बीते हुए दो जन्मों का स्मरण होगा । इसी समय में मित्र और वरुण वदर्याश्रम को

प्राप्त करके अव्यय तपस्या का संतपन करने लगे थे । उन दोनों के इस प्रकार से तपश्चर्य्या करने पर किसी समय माधव ऋतु मे परम शुभ और वहन करने वाली वायु से युक्त पुष्पित द्रुमों के संस्थान में फूलों के स्तवको उछालती हुई वरारोहवाती उर्वशी जो कि अत्यन्त बारीक और रक्तवर्ण के वस्त्र धारण कर रही थी तप करने वाले उन दोनों की दृष्टि में आ गई थी अर्थात् दोनों ने उर्वशी को देख लिया था । उस नीले कमलों के सदृश लोचनों वाली सुन्दर मुख से सम्पन्न सुभ्रू को देख कर उसके रूप लावण्य पर मोहित हुए वे दोनों ही धैर्यहीन होकर क्षोभ वाले हो गये थे । तपस्या करते हुए उन दोनों का वीर्य्य मृगासन पर स्खलित हो गया था । इसके उपरान्त जब उन्होंने अपने स्कन्न हुए वीर्य को देखा तो वे दोनों शाप से भयभीत हो गये थे और उन्होंने वहाँ पर स्थित जल से भरे हुए मनोहर कलश में उस वीर्य्य का डाल दिया था ।। २३, २४, २५ २६, २७, २८ ।।

तस्मादृषिवरौ जातौ तेजसा प्रतिमौ भुवि ।
वसिष्ठश्चाप्यगस्त्यश्चमित्रावरुणयोर्द्वयोः ॥२६
वसिष्ठस्तूपयेमेऽथ भागिनीं नारदस्य तु ।
अरुन्धतीं वरारोहां तस्यां शक्तिमजीजनत् ॥३०
शक्तेः पराशरः पुत्रस्तस्य वंश निबोध मे ।
यस्य द्वैपायनः पुत्रः स्वय विष्णुरजायत ॥३१
प्रकाशो जनितो येन लोके भारत चन्द्रमाः ।
पराशरस्य तस्य त्वं श्रृणु वंशमनुत्तमम् ॥३२
काण्डषपो वाहनपो जैह्मपो भौमतापनः ।
गोपालिरेषां पञ्चम एते गौराः पराशराः ॥३३
प्रपोहयावाह्य मयाः ख्याते याः कौतुजातयः ।
हर्यंश्विः पञ्चमो ह्येषां नीलाज्ञेयाः पराशराः ॥३४
कार्ष्णायनाः कपि सुखाः काकेयस्थाजपातयः ।

पुष्करः पञ्चमश्चैषां कृष्णाज्ञेयाःपराशराः ।।३५

उसी वीर्य से भूमण्डल में तेज से समन्वित उन दोनों मित्रावरणों के दो ऋृषियों में परम श्रेष्ठ समुत्पन्न हुए थे। उनमें एक का नाम वसिष्ठ था और दूसरे का नाम अगस्त्य था ।। २९ ।। वसिष्ठ ने नारद की भगिनी के साथ विवाह किया था जिस बरारोहा का नाम अरुन्धती था। उस अरुन्धती में उसने शक्ति को समुत्पन्न किया था। शक्ति का पुत्र पराशर हुआ था। अब उसका जो भी वश हुआ उसे मुझसे समझ लो। जिस पराशर का स्वयं विष्णु द्वैपायन पुत्र उत्पन्न हुआ था ।। ३०, ३१ ।। वह ऐसा था जिसने लोक में भारत चन्द्रमा प्रकाश को प्रसूत किया था। उस पराशर मुनि का जो उत्तम वंश था उसे तुम श्रवण करलो ।।३२।। काण्डषप—वाहनप—जैह्मप—भौम तापन और इनमें पाँचवां गोपालि था। ये गौर पाराशर थे ।। ३३ ।। प्रय–हयावाह्य-मय और ख्यात में जो कौतुक जातियाँ हैं तथा पञ्चम हर्यशिव में नीलाज्ञेय पराशर हैं ।। ३४ ।। कार्ष्णायन—कपिसुख—काकेयस्थ—जपाति और इनमें पाँचवां पुष्कर ये सब कृष्णा ज्ञेय पाराशर हैं ।। ३५ ।।

आविष्टायन वालेयास्वायष्टाश्चोपयाश्च ये ।
इषीकहस्ताश्चंते वै पञ्चश्वेताःपराशराः ॥३६
पाटिको वादरिश्चैवस्तम्बा वै क्रोधनायनाः ।
क्षैमिरेषां पञ्चमस्तु एते श्यामाः पराशराः ।।३७
खल्यायनाः वार्ष्णायनास्तैलेयः खलु यूथपाः ।
तन्तिरेषां पञ्चमस्तु एते धूम्राःपराशराः ॥३८
उक्तास्त्वेते नृप ! वंशमुख्याः पराशराः सूर्यसमप्रभावाः ।
येषां तु नाम्ना परिकीर्तितेन पापं समग्रं पुरुषो जहाति ।। ३९

आविष्टायन–वालेय–स्वायष्ट–उपय–इषीक हस्त ये पाँच श्वेत पराशर थे ।। ३६ ।। पाटिक—बादरि—स्तम्ब क्रोधानायन और इनका पाँचवां क्षैमि ये श्याम पराशर हुए थे। खल्यायन—वाष्र्यायिन—तैलेय–

यूथप और इनमें पञ्चम तन्ति ये सब धूम्र पराशर हैं। हे नृप! ये सूर्य के समान प्रभाव वाले वंश में प्रमुख पराशर सब आपके समक्ष में वर्णित कर दिये गये हैं जिनके शुभ नामों के ही कीर्तन करने से मनुष्य अपने समस्त पापों से छुटकारा पाकर परम विशुद्ध हो जाया करता है ॥ ३७, ३८। ३६॥

८४—ऋषियों के नाम गोत्र वंश प्रवर वर्णन

अतः परमगस्त्यस्य वक्ष्येवंशोद्भवान्द्विजान् ।
अगस्त्यश्चकरम्भश्चकौशल्यःकरटस्तथा ॥१
सुमेधसोमयोभुवस्तथा गान्धारकायणाः ।
पौलस्त्याः पौलहाश्चैवक्रतुवंशभवास्तथा ॥२
आर्षेयाभिमताश्चैषां सर्वेषां प्रवराः शुभाः ।
अगस्त्यश्च महेन्द्रश्च ऋषिश्चैव मयोभुवः ॥३
परस्परमवैवाह्या ऋषयः परिकीर्तिताः ।
पौर्णमासाः पारणाश्च आर्षेयाः परिकीर्तिताः ॥४
अगस्त्यः पौर्णमासश्च पारणश्च महातपाः ।
परस्परमवैवाह्याः पौर्णमासास्तु पारणः ॥५
एवमुक्तो ऋषोणान्तु वश उत्तमपौरुषः ।
अतः परं प्रवक्ष्यामि किम्भवानद्य कथ्यताम् ॥६
पुलहस्य पुलस्त्यस्य क्रतोश्चैवमहात्मनः ।
अगस्त्यस्य तथा चैवकथं वंशस्तदुच्यताम् ॥७

श्री मत्स्य भगवान् ने कहा—अब इससे आगे मैं अगस्त्य मुनि के वंश में समुत्पन्न द्विजों का वर्णन करता हूँ—अगस्त्य—करम्भ—कौशल्य—करट—सुमेधस—मयोभुव—गान्धारकायण—पौलस्त्य—पौलह—ऋतुवंश भव—

इन सबके शुभ प्रवर आर्षेय अभिमत हैं। अगस्त्य–महेन्द्र और भयोभुव ऋषि ये समस्त ऋषिगण परस्पर में अवैवाह्य हैं ऐसा परिकीर्त्तित किया गया है। पौर्णमास और पारण आर्षेय कीर्त्तित किये गये हैं। अगस्त्य–पौर्णमास तथा महान् तपस्वी पारण—ये आपस में विवाह करने के योग्य नहीं थे और पौर्णमास पारणों के साथ विवाह्य नहीं था। इस प्रकार से ऋषियों का उत्तम पौरुष वाला वंश मैंने कह दिया है। इससे आगे आज क्या कहूँ ? आप ही यह मुझे बतलाइये। महर्षि मनु ने कहा—पुलह – पुलस्त्य—क्रतु जो महान् आत्मा वाला था तथा अगस्त्य का वंश कैसे हुआ—यही अब बतलाइये ।। १–७ ।।

क्रतुः खल्वनपत्योऽभूद्राजन्वैवस्वतेऽन्तरे ।
इध्मवाहं स पुत्रत्वे जग्राह ऋषिसत्तमः ।।८
अगस्त्यपुत्रं धर्मज्ञं आगस्त्याः क्रतवस्ततः ।
पुलहस्य तथा पुत्रास्त्रयश्च पृथिवीपते !।।९
तेषान्तु जन्म वक्ष्यामि उत्तरत्र यथाविधि ।
पुलहस्तु प्रजांदृष्ट्वानातिप्रीतमनाः स्वकाम् ।।१०
अगस्त्यजंदृढास्यन्तुपुत्रत्वेवृतवांस्ततः ।
पौलाहाश्चतथाराजन् ! आगस्त्याःपरिकीर्तिताः ।।११
पुलस्त्यान्वयसम्भूतान् दृष्टवारक्षः समुद्भवान् ।
अगस्त्यस्यसुतन्धीमान् पुत्रत्वेवृतवांस्ततः ।।१२
पौलस्त्याश्च तथा राजन्नागस्त्याः परिकीर्तिताः ।
सगोत्रत्वादिमे सर्वेपरस्परमनन्वयाः ।।१३
एते तवोक्ताः प्रवरा द्विजानां महानुभावानृपवंशकाराः ।
एषान्तु नाम्ना परिकीर्तितेन पापं समग्रं पुरुषो जहाति ।।१४

श्री मत्स्य भगवान् ने कहा—हे राजन् ! वैवस्वत मन्वन्तर में क्रतु बिना सन्तान वाला हुआ था। उस श्रेष्ठ ऋषि ने इध्मवाह को पुत्रत्व के रूप में ग्रहण किया था ।। ८ ।। वह धर्म का ज्ञाता अगस्त्य का

पुत्र था। इसके पश्चात् ऋतुगण्य आगस्त्य कहे गये थे। हे पृथिवी पते! पुलह के तीन पुत्र थे। अब मैं उत्तर में यथाविधि उनके जन्म के विषय में वर्णन करूँगा। पुलह ने अपनी प्रजा को देखा था तो वह—अत्यन्त प्रीति युक्त मन वाला नहीं था। इसके उपरान्त उसने दृढास्य अगस्त्य से समुत्पन्न को पुत्रत्व के रूप में वरण कर लिया था। हे राजन्! उसी प्रकार से पौलह आगस्त्य परिकीर्त्तित हुए थे। पुलस्त्य के अन्वय में समुद्गलों को राक्षसों से समुद्भव वाले देख कर धीमान् ने अगस्त्य के सुत को ही पुत्रत्व में वृत कर लिया था। ॥९॥१०॥११॥१२॥ तथा हे राजन्! वे पौलस्त्य आगस्त्य कीर्तित हुये। सगोत्र होने से ये सब परस्पर में अन्वय वाले नहीं थे। ये सब ऋषों के वंशकर महानुभाव द्विजों में प्रवर थे? इनका वर्णन आपको सुना दिया है! इनके नामों के कीर्त्तन से मनुष्य अपने सम्पूर्ण पापों को त्याग देता है ॥१३।१४।

* * *

८५—मनुमत्स्य संवादे धर्म वंश वर्णन

अस्मिन्वैवस्वते प्राप्ते श्रृणु धर्मस्य पार्थिव !।
दाक्षायणीभ्यः सकलं वंशं दैवतमुत्तमम् ॥१
पर्वतादिमहादुर्गशरीराणि नराधिप !।
अरुन्धत्याः प्रसूतानि धर्माद्वैवस्वतेऽन्तरे ॥२
अष्टौ च वसवः पुत्राः सोमपाश्चविभोस्तथा।
धरोध्रुवश्चसामश्चआपश्चैवानिलानलौ ॥३
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्तिता।
धरस्य पुत्रो द्रविणः कालःपुत्रोध्रुवस्यतु ॥४
कालस्यावयवानान्तु शरीराणि नराधिप !।
मूतिमन्ति च कालाद्धि संप्रसूतान्यशेषतः ॥५

सोमस्य भगवान् वर्चाः श्रीमांश्चापस्य कीर्त्यते ।
अनेकजन्मजननः कुमारस्त्वनलस्यतु ।।६
पुरोजवाश्चानिलस्य प्रत्यूषस्य तु देवलः ।
विश्वकर्मा प्रभासस्य त्रिदशानां स वर्धकिः ।।७

श्री मत्स्य भगवान् ने कहा—हे पार्थिव ! इस वैवस्वत अन्तर के प्राप्त होने पर दाक्षायणियों से सम्पूर्ण उत्तम अस्मि दैवत वंश का श्रवण कीजिएगा ।। १ ।। हे नराधिप । इस वैवस्वत अन्तर में धर्म्म से अरुन्धती से पर्वत आदि महा दुर्ग शरीर प्रसूत हुए थे ।। २ ।। आठ वसुगण पुत्र–विभु के सोमप–धर–ध्रुव–सोम–आप–अनिल–अनल–प्रत्यूष प्रभास ये सब अष्ट वसुगण कीर्तित किये गये हैं । धर का पुत्र द्रविण हुआ और काल ध्रुव का पुत्र हुआ था । हे नराधिप ! काल के अवयवों के शरीर मूर्तिमान् सम्पूर्ण काल से ही सम्प्रसूत हुए थे ।। ३, ४ ५ ।। सोम का सुत भगवान् वर्चा था और जल का पुत्र श्रीमान् हुआ था—ऐसा कहा जाता है। अनल का पुत्र अनेक जन्म जनन कुमार था । अनिल का आत्मज पुरोजवा तथा प्रत्यूष का पुत्र देवल प्रसूत हुआ था । प्रभास का पुत्र विश्वकर्मा था तथा त्रिदशों का वह वर्धकि था ।।६, ७ ।।

समीहितकराः प्रोक्ता नागवीथ्याद्यो नव ।
लम्बापुत्रःस्मृतोघोषोभानोःपुत्राश्चभानवः ।।८
ग्रहर्क्षाणाञ्च सर्वेषामन्येषां चामितौजसाम् ।
मरुत्वत्यां मरुत्वन्तःसर्वेपुत्राः प्रकीर्तिताः ।।९
सङ्कल्पायाश्चसङ्कल्पस्तथापुत्रःप्रकीर्तितः ।
मुहूर्ताश्चमुहूर्तायाः साध्याः साध्यासुताः स्मृताः ।।१०
मनोर्मनुश्च प्राणश्च नरोषानौ च वीर्यवान् ।
चित्तहार्योऽयनश्चैवहंसोनारायणस्तथा ।।११
विभुश्चापिप्रभुश्चैवसाध्याद्वादशकीर्तिताः ।
विश्वायाश्चतथापुत्राविश्वेदेवाः प्रकीर्तिता ।।१२

क्रतुर्दक्षोवसुः सत्यः कालकामोमुनिस्तथा ।
कुरजोमनुजोबीजोरोचमानश्च ते दश ।। १३
एतावदुक्तस्तव धर्मवंशः संक्षेपतः पार्थिववंशमुख्य ! ।
व्यासेन वक्तुं न हि शक्यमस्ति राजन् विना वर्षशतैरनेकैः।।१४

सभी हितकरों वाले नागवीथी आदि नौ बताये गये हैं। लम्बा का पुत्र घोष कहा गया है और भानु के पुत्र भानुगण हैं ।। ८ ।। अन्य अमित ओज वाले ग्रह और नक्षत्रों के सबके मरुत्वती में मरुत्वन्त सब पुत्र प्रकीर्त्तित हुए हैं ।। ९ ।। सङ्कल्पा का पुत्र सङ्कल्प कहा गया है। मुहूर्त्ता के पुत्र मुहूर्त्त और साध्य साध्या के सुत उत्पन्न हुए थे ऐसा कहा गया है। मनु से मनु और प्राण—नर—उपान—वीर्यवान्—हार्य्य—अयन—हंस—नारायण—विभु और प्रभु ये द्वादश साध्य कहे गये हैं। विश्वा के जो पुत्र थे वे विश्वेदेवा कीर्त्तित हुए थे। क्रतु-दक्ष—वसु—सत्य--काल काम--मुनि--कुरज--मनुज--बीज--रोचमान ये दश थे। हे पार्थिवों के वंश में प्रधान ! हमने यह धर्म्म का वंश संक्षेप से आपके समक्ष में बतला दिया है। हे राजन् ! यह अनेकों सैकड़ों वर्षों के बिना भगवान् व्यासदेव के द्वारा भी बतलाया नहीं जा सकता है ।। १०, ११, १२, १३, १४ ।।

८९—पतिव्रतामाहात्म्य में सावित्री उपाख्यान

ततः स राजा देवेशं पप्रच्छामितविक्रमः ।
पतिव्रतानां माहात्म्यं तत्सम्बन्धांकथामपि ।।१
पतिव्रतानां का श्रेष्ठा कयामृत्युः पराजितः ।
नामसङ्कीर्तनं कस्याः कीर्तनीयंसदा नरः ।।
सर्वपापक्षयकरमिदानीं कथयस्व मे ।।२।।
वैलोम्यं धर्मराजोऽपिनाचरत्यथयाषिताम् ।

पतिव्रतानांधर्मज्ञ ! पूज्यास्तस्यापि ताःसदा ।।३
अत्र ते वर्णयिष्यामि कथां पापप्रणाशिनीम् ।
यथा विमोक्षितो भर्त्ता मृत्युपाशाद्यतः स्त्रिया ।।४
मद्रेषु शाकलो राजा बभूवाश्वपतिः पुरा ।
अपुत्रस्तप्यमानोऽसौ पुत्रार्थी सर्वकामदाम् ।।५
आराधयति सावित्रींलक्षितोऽसौद्विजोत्तमैः ।
!सिद्धार्थकैर्हूयमानांसावित्रींप्रत्यहंद्विजैः ।।६
शतसंख्यैश्चतुर्थ्यान्तु दशमासागते दिने ।
काले तु दर्शयामास म्वान्तनुं मनुजेश्वरम् ।।७

महर्षि प्रवर सूतजी ने कहा—इसके उपरान्त में अपरिमित बल-विक्रम वाले उस राजा ने देवेश से पूछा था कि पतिव्रता नारी का क्या कैसा माहात्म्य है और इससे सम्बन्धित यदि कोई उपाख्यान हो तो उसके लिये भी पूछ लिया था। मनुदेव ने कहा था—हे भगवन् ! पतिव्रता नारियों में कौन सी नारी श्रेष्ठ है और किसने अपने पातिव्रत बल के द्वारा मृत्यु को भी पराजित कर दिया था। मनुष्यों को किसके परम शुभ नाम का कीर्त्तन सदा करना चाहिए ? हे भगवन् ! यह समस्त पापों के क्षय को करने वाला है। अब इसी को आप बतलाइये ।।१, २।। श्री मत्स्य भगवान् ने कहा—धर्मराज भी योषितों के वैलोम्य का आचरण नहीं किया करता है ; हे पतिव्रताओं के धर्म्म के ज्ञाता ! उसकी भी सदा वे पूज्या ही हुई हैं ।। ३ ।। यहाँ पर मैं आपको एक पापों के प्रणाश कर देने वाली कथा का वर्णन करता हूँ कि जिस प्रकार से एक परम श्रेष्ठ पतिव्रता नारी के द्वारा अपना स्वामी मृत्यु के भी पाश से विमुक्त कर लिया गया था ।। ४ ।। पुरातन काल में मद्र देशों में एक शाकल राजा अश्वपति हुआ था। वह पुत्रहीन था तथा पुत्र के प्राप्ति को अभिलाषा रखने वाले उसने सर्व कामदा देवी को प्रसन्न करने के लिए तपश्चर्य्या की थी ।। ५ ।। द्विजोत्तमों के द्वारा लक्षित होते हुए उसने

सावित्री देवी की समाराधना की थी । सिद्धार्थक द्विजों के द्वारा प्रतिदिन वह सावित्री देवी हूयमान हुई थी ।। ६ ।। वे द्विज शत संख्या वाले थे और जब दश मास व्यतीत हो गये तो चतुर्थी के दिन में समय आने पर उस मनुजेश्वर को सावित्री ने प्रत्यक्ष होकर अपना साक्षात् दर्शन दिया था ।। ७ ।।

राजन् ! भक्तोऽसि मे नित्यं दास्यामि त्वां सुतां सदा ।
तां दत्तां मत्प्रसादेन पुत्रीं प्राप्स्यसि शोभनाम् ॥८
एतावदुक्त्वा सा राज्ञः प्रणतस्यैव पार्थिव ! ।
जगामादर्शनं देवी यथा वै नृप ! चञ्चला ॥९
मालती नाम तस्यासीद्राज्ञः पत्नी पतिव्रता ।
सुषुवे तनयां काले सावित्रीमिव रूपतः ॥१०
सावित्र्याहूतया दत्ता तद्रूपसदृशी तथा ।
सावित्री च भवत्वेषा जगाद नृपतिर्द्विजान् ॥११
कालेन यौवनं प्राप्ता ददौ सत्यवते पिता ।
नारदस्तु ततः प्राह राजानं दीप्ततेजसम् ॥१२
संवत्सरेण क्षीणायुर्भविष्यति नृपात्मजः ।
सकृत्कन्याःप्रदीयन्तेचिन्तयित्वानराधिपः ॥१३
तथापि प्रददौ कन्यां द्युमत्सेनात्मजे शुभे ।
सावित्र्यपि च भर्तारमासाद्य नृपमन्दिरे ॥१४

सावित्री ने कहा—राजन् ! आप मेरे नित्य ही परम भक्ति करने वाले हैं । मैं भी अति प्रसन्न होकर तुमको एक सुता दूँगी । मेरे प्रसाद से दी हुई परम शोभन उस पुत्री को आप प्राप्त कर लेंगे ।। ८ ।। हे पार्थिव ! बस केवल इतना ही कहकर वह देवी प्रणाम करते हुए राजा के सामने से अदर्शन को प्राप्त हो गई थी जैसे विद्युत छिप जाया करती है ।। ९ ।। उस राजा की एक मालती नाम वाली पतिव्रता पत्नी थी उसने समय के सम्प्राप्त होने पर रूप लावण्य से साक्षात् सावित्री

देवी के सदृश तनया को प्रसूत किया था ।।१०।। समाहुत हुई सावित्री ने उसके ही रूप के समान उसे प्रदान किया था । राजा ने द्विजों से कहा था कि यह नाम से सावित्री ही होवे ।।११।। समय आने पर वह यौवन को प्राप्त हो गई थी और उसके पिता ने सत्यवान नाम वाले वर को उसका दान कर दिया था । इसके उपरान्त देवर्षि नारदजी ने दीप्त तेज वाले राजा से कहा था कि यह नृप का आत्मज एक ही वष में क्षीण आयु वाला हो जायगा । नराधिप ! भली भाँति विचार करके ही कन्या को एक ही वार प्रदान किया जाया करता है ।। १२ । १३ ।। तो भी उस राजा ने द्युमत्सेन के पुत्र को जो शुभ था अपनी कन्या सावित्री का दान कर दिया था । उस सावित्री ने भी नृप को मन्दिर में अपने स्वामी को प्राप्त कर लिया था ।। १४ ।।

नारदस्य तु वाक्येन दूयमानेन चेतसा ।
शुश्रूषां परमां चक्रे भर्तृश्वशुरयोर्वने ॥१५
राज्याद् भ्रष्टः सभार्यस्तु नष्टचक्षुर्नराधिपः ।
न तुतोष समासाद्य राजपुत्रीं तथा स्नुषाम् ।।१६
चतुर्थेऽहनि मर्तव्य तथा सत्यवता द्विजाः ! ।
श्वशुरेणाभ्यनुज्ञाता तदा राजसुतापि सा ।।१७
चक्रे त्रिरात्रं धर्मज्ञा प्राप्ते तस्मिंस्तदा दिने ।
चारुपुष्पफलाहारः सत्यवांसु ययौवनम् ।।१८
श्वशुरेणाभ्यनुज्ञाता याचनाभङ्गभीरुणा ।
सावित्र्यपि जगामार्ता सह भर्त्रा महद्वनम् ॥१९
चेतसा दूयमानेन गूहमाना महद्भयम् ।
वने पप्रच्छ भर्तारं द्रुमांश्चासदृशांस्तथा ।।२०
आश्वासयामास सराजपुत्रीं क्लान्तांवनेपद्मविशालनेत्राम् ।
सन्दर्शनेनाथ द्रुमद्विजानान्तथा मृगाणां विपिने नृवीरः ।।२१

श्री नारदजी के वाक्य से दूयमान हृदय से उस सावित्री ने बन

में अपने स्वामी और श्वशुर की अत्यधिक शुश्रूषा करती थी ।। १५ ।। राज्य से भ्रष्ट–चक्षुओं के नष्ट हो जाने वाले भार्या से संयुत नराधिप उस राजपुत्री स्नुषा को प्राप्त करके सन्तुष्ट नहीं हुए थे ।। १६ ।। हे द्विजगण ! सत्यवान को आज से चौथे दिन में मरना है। उस समय में उस राजसुता को श्वशुर ने अभ्यनुज्ञात किया था अर्थात् आज्ञा थी। उस समय में उस दिन के आने पर धर्म की ज्ञाता त्रिरात्र (व्रत) किया था। चारु पुष्प और फलों के आहार करने वाले सत्यवान् वन में चले गये थे। याचना के भङ्ग से भयभीत श्वशुर के द्वारा आज्ञा प्राप्त करने वाली वह सावित्री भी अपने स्वामी के साथ हो उस महान् वन को चली गयी थी। बहुत ही दुःखित चित्त से उस महान् भय को अन्दर ही छिपाती हुई उसने वन में भर्त्ता से और अस्पष्ट द्रुमों से पूछा था। वन में उसने परम क्लान्त–पद्म के समान विशाल नेत्रों वाली उस राजपुत्री को नृवीर ने विपिन में मृगों तथा द्रुमों और द्विजों (पक्षियों) के सन्दर्शन के द्वारा समाश्वासन दिया था ।। १७ । १८ । १९ । २० । २१ ।।

८७–सावित्री उपाख्यान (१)

वनेऽस्मिन् शाद्वलाकीर्णे सहकारं मनोहरम् ।
नेत्रघ्राणसुखं पश्य वसन्तं रतिवर्धन ॥१
वनेऽप्यशोकं दृष्टवैनं रागवन्तं सुपुष्पितम् ।
वसन्ती हसतीवाग्रं ममेवायतलोचने ! ।।२
दक्षिणे दक्षिणनेतां पश्च रम्यां वनस्थलीम् ।
पुष्पितैः किंशुकैर्युक्तांज्वलितानलसप्रभैः ।।३
सुगन्धिकुसुमामोदो वनराजिविनिर्गतः ।
करोति वायुर्दाक्षिण्यमावयोःक्लमनाशनम् ।।४

पश्चिमेन विशालाक्षि ! कणिकारैः सुपुष्पितैः ।
काञ्चनेन विभात्येषा वनराजीमनोरमा ।।५
अतिमुक्तलताजालरुद्धमार्गा वनस्थली ।
रम्या सा चारुसर्वाङ्गी कुसुमोत्करभूषण ।।६
मधुमत्तालिझङ्कारव्याजेन वरवर्णिनी ।
चापाकृष्टिं करोतीव कामः पार्श्वे जिघांसया ।।७

सत्यवान् ने कहा—इस वन में जो शाद्वल से एकदम समाकीर्ण है मनोहर सहकार को तथा नेत्रों एव घ्राण को सुखकर–रति के वर्धन करने वाले वसन्त को देखो ।। १ ।। हे आयत लोचनों वाली ! यह वसन्त इस वन में राग से सुसम्पन्न और सुन्दर पुष्पों से समन्वित अशोक को देखकर मानों मेरा उपहास कर रहा है ।। २ ।। दक्षिण में दाहिनी ओर जलती हुई अग्नि की प्रभा के सदृश प्रभा वाले पुष्पित किंशुकों (ढाक के वृक्षों) से युक्त–परम रम्य इस वनस्थली को देखो ।। ३ ।। वन की पंक्ति से निकला हुआ सुगन्धित कुसुमों के आमोद (गन्ध) से युक्त यह वायु हम दोनों के क्लम के नाश करने वाले दाक्षिण्य को कर रहा है । ।। ४ ।। हे विशालाक्षि ! पश्चिम दिशा में यह परम मनोरम वनों की राजि सुन्दर पुष्पों वाले कणिकारों से काञ्चन के वण के तुल्य शोभित हो रही है ।। ५ ।। अतिमुक्त लताओं के जाल अवरुद्ध मार्गों वाली यह वनस्थली चारु (सुन्दर) सम्पूर्ण अङ्गों वाली तथा कुसुमों के उत्करों के भूषणों वाली वहरम्य ललना के तुल्य शोभा दे रही है ।। ६ ।। यह वरवर्णिनी के समान ही है और पार्श्व में कामदेव मारने की इच्छा से चाप का आकर्षण मानों कर रहा है ।।७।

फलास्वादलसद्वक्त्रपुंस्कोकिलविनादिता ।
विभाति चारुतिलका त्वमिवैषा वनस्थली ।।८
कोकिलश्चूतशिखरे मञ्जरीरेणुपिञ्जरः ।
गदितैर्व्यक्ततां याति कुलीनश्चेष्टितैरिव ।।९

पुष्परेणुविलिप्ताङ्गीं प्रियामनु सरिद्वने ।
कुसुमं कुसुमं याति कूजन् कामी शिलीमुखः ॥१०
मञ्जरी सहकारस्य कान्तावच्चाग्रपीडिताम् ।
स्वदते बहुपुष्पेऽपि पुंस्कोकिलयुवा वने ॥११

काकः प्रसूता वृक्षाग्रे स्वामेकाग्रेण चञ्चुना ।
काकीं सम्भावयत्येष पक्षाच्छादितपुत्रिकाम् ॥१२
शुभाङ्गनिम्नमासाद्य दयितासहितो युवा ।
नाहारमपि चादत्ते कामाक्रान्तः कपिञ्जलः ॥१३

कलविङ्कस्तु रमयन् प्रियोत्सङ्गं समास्थितः ।
मुहुर्मुहुर्विशालाक्षि ! उत्कण्ठयति कामिनः ॥१४

फलों के आस्वाद से शोभित मुख वाली कोयलों की ध्वनियों से विशेष नाद वाली—चारु तिलक से संयुत यह वनस्थली तुम्हारी ही तरह शोभित हो रही है ॥ ८ ॥ आम्र वृक्ष की शाखाओं के शिखर पर मज्जरी के पराग से पिञ्जर वर्ण वाली कोकिल अपनी मधुर ध्वनि से ही अपने चेष्टितों से कुलीन की भाँति ही प्रकटता को प्राप्त हुआ करता है ॥ ९ ॥ इस सरिता से समन्वित वन में यह महाकामी भौंरा पुष्पों के पराग से विशेष रूप से लिप्त अङ्गों वाली अपनी प्रिया के पीछे-पीछे गुञ्जार करता हुआ फूल से फूल पर जाया करता है । वन में युवा कोकिल बहुत प्रकार के पुष्पों से समन्वित होने पर भी कान्ता की भाँति अनुपीड़ित सहकार की मञ्जरी का आस्वाद लिया करता है ॥ १०, ११ ॥ यह कौआ वृक्ष के अग्रभाग में प्रसूता और पक्षों से आच्छादित पुत्रिका वाली अपनी प्रिया काकी (कौआ की पत्नी) को एकाग्र चौंच से प्यार करता है । ॥ १२ ॥ काम से समाक्रान्त हुआ—दयिता के साथ रहने वाला युवा कपिञ्जल शुभाङ्ग निम्न को प्राप्त कर आहार भी ग्रहण नहीं कर रहा है ॥ १४ ॥ हे विशालाक्षि ! अपनी प्रिया के उत्सङ्ग में संस्थित हुआ

रमण करने वाला कलविङ्क बारम्बार कामी पुरुष को उत्कण्ठित कर रहा है ॥ १४ ॥

वृक्षशाखां समारूढः शुकोऽयं सह भार्यया ।
करेण लम्बयन् शाखां करोति सफल शिरः ॥१५
वनेऽत्र पिशितास्वादतृप्तो निद्रामुपागतः ।
शेते सिंहयुवा कान्ता चरणान्तरगामिनी ॥१६
व्याघ्रयोर्मिथुनं पश्य शैलकन्दरसंस्थितम् ।
ययोर्नेत्रप्रभालोके गुहाभिन्नेव लक्ष्यते ॥१७
अयं द्वीपी प्रियां लेढि जिह्वाग्रेण पुनः पुनः ।
प्रीतिमायातिच तयालिह्यमानः स्वकान्तया ॥१८
उत्सङ्गकृतमूर्धानि निद्रापहृतचेतसम् ।
जन्तूद्धरणतः कान्तं सुखयत्येव वानरी ॥१९
भूमौ निपतितां रामां मार्जारो दर्शितोदरीम् ।
नखदन्तैर्दशत्येष न च पीडयते तथा ॥२०
शशकः शशकी चोभे ससुप्ते पीडिते इमे ।
संलीनगात्रचरणे कर्णैर्व्यक्तिमुपागते ॥२१

वृक्ष की शाखा पर अपनी प्रिय भार्या के साथ समारूढ़ यह शुक अपने कर से शाखा को लम्बित करता हुआ शिर को सफल करता है। ॥ १५ ॥ इस वन में मांस के स्वाद से तृप्त हुआ सिंह निद्रा को उपागत हो गया है और उसकी कान्ता उस अपने भर्त्ता सिंह के चरणों के मध्य में लेटी हुई है ॥ ३६ ॥ पर्वत की कन्दरा में संस्थित दो व्याघ्रों के जोड़े को देखो जिन दोनों के नेत्रों की प्रभा के प्रकाश से गुहा भिन्न-सी हुई लक्षित हुआ करती है ॥ १७ ॥ यह हाथी अपनी जिह्वा के अग्र भाग से पुनः-पुनः अपनी प्रिया को चाट रहा है। और अपनी कान्ता के द्वारा जिस समय में वह स्वयं लिप्तमान होता है तो उसको परम प्रसन्नता हुआ करती है। यह बानरी गोद में मस्तक को रखने वाले तथा निद्रा से

अपहृत चेतना वाले अपने कान्त का जन्तुओं के उद्धरण के द्वारा सुखित ही किया करती है ।। १८ । १९ ।। यह मार्जार भूमि में पड़ी हुई और अपने उदर को दिखाने वाली अपनी रम्या पत्नी को नाखून और दशनों से उसका दंशन करता है किन्तु उसको किसी प्रकार की पीड़ा नहीं पहुँचाता है ।। २० ।। ये शशक और शशकी दोनों पीड़ित होकर सो गये हैं। इनके गात्र और चरण संप्रक्त थे और कानों के द्वारा ही प्रकटता को प्राप्त होते हैं ।। २१ ।।

स्नात्वा सरसि पद्माढ्ये नागस्तु मदनप्रियः ।
सम्भावयति तन्वङ्गींमृणालकवलैःप्रियाम् ।।२२
कान्तप्रोथसमुत्थानैः कान्तमार्गानुगामिनी ।
करोति कवलं मुस्तैर्वराही पोतकानुगा ।।२३
दृढाङ्गसन्धिर्महिषः कर्दमाक्ततनुर्वने ।
अनुव्रजजि धावन्ती प्रियबद्धचतुष्करः ।।२४
पश्य चार्वङ्गि ! सारङ्गं त्वं कटाक्षविभावनैः ।
सभार्यंमांहिपश्यन्तं कौतूहलसमन्विम् ।।२५
पश्य पश्चिमपादेन रोही कण्डूयते मुखम् ।
स्निहार्द्रभावात्कर्षन्त भर्त्तारं शृङ्गकोटिना ।।२६
द्रागिमाञ्चमरीं पश्य सितबालामगच्छतीम् ।
अन्वास्ते चमरः कामी माञ्चपश्यतिगर्वितः ।।२७
अतिपे गवयं पश्य प्रकृष्टं भार्यया सह ।
रोमन्थनं प्रकुर्वाणं काकङ्कुदि वारयन् ।।२८

पद्मों से आढ्य सरोवर में मदन प्रिय नाग अपनी तन्वङ्गी प्रिया को मृणाल क कावलों के द्वारा प्रणय का प्रदर्शन कर रहा है ।। २२ ।। अपने बच्चों के पीछे अनुगमन करने वाली वाराही अपने कान्त के प्रोत्थ समुत्थानों से कान्त के ही मार्ग का अनुसरण करने वाली होती हुई मुस्तों से कवल किया करती है ।। २३ ।। वन में दृढ़ अङ्गों की सन्धि वाला—

कीच में अक्त शरीर वाला और प्रिय वद्ध चतुष्कर महिष धावन करती हुई महिषी के पीछे दौड़ लगा रहा है ।। २४ ।। हे चारु अङ्गों वाली ! तुम इस सारङ्ग को देखो जो अपने कटाक्षों के विभावनों से भार्या के सहित एवं कौतूहल से युक्त मुझको देख रहा है ।। २५ ।। स्नेह के आर्द्र भाव से अपने सींग की नौंक से स्वामी का कर्षण करती हुई रोही अपने पीछे के पैर से मुख को खुजला रही है—इसे भी देखलो ।। २६ ।। बहुत ही शीघ्र इस सित बालों वाली और गमन न करती हुई चमरी को देखिए । यह कामी चमर इसके पीछे है तथा अत्यन्त गर्वित होता हुआ मुझको देखता है ।। २७ ।। रोमन्थन करता हुआ ककुद पर कौए का निवारण करने वाले अपनी भार्या के साथ आतप में प्रकृष्ट इस गवय को देखलो ।। २८ ।।

पश्येमं भार्यया सार्द्ध न्यस्ताग्रचरणद्वयम् ।
विपुले वदरीस्कन्धे बदराशनकाम्यया ।।२९
हंसं सभार्यं सरसि विचरन्तं सुनिर्मलम् ।
सुमुक्तस्येन्दुबिम्बस्य पश्च व श्रियमुद्वहन् ।।३०
सभार्यश्चक्रवाकोऽयं कमलाकरमध्यगः ।
करोति पद्मिनी कान्तां सुपुष्पामिव सुन्दरी ।।३१
मया फलोच्चयः सुभ्रु ! त्वया पुष्पोच्चयः कृतः ।
इन्धनं न कृत सुभ्रु ! तत्करिष्यामि सांप्रतम् ।।३२
त्वमस्य सरसस्तीरे द्रुमच्छायां समाश्रिता ।
क्षणमात्रंप्रतीक्षस्व विश्रमस्वच भामिनि ।।३३
एवमेतत्करिष्यामि मम दृष्टिपथस्त्वया ।
दूरं कान्त ! न कर्त्तव्योबिभेमि गहने वने ।।३४
ततःस काष्ठानि चकार तस्मिन्वने तदा राजसुतासमक्षम् ।
तस्या ह्यदूरे सरसस्तदानीं मेने च सा तं मृतमेव राजन् ।।३५

भार्या के साथ में रहने वाले—दोनों चरणों को आगे न्यस्त

प्राप्त करने की इच्छा रखता है उसको चाहिए कि अपने सहायता करने वाले लोगों को बनावे। राजा को उचित योग्यता रखने वाले प्राणधारियों को ही कर्म्मों में योजित करना चाहिए ।।७३-७६।। जो पुरुष परम धर्म्मिष्ठ हों उनको ही धर्म के कार्यों में और जो अतीव शूरवीर हों उन्हें संग्राम के कार्यों में एवं जो परम निपुण हों उन्हें अर्थ सम्वन्धी कृत्यों में और जो पवित्र हों उनको ही सभी कर्म्मों में योजित करना चाहिए ।।७७।।

स्त्रीषु षण्ढं नियुञ्जीत तीक्ष्णं दारुणं दारुणकर्मसु।
धर्मे चार्थेच कामे च नये च रविनन्दन ! ।।७८
राजा यथार्हङ्कुर्याच्च उपधाभिः परीक्षणम् ।
समतीतोपदान् भृत्यान् कुर्याच्छस्तवनेचरान् ।।७९
तत्पादान्वेषणो यत्तांस्तदध्यक्षांस्तु कारयेत् ।
सवमादीनि कर्माणिनृपःकार्याणिपार्थिव ।।८०
सर्वथा नेष्यते राज्ञस्तीक्ष्णोपकरणक्रमः ।
कर्माणि पापसाध्यानियानि राज्ञो नराधिप ! ।।८१
सन्तस्तानि न कुर्वन्तितस्मात्तानित्यजेन्नृपः ।
नेष्यतेपृथिवीशातान्तीक्ष्णोपकरणक्रिया ।।८२
यस्मिन् कर्मणि यस्य स्याद्विशेषेण च कौशलम् ।
तस्मिन् कर्मणि तं राज्ञा परीक्ष्य विनिवेशयेत् ।।८३
पितृपैतामहान् भृत्यान् सवंकर्मसु योजयेत् ।
विनादायादकृत्येषुपरीक्षां स्वकृतान्तरान् ।।८४

स्त्रियों से सम्वधिन्त सभी कार्यों में नपुंसक पुरुषों की नियुक्ति करे तथा जो अत्यन्त दारुण कर्म्म हों उनमें तीक्ष्ण प्रकृति वाले पुरुषों को रखे। हे रा त्रनन्दन ! धर्म्म—अर्थ—काम और नय मे राजा को उपधाओं के द्वारा भली भाँति परीक्षण करके ही जो जिस कार्य के करने की क्षमता तारख हो उसी की उसमें नियुक्ति करनी चाहिए। समतीतोपद दरों

को शस्तवक में भृत्य बनावे ।।७८, ७९।। उनके पादान्वेषण करने वाले उनके अध्यक्षों को भी नियोजित करे। इसी प्रकार के सभी कर्मों को नृपों के द्वारा पूर्ण करना चाहिए। हे पार्थिव ! राजा का सर्वथा तीक्ष्ण उपकरण का क्रम अभीष्ट नहीं हुआ करता है। हे नराधिप ! राजा के जो कुछ ऐसे कर्म्म होते हैं जो कि पापों द्वारा साध्य हुआ करते हैं सन्त पुरुष उनको कभी नहीं किया करते हैं अतएव राजा का कर्त्तव्य है कि उनको त्याग देवे। राजाओं को तीक्ष्ण उपकरणों की क्रिया कभी भी अभीष्ट नहीं—हुआ करती है। जिस कर्म्म में जिस पुरुष की विशेष रूप से कुशलता हो उस कर्म्म में राजा को उसकी परीक्षा करके ही उस पुरुष का विनिवेश करना उचित होता है। जो ऐसे भृत्य हैं कि उनके और अपने पिता—पितामह के समय से ही चले आने वाले हैं उनको सभी प्रकार के कर्मों में नियुक्त कर देना चाहिए। स्वकृतान्तरों को दायाद कृत्यों में परीक्षा के बिना भी नियुक्त कर देवे ।।८०-८४।।

नियुञ्जीत महाभाग ! तस्य ते हितकारिणः ।
परराजगृहात्प्राप्तान् जनसंग्रहकाम्यया ।।८५

दुष्टान् वाप्यथवादुष्टान् आश्रयीत प्रयत्नतः ।
दुष्टं विज्ञाय विश्वासं न कुर्यात्तत्रभूमिपः ।।८६
वृत्ति तस्यापि वर्तेत जनसंग्रहकाम्यया ।
राजा देशान्तरप्राप्तं पुरुषं पूजयेद् भृशम् ।।८७
मामयं देशसम्प्राप्तो बहुमानेन चिन्तयेत् ।
कामं भृत्याजन राजा नैव कुर्यान्नराधिप ।।८८

न च वा संविभक्तांस्तान् भृत्यान् कुर्यात्कथञ्चन ।
शत्रवोऽग्निर्विषं सर्पो निस्त्रिंश इति चिन्तयेत् ।।८९
भृत्या मनुजशार्दूल ! रुषिताश्च तथैकतः ।
तेषां चारेण चारित्रं राजा विज्ञायनित्यशः ।।९०

हे महाभाग ! जन-संग्रह की कामना से दूसरे राज गृह से प्राप्त हुए उसके उन हितकारियों को नियुक्त करना चाहिए। दुष्ट हों अथवा अदुष्ट हों प्रयत्न से उनको आश्रय देवे। राजा को दुष्ट को जानकर उसका विश्वास नहीं करना चाहिए। जन-संग्रह की कामना से उसकी वृति कर देनी चाहिए। राजा को अन्य देश से प्राप्त हुए पुरष की अत्यधिक पूजा करनी चाहिए ।।८५, ८६, ८७।। यह मेरे देश में प्राप्त हुआ है अतएव उसके विषय में बहुमान चिन्तन करना चाहिए! हे नराधिप ! राजा को इच्छापूर्वक भृत्यार्जन नहीं करना चाहिये ।। ८८ ।। उन भृत्यों को किसी भी प्रकार से सविभक्त नहीं करे। शत्रुओं को अग्नि—विष-सर्प और विस्त्रिश ऐसा ही चिन्तन करना चाहिए ॥ ८९ ।। हे मनुज शार्दूल ! जो भत्य र्षित हो जावें उनके विषय में एक ओर से राजा को चारों के द्वारा नित्य ही चरित्र का विशेष ज्ञान करते रहना चाहिये ॥ ९० ॥

गुणिनां पूजन कुर्यात् निर्गुणानाञ्चशासनम् ।
कथिताःसततंराजन् ! राजानश्चारचक्षुषः ।।९१
स्वके देशे परे देशे ज्ञानशीलान् विचक्षणान् ।
अनाहार्यान् क्लेशसहान्नियुञ्जीत तथाचरान् ।।९२
जनस्याविदितान् सौम्यान् तथा ज्ञातान् परस्परम् ।
वणिजो मन्त्रकुशलान् सांवत्सरचिकित्सकान् ।।९३
तथा प्रव्राजिताकारांश्चारान् राजा नियोजयेत् ।
नैकस्य राजा श्रद्दध्यात् चारस्यापि सुभाषितम् ।।९४
द्वयोः सम्बन्धमाज्ञाय श्रद्दध्यान्नपतिस्तदा ।
परस्परस्याविदितौ यदिस्यातांञ्च तावुभौ ।।९५
तस्माद्राजा प्रयत्नेन गूढांश्चारान्नियोजयेत् ।
रागापरागौभृत्यानां जनस्यचगुणागुणान् ।।९६
सर्वं राज्ञां चरायत्तन्तेषु यत्नपरोभवेत् ।

कर्मणा केन मे लोके जनः सर्वोऽनुरज्यते ॥९७
विरज्यते केन तथा विज्ञेयं तन्महीक्षिता ।
विरागजनकं लोके वर्जनीयं विशेषतः ॥९८
तथा च रागप्रभवा हि लक्ष्म्यो राज्ञां मताभास्करवंशचन्द्र ।
तस्मात्प्रयत्नेन नरेन्द्रमुख्यैःकार्योऽनुरागो भुवि मानवेषु ॥९९

राजा का कर्त्तव्य है कि जो गुणीजन हों उनका सत्कार एवं पूजन करे तथा जो गुणहीन हों उन पर शासन करे। हे राजन्! राजा लोग निरन्तर चारों के चक्षुओं वाले ही कहे जाया करते हैं ॥ ९१ ॥ अपने राष्ट्र तथा देश में तथा दूसरे देश में ज्ञान के शील वाले–विचक्षण–अनाहार्य और क्लैश सहचरा की नियुक्ति करनी चाहिए ॥ ९२ ॥ राजा का कर्त्तव्य है कि ऐसे गुप्तचरों को नियुक्त करे जिनको साधारणतया मनुष्य नहीं जानते हों—सौम्य—परस्पर में ज्ञात—वणिज मन्त्र में कुशल—साम्वत्सर चिकित्सक—प्रव्राजितों (साधु-संन्यासियों) के आकार अर्थात् वेश–भूषा वाले हों। राजा को किसी भी एक गुप्तचर के कथन पर भी श्रद्धा कभी नहीं कर लेनी चाहिए ॥९३, ९४॥ जब दो चार उसी एक विषय का समान रूप से प्रतिपादन करें तभी राजा को विश्वास करना चाहिए किन्तु दोनों के सम्बन्ध को पहिले समझ कर ऐसा करे। यदि वे दोनों भी परस्पर में अविदित हों तो उनके सम्बन्ध का ज्ञान लेना बहुत-ही आवश्यक है। इसी कारण से राजा को अत्यन्त गूढ़ चरों की नियुक्ति करना उचित है। भृत्यों के राग और अपराग तथा जनों के गुण और अवगुण का ज्ञान लेना सब कुछ गुप्तचरों के ही (राजाओं का) अधीन होता है अतएव राजाओं को उन के विषय में यत्न परायण होना ही चाहिए। राजा का परम कर्त्तव्य यही है कि वह यह सर्वदा जानता–समझता रहे कि मेरे किस कर्म्म से लोक में सब लोग में अनुरञ्जित होते हैं और कौन सा मेरा कर्म्म है जिससे लोगों को बुरा मालूम होता है जो लोगों में विराग समुत्पन्न करने वाला कार्य है। उसको पूर्ण रूप से वर्जित

कर देना चाहिए । हे भास्कर वंश के चन्द्र ! राजाओं की लक्ष्मी राग से समुत्पन्न होने वाली हैं—ऐसा ही माना गया है । इस कारण से राजप्रमुखों को चाहिए कि प्रयत्न पूर्वक भूमण्डल में मानवों में राजाओं को भली भाँति अनुराग करना चाहिए ।।६५-६६।।

६४—राजकृत्य वर्णन (१)

यथा न वर्तितव्यं स्यान्मनो राज्ञोऽनुजीविना ।
तथा ते कथयिष्यामि निबोध गदतो मम ।।१
राजा यत्तु वदेद्वाक्यं श्रोतव्यं तत्प्रयत्नतः ।
आक्षिप्य वचनं तस्य न वक्तव्यं तथा वचः ।।२
अनुकूल प्रिय तस्य वक्तव्यं जनसंसदि ।
रहोगतस्य वक्तव्यमप्रियं यद्धितं भवेत् ।।३
परार्थमस्य वक्तव्यं समे चेतसि पार्थिव ।
स्वार्थः सुहृद्भि र्वक्तव्यो न स्वयं तु कथञ्चन ।।४
कार्य्यातिपातः सर्वेषु रक्षितव्यः प्रयत्नतः ।
नच हिंस्यं धनं किञ्चित् नियुक्तेनचकर्मणि ।।५
नोपेक्ष्यस्तस्यमानश्च तथा राज्ञः प्रियो भवेत् ।
राज्ञश्चनतथाकार्य्यं वेषभाषितचेष्टितम् ।।६
राजलीला न कर्तव्या तद्विद्विञ्च वर्जयेत् ।
राज्ञःसमोऽधिकोवानकार्य्योवेषोविजानता ।।७

श्री मत्स्य भगवान् ने कहा—राजा के अनुजीवो के द्वारा मन जिस प्रकार से नहीं वरतना चाहिए वही मैं आपको बतलाऊंगा । अब आप मुझसे इसको समझ लो । जिसको कि मैं कह रहा हूँ ।।१।। राजा जो कुछ भी वचन कहे उसे प्रयत्न पूर्वक श्रवण कर लेना चाहिए । उसके

बचन पर आक्षेप करके फिर कुछ भी अपना वचन नहीं कहना चाहिए। ॥२॥ जन संसद में उस नृप का प्रिय और अनुकूल ही वचन बोलना चाहिए। यदि कोई उसके हित को बतलाने वाला भी वचन कहना हो तो उसे चाहे वह अप्रिय भी हो उसी समय में उससे कहना चाहिए जब एकान्त में स्थित हो ॥३॥ हे पार्थिव ! इसका परमार्थ चित्त के सम होने पर ही बोलना चाहिए। यदि अपना कोई स्वार्थ हो तो उसे स्वयं कभी भी न कहकर मित्रों के द्वारा ही कहलाना चाहिए ॥४॥ सब में कार्यातिपात प्रयत्न पूर्वक रक्षित रखना चाहिये। कर्म में नियुक्त होने पर कुछ भी धन नहीं मारना चाहिए ॥५॥ उसके मान की कभी भी उपेक्षा नहीं करनी चाहिए। इसी प्रकार से मनुष्य राजा का प्रिय हो जाया करता है। राजा के तुल्य वेष—भाषित और चेष्टित जैसा भी वैसा ही स्वयं नहीं करना चाहिए ॥ ६ ॥ राजा की लीला नहीं करे और उसका जो भी कुछ विद्विष्ट हो वह भी वर्जित कर देना चाहिए। राजा के ही समान अथवा उससे भी अधिक वेष अच्छी तरह से जानते हुए कभी नहीं करना चाहिए । ७॥

द्यूतादिषु तथैवान्यत् कौशलं तु प्रदर्शयेत् ।
प्रदर्श्यकौशलं चास्यराजानन्तु विशेषयेत् ॥८
अन्त.पुरजनाध्यवं वैंरिदूतैं निराकृतैः ।
संसर्गं न व्रजेद्राजन् विना पार्थिवशासनात् ॥९
निस्नेहताञ्चावमानं प्रयत्नेन तु गोहयेत् ।
यच्च गुह्यं भवेद्राज्ञो न तल्लोके प्रकाशयेत् ॥१०
नृपेण श्रावित यत्स्याद्वाच्यावाच्यं नृपोत्तम ! ।
नतत्सश्रावयेल्लोकेतथाराज्ञोऽप्रियोभवेत ॥११
आज्ञाप्यमानेवान्यस्मिन् समुत्थायत्वरान्वितः ।
किमहङ्करवाणीतिच्योराजाविजानता ॥१२
कार्यावस्थां च विज्ञाय कार्यमेव यथा भवेत् ।

सततं क्रियमाणेस्मिन् लाघवन्तु व्रजेद् ध्रुवम् ॥१३
राज्ञः प्रियाणि वाक्यानि चात्यर्थं पुनःपुनः ।
महासुशीलस्तुभवेत्नचापि भृकुटीमुखः ॥१४

उसी भाँति द्यूत (खेल) आदि में अन्य कौशल का प्रदर्शन करे और इसका कौशल प्रदर्शित करके राजा की विशेषता का प्रदर्शन करना चाहिए । हे राजन् ! राजा के शासन के विना अन्तः पुर के जनाध्यक्षों के साथ—शत्रु के दूतों के साथ और जो राजा के द्वारा निराकृत हों उनके साथ संसर्ग नहीं करना चाहिए ॥८, ९॥ स्नेह के अभाव को और अवमान को प्रयत्न के साथ गोपन करके रखना चाहिए और जो राजा का कोई भी गोपनीय विषय हो उसका भी कभी प्रकाशन नहीं करे । हे नृपोत्तम ! वाच्य तथा अवाच्य नृप के द्वारा जो भी श्रावित हो उसे लोक में कभी भी श्रावित न करे । ऐसा करने से राजा का वह उसे अप्रिय हो जाया करता है । किसी भी दूसरे को आज्ञा देने पर भी शीघ्रता से स्वयं उठकर राजा से यह कहना चाहिये कि क्या मैं इस कार्य्य का सम्पादन करलूं—यही एक ज्ञाता पुरुष का कर्त्तव्य है ॥१०, ११, १२॥ कार्य की अवस्था को विशेष रूप से जानकर जैसा भी वह कार्य्य होवे उसको निरन्तर करते हुए भी लाघव निश्चय रूप से करे ॥१३। राजा के प्रिय वाक्यों को अत्यधिक और बारम्बार नहीं कहे । राजा के समक्ष में महान् सुशील ही रहना चाहिए तथा कभी भृकुटियों को चढ़ाकर न रक्खे ॥१४॥

नातिवक्ता न निवक्ता न च मात्सरिकस्तथा ।
आत्मसम्भावितश्चैव न भवेत्तु कथञ्चन ॥१५
दुष्कृतानि नरेन्द्रस्य न तु सङ्कीर्तयेत् क्वचित् ।
वस्त्रमस्त्रमलङ्कारं राज्ञा दत्तं तु धारयेत् ॥१६
औदार्य्येण न तद्देयमन्यस्मै भूतिमिच्छता ।
तत्रैवात्मासनं कार्यं दिवा स्वप्नं न कारयेत् ॥१७
नानिर्दिष्टे तथाद्वारे प्रविशेत्तु कथञ्चन ।

न च पश्येत्तु राजानमयोग्यासु च भूमिषु ।।१८
राज्ञस्तु दक्षिणे पार्श्वे वामे चोपविशेत्तदा ।
पुरस्ताच्च तथापश्चादासनन्तु विगर्हितम् ।।१६
जृम्भां निष्ठीवनङ्कासं कोपं पर्य्यस्तिकाश्रयम् ।
भृकुटिं वान्तमुद्गारन्तत्समीपे विवर्जयेत् ।।२०
स्वयं तत्र न कुर्वीत स्वगुणाख्यापनं बुधः ।
स्वगुणाख्यापने युक्ता परमेव प्रयोजयेत् ।।२१

राजा के मामने न तो अत्यधिक बोलने वाला ही रहे और न बिल्कुल न बोलने वाला मौन होकर ही रहे। मत्सरता से युक्त भी होकर न रहे तथा किसी भी प्रकार से आत्म सम्भावित भी नहीं रहना चाहिए ।।८५।। जो कुछ भी राजा के द्वारा किये हुए दुष्कृत हों उनका कभी भी कहीं पर संकीर्त्तन नहीं करना चाहिए। जो भी कभी दैवात् राजा के द्वारा प्राप्त वस्त्र—अस्त्र और अलङ्कार हों तो उनको धारण करके रहना चाहिए ।।१६।। भूति के चाहने वाले को उदारता से उनको कभी दूसरे को नहीं दे डाले और वहीं पर अपना आसन रखना चाहिए तथा दिन में स्वप्न नहीं करे ।।१७।। जो द्वार अनिर्दिष्ट हो या मार्ग हो उसमें किसी भी प्रकार से प्रवेश नहीं करना चाहिए। अयोग्य भूमियों में समवस्थित राजा को कभी नही देखना चाहिए। सर्वदा राजा क दक्षिण तथा वाम भाग में ही उपविष्ट होना चाहिए। राजा के आगे अथवा पीछे अपना आसन रखना गर्हित होता है ।।१८, १६।। राजा के समीप में जब भी कभी उपस्थित होवे तो मनुष्य को चाहिए कि जभाई—थूक का थूकना-खाँसना—पर्यस्तिका (मसन्द) आदिका सहारा लेकर बैठना—भृकुटि चढ़ाना—वान्ति करना—डकार लेना इन सबका वर्जन कर देवे। बुध पुरुष को राजा के समक्ष में स्वय अपने गुणों का ख्यापन अपन मुख से नहीं करना चाहिए प्रत्युत अपने गुणों के प्रख्यापन करने के लिये दूमरों को ही प्रयोजित करना चाहिए ।।२०, २१।।

हृदयं निर्मलं कृत्वा परां भक्तिमुपाश्रितैः ।
अनुजीविगणैर्भाव्यं नित्यं राज्ञामतन्द्रितैः ॥२२
शाठ्यं लौल्यं च पैशून्यं नास्तिक्यं क्षुद्रता तथा ।
चापल्यञ्च परित्याज्यं नित्यं राज्ञोऽनुजीविभिः ॥२३
श्रुतिविद्यासुशीलैश्च संयोज्यात्मानमात्मना ।
राजसेवान्ततः कुर्याद् भूतयेभूतिवर्द्धनीम् ॥२४
नमस्कार्याः सदा चास्य पुत्रवल्लभमन्त्रिणः ।
सचिवैश्चास्यविश्वासोनतुकार्यः कथञ्चन ॥२५
अपृष्टश्चास्य न ब्रूयात् कामं ब्रूयात्तथा यदि ।
हितं तथ्यञ्च वचनंहितैः सहसुनिश्चितम् ॥२६
चित्तञ्चैवास्य विज्ञेयं नित्यमेवानुजीविना ।
भर्त्तुराराधनंकुर्याच्चित्तज्ञोमानवः सुखम् ॥२७
रागापरागौ चैवास्य विज्ञेयौ भूतिमिच्छता ।
त्यजेद्विरक्तो नृपती रक्तवृत्तिन्तु कारयेत् ॥२८
विरक्तः कारयेन्नाशं विपक्षाभ्युदयं तथा ।
आशावर्द्धनकं कृत्वा फलनाशं करोति च ॥२९
अकोपोऽपि सकोपाभः प्रसन्नोऽपि च निष्फलः ।
वाक्यं च समदं वक्ति वृत्तिच्छेद करोति वै ॥३०

जो राजाओं के अनुजीवी गण हों उनको अपना हृदय निर्मल करके पराभक्ति का उपाश्रय करते हुए नित्य ही अतन्द्रित रहना चाहिए। राजा के अनुजीवियों को शठता–लौल्य–पैशून्य–नास्तिकता–क्षुद्रता–चापल्य–इन दोनों का सर्वदा परित्याग कर देना चाहिए ॥२२, २३॥ श्रुति–विद्या और सुशीलता गुणों वाले पुरुषों को आत्मा के द्वारा अपनी आत्मा को संयोजित करके अन्ततः वैभव को प्राप्ति के लिये भूति के वर्धन करने वाली राजा की सेवा करनी चाहिए । राजा के पुत्र–वल्लभ व मन्त्रियोंको सदा नमस्कार करना उचित है । सचिवों के द्वारा इसका किसी प्रकार से

भी विश्वास नहीं करना चाहिए ।।२४, २५।। बिना कुछ पूछे हुए इससे भाषण करे । यदि इच्छा बोले तो हितों के सहित अति सुनिश्चित हित और तथ्य वचन बोलना चाहिये ।। ६।। जो राजा के अनुजीवी हों उनको नित्य ही इसके चित्त की वृत्ति को जानते रहना चाहिये । चित्त की वृत्ति का ज्ञान रखने वाले मानव को सुख पूर्वक स्वामी का समाराधन करना चाहिए । विभूति के प्राप्त करने की इच्छा वाले पुरुष को इस राजा के राग एवं अपराग को अच्छी तरह से जान लेना अत्यन्त आवश्यक है । इनको जान कर फिर त्याग करे । विरक्त नहीं रहे । नृपति रक्त वृत्ति करावे । विरक्त नाश कराता है और विपक्ष का अभ्युदम कराता है । आशा की वृद्धि करके फल का नाश किया करता है । बिना काम वाला भी क्रोध से युक्त के समान होता है । प्रसन्न होता हुआ भी निष्फल है तथा मद से युक्त वाक्य बोलता है और वृत्ति का छेदन कर देता है । ।।२८-३०।।

प्रदेशवाक्यमुदितो न सम्भावयतेऽन्यथा ।
आराधनासु सर्वासु सुप्तवच्च विचेष्टते ।।३१
कथासु दोषं क्षिपति वाक्यभङ्गं करोति च ।
लक्ष्यते विमुखश्चैव गुणसङ्कीर्तनेऽपि च ।।३२
दृष्टिं क्षिपति चान्यत्र क्रियमाणे च कर्मणि ।
विरक्तलक्षणं चैतत् शृणु रक्तस्य लक्षणम् ।।३३
दृष्ट्वा प्रसन्नो भवति वाक्यं गृह्णाति चादरात् ।
कुशलादिपरिप्रश्नं संप्रयच्छति चासनम् ।।३४
विविक्तदर्शने चास्य रहस्येनं न शङ्कते ।
जायते हृष्टवदनः श्रुत्वा तस्य तु तत्कथाम् ।।३५
अप्रियाण्यपि वाक्यानि तदुक्तान्यभिनन्दते ।
उपायनञ्च गृह्णाति स्तोकमप्यादरात्तथा ।।३६

कथान्तरेपु स्मरति प्रहृष्टवदनस्तथा ।
इति रक्तस्य कर्तव्या सेवा रविकुलोद्वह ! ॥३७
मित्रं न चापत्सु तथा च भृत्या भजन्ति ये निर्गुणमप्रमेयम् ।
विभुं विशेषेण च ते व्रजन्ति सुरेन्द्रधामामरवृन्दजुष्टम् ॥३८

उदित हुआ प्रदेश वाक्य को अन्यथा सम्भावित नहीं होता है और सब आराधनाओं में सुप्त की भाँति विचेष्टित किया करता है । कथाओं में दोषों का क्षेप किया करता है और वाक्य का भङ्ग करता है । गुणों के सङ्कीर्त्तन करने पर भी विमुख के समान दिखलाई देता है । कर्मों के करने पर भी अन्यत्र दृष्टि डालता है—ये ही एक विरक्त पुरुष के लक्षण हुआ करते हैं । अब जो अनुरक्त होता है उसके लक्षणों का भी श्रवण करलो । देखकर परम प्रसन्न अनुरक्त हुआ करता है और जो भी वाक्य कहा जाता है उसे बड़े हो आदर से ग्रहण करता है । कुशल-क्षेम के प्रश्न आदि करता है और उपविष्ट होने के लिये आसन दिया करता है विविक्त दर्शन में और इसके एकान्त में इसकी शङ्का नहीं करता है । उसकी उस कथा को श्रवण करके प्रसन्न मुख हो जाया करता है ॥ ३१-३५ ॥ उसके द्वारा कहे हुए अप्रिय वाक्यों को भी अभिनन्दित किया करता है तथा थोड़े से भी उपायन को बड़े आदर से ग्रहण करता है । अन्य कथाओं में प्रहृष्ट मुख वाला होकर स्मरण करता है । हे रविकुलोद्वह ! इस प्रकार के अनुरक्त को सेवा करनी चाहिए । आपत्ति के समयों में मित्र को उस प्रकार से नहीं जिस तरह भृत्यगण हैं वे अप्रमेय और निर्गुण की सेवा करते हैं । वे भृत्य देववृन्दों के द्वारा सेवित सुरेन्द्र के धाम को तथा विशेष रूप से विभु को प्राप्त किया करते हैं ॥ ३६ । ३७ । ३८ ॥

९५—राजकृत्य वर्णन (२)

राजा सहायसंयुक्तः प्रभूतयवसेन्धनम् ।
रम्यमानतसामन्तं मध्यमन्देशमावसेत् ॥१
वैश्यशूद्रजनप्रायमनाहार्यं तथापरैः ।
किञ्चिद्ब्राह्मणसंयुक्तं बहुकर्मकरन्तथा ॥२
अदैवमातृकं रम्यनुरक्तजनान्वितम् ।
करैरापीडितञ्चापि बहुपुष्पफलं तथा ॥३
अगम्यं परचक्राणां तद्वासगृहमापदि ।
समदुःखसुखं राज्ञः सततं प्रियमास्थितम् ॥४
सरीसृपविहीनञ्च व्याघ्रतस्करवर्जितम् ।
एवंविधं यथालाभं राजा विषयमावसेत् ॥५
तत्र दुर्गं नृपः कुर्यात् षण्णामेकतमं बुधः ।
धनुर्दुर्गं महीदुर्गं नरदुर्गं तथैव च ॥६
वार्क्षं चैवाम्बुदुर्गं च गिरिदुर्गं च पार्थिव ! ।
सर्वेषामेव दुर्गाणां गिरिदुर्गं प्रशस्यते ॥७

श्री मत्स्य भगवान् ने कहा—राजा को अपने सहायकों से समन्वित होकर प्रभूत यवस और इन्धन वाले—रम्य एवं आनत सामन्तों वाले मध्यम देश में निवास करना चाहिए ॥ १ ॥ वह स्थल ऐसा होना चाहिए जिसमें राजा का निवास हो वैश्य और शूद्रजन बहुतायत से रहते हों एवं दूसरों के द्वारा जो आहार्य न हो सके । राजा का निवास स्थल कुछ ब्राह्मणों से भी युक्त तथा बहुत कर्मों के करने वाला होवे ॥ २ ॥ अदैव मातृक—रम्य—अनुरञ्जित जनों से युक्त—करों से आपीड़ित तथा बहुत पुष्प एवं फलों वाला – पर (शत्रु) के चक्रों की अगम्य ऐसा आपत्ति काल में वास गृह होना चाहिए । सुख और दुःख में सम—निरन्तर राजा का प्रिय—सरीसृपों से बिहीन—व्याघ्र और तस्करों से

रहित इस प्रकार का यथा लाभ देश में राजा को अपना निवास करना चाहिये ॥ ३ । ४ । ५ ॥ बुध राजा को वहाँ पर छै प्रकार के दुर्गों में से एक तरह के दुर्ग की रचना करनो चाहिए। छै प्रकार के दुर्गों के नाम ये हैं—धनुर्दुर्ग—महीदुर्ग–नर दुर्ग—वार्क्ष दुर्ग–अम्बुदुर्ग–और हे पार्थिव! छटवाँ गिरि दुर्ग है। इन समस्त दुर्गों में गिरि दुर्ग सबसे प्रशस्त माना जाता है ॥ ६ । ७ ॥

दुर्गं च परिखोपेतं वप्राट्टालकसंयुतम् ।
शतघ्नीयन्त्रमुख्यैश्च शतशश्च समावृतम् ॥८
गोपुरं सकपाटञ्च तत्र स्यात्सुमनोहरम् ।
सपताकङ्गजारूढोयेन राजा विशेत्पुरम् ॥९
चतस्रश्च तथात्र कार्यास्त्वायतवीथयः ।
एकस्मिस्तत्र वीथ्यग्रे देववेश्म भवेद्दृढम् ॥१०
वीथ्यग्रे च द्वितोये चर जिवेश्म विधीयते ।
धर्माधिकरणं कार्यं वीथ्यग्रे च तृतीयके ॥११
चतुर्थेत्वथ वीथ्यग्रे गोपुरञ्च विधीयते ।
आयतञ्चतुरस्रं वा वृत्तं वा कारयेत् पुरम् ॥१२
मुक्तिहोनं त्रिकोणञ्चयवमध्य तथैवच ।
आयतञ्चतुरस्रं वा वृत्तं वा कारयेत्पुरम् ॥१३
अर्द्धचन्द्र प्रशंसन्ति नदीतीरेषु तद्वसन् ।
अन्यत्तत्र न कर्तव्यं प्रयत्नेन विजानता ॥१४

राजा का दुर्ग वप्र और अट्टालक से संयुत तथा परिखा (खाई) से उपेत—शतघ्नी (तोप) यन्त्रों में जो प्रमुख यन्त्र हैं उन सैकड़ों यन्त्रों से समावृत दुर्ग होना चाहिए। वहाँ पर सुमनोहर कपाटों से युक्त गोपुर होवे जिसमें पताकाएें फहरा रही हों। वह ऐसा होना चाहिए जिसके द्वारा गज पर समारूढ़ होकर राजा पुर में प्रवेश करे ॥ ८ । ९ ॥ उसमें चार लम्बी चौड़ी बीथियाँ निर्मित की हुई होवें और वहाँ पर एक वीथी

के अग्रभाग में परम सुदृढ़ देय का आलय होना चाहिए । दूसरे वीथी के अग्रभाग में राजा के रहने का वेश्म गृह निर्मित किया जाना चाहिए । तीसरी वीथी के अग्रभाग में धर्म का अधिकरण करना चाहिये और चतुर्थ वीथी के अग्रभाग में गोपुर विरचित करे । इस प्रकार से उस पुर को चौकोर—आयत और वृत्त कराना चाहिए । मुक्तिहीन — त्रिकोण — यवमध्य अथवा चौकोर और आयत यद्वावृत्त पुर की रचना करावे । नदी के तीर पर निवास करते हुए अर्धं चन्द्र की प्रशसा किया करते हैं । इसके अतिरिक्त अन्य प्रयत्नपूर्वक विशेष ज्ञाता को नहीं करना चाहिए । ॥८-१४॥

राज्ञा कोशगृहं कार्यं दक्षिणे राजवेश्मनः ।
तस्यापि दक्षिणे भागे गजस्थानं विधीयते ॥१५
गजानां प्राङ्मुखी शाला कर्तव्यावाप्युङ्दमुखी ।
आग्नेये च तथा भागे आयुधागारमिष्यते ॥१६
महानसश्च धर्मज्ञ ! कर्मशालास्तथापराः ।
गृहं पुरोधसः कार्यं वामतो राजवेश्मनः ॥१७
मन्त्रिवेदविदाञ्चैव चिकित्साकर्त्त रेवच ।
तत्रैव च तथा भागे कोष्ठागारं विधीयते ॥१८
गवां स्थान तथैवात्र तुरगाणां तथैवच ।
उत्तराभिमुखा श्रेणी तुरगाणां विधीयते ॥१९
दक्षिणाभिमुखा वाथ परिशिष्टास्तु गर्हिताः ।
तुरगास्तेतथाधार्याः प्रदीपैःसार्वरात्रिकैः ॥२०
कुक्कुटान् वानरांश्चैव मर्कटांश्च विशेषतः ।
धारयेदश्वशालासु सवत्सां धेनुमेवच ॥२१

राजा के निवास गृह के दक्षिण भाग में राजा को अपना कोषगृह बनाना चाहिए । उसके भी दक्षिण भाग में गजों के रहने का स्थान निर्मित करावे ॥ १५ ॥ गजशाला का मुख पूर्व अथवा उत्तर दिशा की

ओर करवाना चाहिए। आग्नेय भाग में आयुधों का आगार बनाना अभीष्ट होता है। हे धर्म्मज्ञ ! महानस (रसोई घर) दूसरी कर्मशालाऐं और पुरोहित का गृह ये सब राजा के वेश्म के वाम भाग में निर्मित करावे। वहीं पर उसी भाग में मन्त्री—वेदवेत्ता और चिकित्सा करने वाले का गृह तथा कोष्ठागार भी निर्मित कराने चाहिये ।।१६ । १७ । १८ ।। यहाँ पर गौओं का स्थान—तुरङ्गों का स्थान करावे। तुरङ्गों की जो श्रेणी है वह उत्तर की ओर मुख वाली होनी चाहिये। अथवा दक्षिणाभिमुख हो। परिशिष्ट सभी गर्हित कही गयी हैं। वे तुरग सम्पूर्ण रात्रि में जलने वाले प्रदीपों के साथ रखने चाहिए। उन अश्वशालाओं में कुक्कुटों—वानरों—मर्कटों और विशेष रूप से वत्स के सहित धेनु को भी रखना चाहिए ।। १९, २०, २१ ।।

अजाश्च धार्या यत्नेन तुरगाणां हितैषिणा।
गोगजाश्वादिशालासु तत्पुरीषस्य निर्गमः ।।२२
अस्तंगते न कर्तव्यो देवदेवे दिवाकरे।
तत्र तत्र यथास्थानं राजाविज्ञाय सारथीन् ।।२३
दायादावसथस्थानं सर्वेषामनुपूर्वशः।
योधानां शिल्पिनाञ्चैव सर्वेषामविशेषतः ।।२४
दद्यादावसथान् दुर्गे कालमन्त्रविदां शुभान्।
गोवैद्यानश्ववैद्यांश्च गजवैद्यांस्तथैवच ।।२५
आहरेत भृशं राजा दुर्गे हि प्रबला रुजः।
कुशीलवानां विप्राणां दुर्गे स्थानं विधीयते ।।२६
न बहूनामतो दुर्गे विनाकार्यं तथा भवेत्।
दुर्गे च तत्र कर्तव्या नानाप्रहरणान्विताः ।।२७
सहस्रघातिनो राजंस्तैस्तु रक्षा विधीयते।
दुर्गे द्वाराणि गुप्तानि कार्याण्यपि च भूभुजा ।।२८

अश्वों के हित चाहने वाले को यत्नपूर्वक अजाओं को भी वहाँ

पर रखना आवश्यक होता है। गौ–गज और अश्व आदि की शालाओं में उनके पुरीष (मल) का निर्गम (निकालना) देवों के देव भगवान् दिवाकर के अस्त हो जाने पर नहीं करना चाहिए। वहाँ–वहाँ पर स्थानों के अनुसार राजा को विशेष रूप से समझ कर सारथियों की नियुक्ति करे तथा उन सबके आनुपूर्वशः आवसथ (रहने का) स्थान भी देवे। योधाओं को तथा शिल्पियों को सबके साधारण रूप से और काल मन्त्र वेत्ताओं को परम शुभ आवसथ दुर्ग में देवे। राजा को चाहिए कि वह गौओं के वैद्य—अश्वों के वैद्य और गजों की चिकित्सा करने वाले लोगों को अच्छी तरह से अधिक संख्या में लाकर रक्खे क्योंकि दुर्ग में बीमारियाँ भी बहुत प्रबल हुआ करती हैं। कुशीलव विप्रों का दुर्ग में स्थान किया जाता है ॥ २२, २३, २४, २५, २६ ॥ दुर्ग में कार्य के विना फालतू बहुतों को उस प्रकार से स्थान नहीं देवे। हे राजन् ! दुर्ग में अनेक प्रकार के प्रहरणों (शस्त्रों) से समन्वित सहस्र घातियों को नियुक्त करना चाहिए क्योंकि उनके द्वारा रक्षा की जाया करती है। राजा के द्वारा अपने दुर्ग में गुप्त द्वार भी निर्मित करा कर रखने चाहिए ॥ २७, २८ ॥

सञ्चयश्चात्र सर्वेषामायुधानां प्रशस्यते ।
धनुषां क्षेपणीयानान्तोमराणां च पार्थिवः ॥२९
शराणामथ खङ्गाना कवचानां तथैवच ।
लगुडानां गुडानाश्च हुडानां परिघैः सह ॥३०
अश्मनाञ्च प्रभूतानां मद्गराणां तथैवच ।
त्रिशूलानां पट्टिशानां कुठाराणाञ्च पार्थिव ॥३१
प्रासानाञ्च सशूलानां शक्तीनाञ्च नरोत्तमः ।
परश्वधानां चाक्राणां वर्मणाञ्चचर्मभिः सह ॥३२
कुद्दालक्षुरवेत्राणां पीठकानान्तथैव च ।
तुषाणांचैव दात्राणामङ्गाराणाञ्च संचयः ॥३३

सर्वेषां शिल्पभाण्डानां संचयश्चात्र चेष्यते ।
वादित्राणाञ्च सर्वेषामौषधीनान्तथैवच ।।३४
यवसानां प्रभूतानामिन्धनस्य च सञ्चयः ।
गुड़स्य सर्वतैलानां गोरसानान्तथैव च ॥३५

यहाँ पर दुर्ग में सभी आयुधों का संग्रह रखना परम प्रशस्त होता है। पार्थिव को धनुषों का–क्षेपणीयों का और तोमरों का सञ्चय रखना आवश्यक है। शरों का—कवचों का–खङ्गों का—लगु--गुड़ान–हुड़ और परिघों का भी संग्रह करे। बहुत तादाद में पाषाणों का—मुद्गरों का—त्रिशूलों का—पदिशों का और हे पार्थिव कुठारों का भी सग्रह करना चाहिए ।। २९, ३०, ३१ ।। नरोत्तम को प्रास—सशूल—शक्ति—परश्वध —चक्र—चर्म के सहित वर्मों का भी वहाँ सर्ग में संग्रह होना उचित होता है। कुद्दाल--क्षुर—वेत्र—पीठक—तुष–दात्र और अङ्गारों का भी सञ्जय करे। सभी प्रकार के शिल्पियों के भाण्डों का सञ्चय भी दुर्ग में अभीष्ट होता है। सब तरह के वादित्र और सभी औषधियाँ तथा प्रभूत यवस और ईंधन का संचय वहाँ रक्खे। गुड़, सभी तरह के तैल और गोरसों का संग्रह दुर्ग में करना आवश्यक है॥ ३२।३३ ३४ । ३५ ॥

वसानामथ मज्जानां स्नायूनामस्थिभिः सह ।
गोचर्मपटहानांच यवगोधूमयोरपि ।।३६
तथैवाम्रटानाँच यवगोधूमयोरपि ।
रत्नानां सर्ववस्त्राणां लोहानामप्यशेषतः ।.३७
कलापमुद्गमाषाणांचणकानान्तिलैः सह ।
तथा च सर्वशास्यानां पांशुगोमययोरपि ।।३८
शणसर्जरसं भूर्जं जतुलाक्षा च टङ्कणम् ।
राजा संचिनुयाद्दुर्गे यच्चान्यदपि किचन ।।३९
कुम्भाश्चाशोविषैः कार्या व्यालसिंहादयस्तथा ।

मृगाश्च पक्षिणश्चैव रक्ष्यास्ते च परस्परम् ।।४०
स्थानानि च विरुद्धानां सुगुप्तानि पृथक् पृथक् ।
कर्तव्यानि महाभाग ! यत्नेन पृथिवीक्षिता ।।४१
उक्तानि चाप्यनुक्तानि राजद्रव्याण्यशेषतः ।
सुगुप्तानि पुरे कुर्याज्जनानां हितकाम्यया ।।४२

राजा का परम कर्त्तव्य है कि वह वसा—मन्त्र—अस्थियों के साय स्नागु—गोचर्म—पटह—सभी प्रकार के धान्य—अभ्रपर—यव—गोधूम (गेहूँ)—रत्न—सभी वस्त्र—सम्पूर्ण प्रकार के लोह—कलाप-मुद्ग—माष (उर्द)--तिल—चना—सभी तरह के शस्य–पांसु–गोमय–शण -सर्जरस—भूर्ज-जतु–लाक्षा–टङ्कण (सुहागा) और अन्य भी जो कुछ हो इन सबका सञ्चय दुर्ग में राजा को करना ही चाहिए। आशीविषों के द्वारा कुम्भों के करे तथा व्याल—सिंह आदि मृग और पक्षिगण इन सबकी परस्पर में रक्षा करनी चाहिये ।।३६ । ३७ । ३८ । ३९।४०।। आपस में जो भी जीव विरोध रखने वाले हैं उनका अलग २ स्थान निर्मित करावे और अच्छी तरह उन्हें गुप्त रक्खे। हे महाभाग! राजा को यत्न के साथ यह सभी कुछ करना चाहिए। जो बता दिये गये हैं और जो नहीं भी कहे गये हैं उन सम्पूर्ण राजद्रव्यों को पुर में सुगुप्त जनता के हित की कामना से रखना चाहिए ।। ४१. ४२ ।।

जीवकर्षभकाकोलमामलक्चाटरूषक.न् ।
शालपर्णी पृष्ठिपर्ठी मुद्‌गपर्गी तथैव च ।।४३
माषपर्णी च मदद्वैसारिवेद्वेबलात्रयम् ।
वारा श्वसन्ती वृष्या च वृहती कण्टकारिका ।।४४
शृङ्गी शृङ्गाटकी द्रोणी वर्षाभूदभरेणुका ।
मधुपर्णी विदार्यैद्वे महाक्षीरा महातपाः ।।४५
धन्वनः सहदेवाह्त्रा कटुकैरण्डकं विषः ।
पर्णी शताह्वा मृद्वीका फल्गु खर्जरयष्टिकाः ।।४६

शुक्रातिशुक्रकाश्मर्यं छत्रातिच्छत्रवीरणाः ।
इक्षुरिक्षुविकाराश्च फाणिताद्याश्च सत्तम ।।४७
सिंही च सहदेवी च विश्वेदेवाश्वरोधकम् ।
मधुकं पुष्पहंसाख्या शतपुष्पा मधूलिका ।।४८
शतावरीमधूकेच पिप्पलन्तालमेव च ।
आत्मगुप्ता कट्फलाख्यादार्विका राजशीर्षकं ।।४९

एक राजा का परम कर्त्तव्य होता है कि सभी प्रकार की वनस्पतियों का सञ्चय अपने पुर में न करे। उनमें कुछ नामों का उल्लेख यहाँ पर किया जाता है—जीव कर्षभ—काकोल–आमलकी–आटरूषक—शालपर्णी–पृष्ठ पर्णी–मुद्गपर्णी–माषपर्णी–मदद्व—सारिवा दोनों प्रकार की–तीनों वलाऐं–वारा–श्वसन्ती–वृष्या–वहती–कण्ट कारिका–शृङ्गी–शृङ्गारकी–द्रोणी—वर्षाभदर्भरेणुका–मधुपर्णी–दोनों विदारी—महाक्षीरा–महातपा—धन्वन—सहदेवी नाम धारिणी–कटुक–ऐरण्डक–विष–पर्णी–शतानाम वाली–गृद्वीका–फल्गु–सर्जरयाष्टका–शुक्रातिशुक्र का–अश्मरी—छत्राति छत्रका—वीरणा–इक्षु—इक्षु विकार—फाणिता आदि—सिंह—सहदेवी—विश्वेदेवा—अश्वरोधक—मधुक—पुष्पहस नाम वाली—शतपुष्पा—मधूलिका—शतावरी—मधूक—पिप्पल—ताल—आत्म गुप्ता—कटुफला—दार्विका–राजशीर्षको ॥ ४३–४९ ॥

राजसर्षपधान्याकमृष्यप्रोक्ता तथोत्कटा ।
कालशाकं पद्मवीजं गोवल्ली मधुवल्लिका ।।५०
शीतपाकी कुवेराक्षी काकजिह्वोरुपुष्पिका ।
पर्वतपुत्रसौ चोभौ गुञ्जातकपुनर्नवे ।।५१
कसेरु कारुकाश्मीरी बल्या शालक केसरम् ।
तुषधान्यानि सर्वाणि शमीधान्यानि चैव हि ।।५२
क्षीरं क्षौद्रन्तथा तक्र तैलं मज्जा वसा घृतम् ।
नीपश्चारिष्टकाक्षोड़वातामसामबाणकम् ।।५३

एवमादीनि चान्यानि विज्ञेयो मधुरोगणः ।
राजा सञ्चिनुयात्सर्वं पुरे निरवशेषतः ॥५४
दाडिमाम्रातकौ चैव तिन्तिड़ीकाम्लवेतसम् ।
भव्यकर्कन्धुलकुचकरमर्द्दकरूषकम् ॥५५
बीजपूरककण्डूरे मालतीराजबन्धुकम् ।
कोलकद्वयपर्णानि द्वयोराम्नातयोरपि ॥५६

राज सर्षप—धान्याक—मृष्यप्रोक्त—उत्कटा—काल शाक—पद्म बीज—गोवल्ली—मधुवल्लिका—शीतपाकी—कुबेराक्षी—काक जिह्वा—उरु पुष्पिका—पर्वत—त्रयुष—गुञ्जा तक—पुनर्नवा दोनों—कसेरु—कारु काश्मीरी—बल्या—शालूक—केसर—सब तुष धान्य—क्षीर—क्षौद्र—तक्र—तैल—बसा—मज्जा—घृत—नीप—अरिष्टक—क्षोड़ वाताय—सोमवाणक—इस प्रकार के धान्य मधुरोगण—इस सभी का पूर्ण रूप से सञ्चय राजा को करना आवश्यक है ।। ५०, ५१, ५२, ५३, ५४ ।। दाड़िम—आम्रातक—तिन्तिड़ीक—आम्लवेतस—भव्य कर्कन्धु—लकुच—करमर्द्द—करूषक—बीजपूरक—कण्डुर—मालती—राजबन्धुक—दोनों कोलक पर्ण—दोनों आम्नात ।। ५५, ५६ ।।

पारावतं नागरकं प्राचानोलकमेव च ।
कपित्थामलकं चुक्रफलन्दन्तशठस्य च ॥५७
जाम्बवं नवनीतञ्च सौवीरकतुषोदके ।
सुरासवञ्च मद्यानि मण्डतक्रदधीनि च ॥५८
शुक्लानि चैव सर्वाणि ज्ञेयमम्लगणं द्विज ।
एवमादीनि चान्यानि राजा सञ्चिनुयात्पुरे ॥५९
सैन्धोद्भिदपाठेयपाक्यसामुद्रलोमकम् ।
कुप्यसौवर्चलविड़ं बालकेय यवाह्वकम् ॥६०
और्वं क्षारं कालभस्म विज्ञेयो लवणोगणः ।
एवमादीनि चान्यानि राजा सञ्चिनुयात्पुरे ॥६१

पिप्पली पिप्पलीमूलचव्यचित्रकनागरम् ।
कुवेरकं मरिचकं शिग्रुभल्लातसर्षपाः ॥६२
कुष्ठाजमोदाकिणिहीहिङ्गुमूलकधान्यकम् ।
कारवीकुञ्जिका याज्या सुमुखा कालमालिका ॥६३

पारावत-नागरक-प्राचीनोलक—कपित्थ—आमलक—चुक्रफल-दन्तशठ—जाम्बव—नवनीत—सौवीरक—रुषोदक-सुरा-आसव—मद्य-मण्ड—तक्र—दधि—सब शुक्ल पदार्थ—हे द्विज! और अम्लगण इस प्रकार के सभी पदार्थों का सञ्चय राजा को अपने पुर में करना चाहिए। सैन्धोद्भिद—पाठेय—पाक्य—सामुद्र—लोमक—कुप्य—सौवर्चल-विड़-बालकेय—यवाह्वक—और्व—क्षार—कालभस्म लवण गण- इस भाँति के पदार्थों का पूर में संग्रह राजा को करना आवश्यक है। पिप्पली—पिप्पली मूल—चव्य—चित्रक-नागर-कुवेरक-मरिच-शिग्रु-भल्लातक-सर्षप—कुष्ठ—अवमोद—आकिणि—हिङ्गु—मूलक—धान्यक-कारवी-कुञ्जिका—याज्या—सुमुखा—काल मालिका—।।५७-६ ।।

फणिज्जकोथलशुनं भूस्तृणां सुरसन्तथा ।
कायस्था च वयस्था च हरितालं मनःशिला ॥६४
अमृता च रुदन्ती च रोहिषं कुङ्कुमन्तथा ।
जया एरण्डकाण्डीरं सल्लकीहञ्जिका तथा ॥६५
सर्वपित्तानि मूलाणि प्रायोहरितकानि च ।
फलानि चैव हि तथा सूक्ष्मैला हिङ्गुपत्रिका ॥६६
एवमादीनि चान्यानि गणः कटुकसंज्ञितः ।
राजा सञ्चिनुयाद्दुर्गे प्रयत्नेन नृपोत्तम ! ॥६७
मुस्तञ्चन्दनह्रीवेरकृतमालकदारवः ।
दारिद्रानलदाशारनक्तमालकदम्बकम् ॥ ६८
दूर्वा पटोलकटुका दीर्घत्वक् पत्रकं वचा ।
किराततिक्तभूतुम्बी विषा चातिविषा तथा ॥६९

तालीसपत्रतगरं सप्तपर्णविकङ्कताः ।
काकोदुम्वरिका दिव्या तथा चैव सुरोद्भवा ॥७०

फणिज्ज, कोथ, लशुन, भूस्तृण, सुरस, कायस्थ, वयस्थ, हरिताल, मैनशिल, अमृता, रुदन्ती, रोहिष, कुंकुम, जया ऐरण्ड, काण्डीर, सल्लकी, हञ्जिका, सभी पित्ता, मूत्र, प्रायोहरितक, फल, सूक्ष्मएला, हिंगुपट्टिका इस प्रकार के सब धान्य और कटुक संज्ञा वाला गण । हे नृपोतम ! राजा को अपने दुर्ग में सबका सञ्चय करना चाहिए । मुस्त, चन्दन, ह्रीवेर, कृतमालक, दारु, दरिद्र, अनलद, उशीर, नक्तमाल, कदम्बक, दूर्वा, पटोल, कटुका, दीर्घत्वक्, पत्रक, वचा, किरात, तिक्त, भूतुम्बी, विषा, अतिविषा, तातीस पत्र, तगर सप्तपर्ण, विकङ्कता, काकदुम्बरिका, दिव्या, सुरोद्भवा ॥ ६४-७०॥

षड्ग्रन्था रोहिणी मांसी पर्पटश्चाथ दन्तिका ।
रसाञ्जन भृङ्गराजं पतङ्गो परिपेलवम् ॥७१
दुःस्पर्शा गुरुणी कामा श्यामाकं गन्धनाकुली ।
रूपपर्णी व्याघ्रनख मञ्जिष्ठा चतुरङ्गुला ॥७२
रम्भा चैवांकुरास्फोता तालास्फोता हरणुका ।
वेत्राग्र वेतसस्तुम्बी विषाणी लोध्रपुष्पणी ॥७३
मालतीकरकृष्णाख्य वृश्चिका जीविता तथा ।
पर्णिका च गुडूची च सगणस्तिक्तसञ्ज्ञक: ॥७४
एवमादीनि चान्यानि राजा सञ्चिनुयात्पुरे ।
अभयामलके चोभे तथैव च बिभीतम् ॥७५
प्रियङ्गु धातकी पुष्पं मोचाख्या चार्जुनासनाः ।
अनन्तास्त्रीतुवरिका स्योनाङ्कट्फलन्तथा ॥७६
भूर्जपत्रं शिलापत्रं पाटलापत्रलोमकम् ।
समङ्गात्रिवृतामूलकार्पासगैरिकाञ्जनम् ॥७७

षड्ग्रन्था, रोहिणी, मांसी, पर्पट, दन्तिका, रसाञ्जन, भृङ्गराज,

पतङ्गी, परिपेलव, दु:स्पर्शा, गुरुणी, कामा, श्यामाक, गन्धनाकुली, रूपपर्णी. व्याघ्रनख, मजिष्ठा, चतुरगुला, रम्भा, अंकुगारफोता, तालास्फोता, हरेणुका, वेत्राग्र, वेतेस, तुम्बी, विषाणी, लोध्रपुष्पिणी, मालती, करकृष्णा, वृश्चिका, जीविता, पर्णिका, गुडूची, सगण, तिक्त संज्ञावाला,इसतरह के सभी पदार्थों का सञ्चय राजा को अपने पुरमें करना चाहिए। अभया, आमलक, विभीतक, प्रियगु, धातकी, पुष्प मोच, अर्जुनासन, अनन्ता स्त्री, तुवरिका स्योना, कटुफल, भूर्जपत्र, शिलापत्र, पाटला पत्र, लोमक, समङ्गा, त्रिवृतामूल; कार्पास, गैरिक, अञ्जन ॥ ७१-७७ ॥

विद्रुमं स मधूच्छिष्टंकुम्भिकाकुमुदोत्पलम् ।
न्यग्रोधोदुम्बराश्वत्थकिंशुकाः शिंशुपा शमी ॥७८
प्रियालपीलुकासारिशिरीषाः पद्मकस्तथा ।
विल्वोऽग्निमन्थः प्लक्षञ्च श्यामाकश्च वको घनम् ॥७९
राजादनं करीरञ्च धान्यकं प्रियकस्तथा ।
कङ्कोलाशोकबदराः कदम्बखदिरद्वयम् ॥८०
एषां पत्राणि साराणिमूलानि कुसुमानिच ।
एवमादीनिचान्या निकषायाख्योमतोरसः ॥८१
प्रयत्नेन नृपश्रेष्ठ ! राजा सञ्चिनुयात्पुरे ।
कीटाश्च मारणे योग्या व्यङ्गतायां तथैवच ॥८२
वातधूमाश्च मार्गाणां दूषणानि तथैव च ।
धार्याणि पार्थिवैर्दुर्गे तानि वक्ष्यामि पार्थिव ॥८३
विषाणां धारणं कार्यं प्रयत्नेन महीभुजा ।
विचित्राश्चाङ्गदा धार्या विषस्य शमनास्तथा । ८४

विद्रुम---मधूच्छिष्ट—कुम्भिका—कुमुदोत्पल-न्यग्रोध-उदुम्बर-अश्वत्थ—किंशुक—शिंशुप—शमी-प्रियाल – पीलुक—सारि—शिरीष—पद्मक—बिल्व—अग्निमन्थ—प्लक्ष—श्यामाक—वक—घन--राजादन-

करीर–धान्यक–प्रियक–कंकोल—अशोक—वदर–कदम्ब--खदिर—इनके पत्र–सार–मूल और कुसुम इस प्रकार के तथा अन्य आदि कषाय नाम वाला रस माना गया है। हे नृपों में परमश्रेष्ठ ! राजा को चाहिए इन सबका प्रयत्नपूर्वक अपने पुर में सञ्चय करे। व्यङ्गता में मारण में योग्य कीट— मार्गों के वातधूम तथा दूषण राजाओं को दुर्ग में रखने चाहिए हे पार्थिव ! उनको मैं बतलाऊँगा। महीभुज को प्रयत्न पूर्वक विषों को धारण करना चाहिए। त्रिचित्र अङ्गद तथा विष के शमन करने वाले भी रखने चाहिए ॥७८–८४॥

रक्षोभूततपिशाचघ्नाः पापघ्नाः पुष्टिवर्धनाः।
कलाविदश्च पुरुषाः पुरे धार्याः प्रयत्नतः ॥८५
भीतान् प्रमत्तान् कुपितांस्तथैव च विमानितान्।
कुभृत्यान् पापशीलांश्च न राजा वासयेत्पुरे ॥८६
यन्त्रायुधाट्टालचयोपपन्नं समग्रधान्योषधिसम्प्रयुक्तम्।
वणिग्जनैश्च वृतमावसेत दुर्गं सुगुप्तं नृपतिः सदैव ॥८७

राजा के द्वारा अपने पुर में राक्षस, भूत और पिशाचों के हनन करने वाले–पापों का विनाश करने वाले—पुष्टि के बढ़ाने वाले कलाओं के वेत्ता पुरुष प्रयत्न पूर्वक रखने चाहिए। ॥८५॥ जो पुरुष भीत-- प्रमत्त—कुपित--विमानित—पापशील और कुभृत्यों को अपने पुर में कभी नहीं बसाना चाहिए ॥८६॥ अनेक आयुध—अट्टालिकाओं के समूह से उपपन्न तथा सम्पूर्ण धन्य एव औषधियों से संयुत–वणिग्जनों के द्वारा समाकीर्ण और भलीभाँति रक्षित दुर्ग में ही राजा को सदैव निवास करना चाहिए ॥८७॥

९६—राजधर्म वर्णन (१)

रक्षोघ्नानि विषघ्नानि यानि धार्याणि भूभुजा ।
अगदानि समाचक्ष्व तानि धर्मभृताम्वर ! ॥१
विल्वाटकी यवक्षारं पाटलावाह्लिकोषणाः ।
श्रीपर्णी शल्लकीयुक्तोनिक्वाथः प्रोक्षणंपरम् ॥२
सविषं प्रोक्षित तेन सद्यो भवति निर्विषम् ।
यवसन्धवपानीयवस्त्रशय्यासनोदकम् ॥३
कवचाभरणं छत्रं बालव्यजनवेश्मनाम् ।
शेलु: पाटलातिविषा शिग्रुमूर्वा पुनर्नवा ॥४
समङ्गावृषमूलञ्च कपित्थवृषशोणितम् ।
महादन्तशठन्तद्वत् प्रोक्षणं विषनाशनम् ॥५
लाक्षाप्रियंगु मञ्जिष्ठा सममेला हरेणुका
यष्टच्याह्वा मधुरा चैव बभ्रु पित्तेनकल्पिताः ॥६
निखनेद्गोविषाणस्थं सप्तरात्रं महीतले ।
ततः कृत्वा मणिं हेम्ना बद्धं हस्तेन धारयेत् ॥७

महर्षि मनु ने कहा—हे धर्मधारियों में परमश्रेष्ठ ! राक्षसों के हनन करने और विषों का नाश करने वाले भी राजा को धारण करने अर्थात् रखने चाहिए उन अगदों को आप बतलाइये ॥१॥ श्रीमत्स्य भगवान् ने कहा—विल्वाटकी, यवक्षार, पाटला, वाह्लिल कोषणा, श्रीपर्णी और शल्लकी इनका क्वाथ सर्वश्रेष्ठ प्रोक्षण होता है। यदि कोई भी विषयुक्त हो तो उससे प्रोक्षित होकर वह तुरन्त ही निर्विष हो जाया करता है। यव, सैन्धव, पानी, वस्त्र, शय्या, आसन, उदक, कवचाभरण, वाल व्यंजन, वेश्म, इनके विष का नाश शेलु, पाटल, अतिविषा, शिग्रु, मूर्वा, पुनर्नवा, समङ्गा, वृषमूल, कपित्थ, वृषशोणित और महादन्तशठ इन सबके उसी भाँति प्रोक्षण करने से हो जाया करता है ॥ २ । ३ । ४

। ५ ।। लाक्षा, प्रियङ्गु, मञ्जिष्ठा, ये सब समान भाग और एला (इलायची), हरेणुका, यष्टि नामवाली, मधुरा बभ्रुपित्त से कल्पित कर रखे । इसके अनन्तर मणि को हेम से बद्ध करके हाथ में धारण करना चाहिये ।। ६, ७ ।।

संसृष्टं सविषन्तेन सद्यो भवति निर्विषम् ।
मनोह्वया शमीपत्रं तुम्बिका श्वेतसर्षपा: ।।८
कपित्थकुष्ठमञ्जिष्ठा: पित्तेन श्लक्ष्णकल्पिता: ।
शुनो गो: कपिलांश्च सौम्याक्षिप्तोऽपरोगद: ।।९
विषजित् परमं कार्यं मणिरत्नञ्च पूर्ववत् ।
मूषिका जतुका चापि हस्ते बद्धा विषापहा ।।१०
हरेणमांसी मञ्जिष्ठा रजनी मधुकामधु ।
अक्षत्वक् सुरस लाक्षा श्वपित्तं पूर्ववद्भुवि ।।११
वादित्राणि पताकाश्च पिष्टैरेतै: प्रलेपिता: ।
श्रुत्वा दृष्ट्वा समाघ्राय सद्योभवति निर्विष: ।।१२
त्र्युषणं पञ्चलवणं मञ्जिष्ठा रजनीद्वयम् ।
सूक्ष्मेलात्रिवृतापत्रं विडङ्गानीन्द्रवारुणी ।।१३
मधुकं वेतसं क्षौद्र विषाणे च निधापयेत् ।
तस्मादुष्णाम्बुना मावं प्रागुक्तं योजयेत्तत: । १४
शुक्लं सर्जरसोपेतसर्षपा एलवालुकै: ।।१५
सुवोगा तस्करसुरौ कुसुमैरर्जुनस्य तु ।
धूपो वासगृहे हन्ति विषं स्थावरजङ्गमम् ।।१६

इससे ससृष्ट सविष तुरन्त ही निर्विष हो जाया करता है। मनोह्वया, शमीपत्र, तुम्बिका, श्वेत सर्षप, कापित्थ, कुष्ठ, मञ्जिष्ठा, पित्त के द्वारा श्लक्ष्ण कल्पित किये हुए हे सौम्य ! कुत्ता, गौ और कपिला के लिये आक्षिप्त यह दूसरा अगद होता है ।। ८ । ९ ।। पूर्व की भाँति मणिरत्न परम विषजित् करना चाहिए । मूषिका और जतुका भी

हाथ में बाँधने पर विष के अपहरण करने वाली होती हैं ॥ १० ॥ हरेणु मांसी, मन्जिष्ठा, रजनी हल्दी ', मधुका, मधु, अक्षत्वक्, सुरस, लाक्षा (लाख)—इनको पूर्व की ही भाँति श्वान को पित्त लेकर पेषण करे करे और इनसे वादित्रों और पताकाओं पर प्रलेप करे तो श्रवण करके--देख करके और सूंघ करके तुरन्त ही विष से रहित हो जाया करता है। ॥ ११ । १२ ॥ व्युषण–पाँचों लवण–मजीठ—दोनों प्रकार की हल्दी—छोटी इलायची––त्रिवृतापत्र––बिड़ङ्ग—इन्द्र वारुणी–मधुक––त्रैलस और क्षौद्र—इन सबको विषाण में निधापित करो केवल उष्ण जल से पहिले बताये हुए को योजित करना चाहिए। शुक्लसर्ज रस से युक्त–सर्षप–और एलवालुकों से समन्वित–सुवोगा–तस्कर–सुर तथा अर्जुन वृक्ष के पुष्प इनके द्वारा निर्मित धूप निवास गृह में देवे तो स्थावर और जङ्गम दोनों के विष का हनन हो जाया करता है ॥१३-१६॥

न तत्र कीटा न विषन्दर्दुरा न सरीसृपाः ।
न कृत्या कर्मणाञ्चापि धूपोऽयं यत्र दह्यते ॥१७
कल्पितैश्चन्दनक्षीरपलाशद्रुमवल्कलैः ।
मूर्वैलावालुसरसानाकुलीतण्डलीयकैः ॥१८
क्वाथः सर्वोदकार्येषु काकमाचीयुता हितः ।
रोचनापत्रनेपालीकुङ्कुमैस्तिलकान् वहन् ॥१९
विषैर्न बाध्यते स्याच्च नरनारीनृपप्रियः ।
चूर्णैं र्हरिद्रामञ्जिष्ठाकिणिहीकणनिम्बजैः ॥२०
दिग्धं निर्विषतामेति गात्रं सर्वविषार्दितम् ।
शिरीषस्य फलं पत्रं पुष्पंत्वङ्मूलमेव च ॥२१
गोमूत्रघृष्टो ह्यगदः सर्वकर्मकरः स्मृतः ।
एकवीर ! महौषध्यः श्रृणु चातः परं नृपः ! ॥२२

जिस स्थान में इस धूप को जलाया जाता है वहाँ पर कोई भी कीट नहीं रहते हैं। न कोई विष का प्रभाव ही रहता है और दद्दुर

तथा सरीसृप भी नहीं रहा करते हैं। वहाँ पर कृत्या के भी कर्म्मों की स्थिति नहीं होती है ॥ १७ ॥ चन्दन, क्षीर, पलाश, द्रुम वल्कल, मूर्वा, एला, वालु, सरसा, नाकुली और तण्डुलीय इससे कल्पित क्वाथ जो कि काकमोची से युक्त हो तो वह सब उद कार्यों में हितप्रद होता है। रोचना पत्र, नेपाली और कुंकुम से युक्त तिलों को वहन करने वाला नर-नारी, नृप प्रिय कभी भी विषों से बाधित नहीं हुआ करता है। हरिद्रा, मजीठ, किण ही कण और निम्बज इनसे दिग्ध गात्र जो सब विषों से अर्दित हो शीघ्र ही निर्विषता को प्राप्त हो जाता है। शिरीष वृक्ष के फल पत्र, पुष्प, त्वचा और मूल इन पाँचों अङ्गों को गोमूत्र के साथ पीस डाले तो यह सब काम करने वाला अगद हो जाता है—ऐसा कहा गया है। हे एक वीर! हे नृप! इससे भी परम महौषधियों के विषय में मुझसे आप श्रवण कीजिए ॥१८-२२॥

बन्ध्या कर्कोटकी राजन् ! विष्णुक्रान्ता तथोत्कटा ।
शतमूली सितानन्दा बला मोचा पटोलिका ॥२३
सोमापिण्डा निशा चैव तथा दग्धरुहा च या ।
स्थले कमलिनी या च विशाली शङ्खमूलिका ॥२४
चण्डाली हस्तिमगधा गोऽजापर्णी करम्भिका ।
रक्ता चैव महारक्ता तथा वर्हिशिखा च या ॥२५
कोशातकी नक्तमालं प्रियालञ्च सुलोचनी ।
वारुणी वसुगन्धा च तथा वै गन्धनाकुली ॥२६
ईश्वरी शिवगन्धाच श्यामला वंशनालिका ।
जातुकाली महाश्वेता श्वेता च मधुयष्टिका ॥२७
वज्रकः पारिभद्रश्च तथा वै सिन्धुवारकाः ।
जीवानन्दा वसुच्छिद्रा नतनागरकण्टका ॥२८

हे राजन् ! बन्ध्या, कर्कोटकी, विष्णुक्रान्ता, उक्तटा, शतमूली, सितानन्दा, बला, मोचा, पटोलिका, सोमापिण्डा, निशा, दग्धरुहा, स्थल

कमलिनी, विशाली, शंख मूलिका, चण्डाली,[1] हस्ति मगधा, गोऽजापर्ण, करम्भिका, रक्ता, महारक्ता, वर्हिशिखा, कोशातकी, नक्तमाल, प्रियाल, सुलोचनी, वारुणी, वसुगन्धा, गन्धनाकुली, ईश्वरी, शिवगन्धा, श्यामला, वंशनालिका, जतुकाली, महाश्वेता, श्वेता, मधुयष्टिका, वज्रक, पारिभद्र, सिन्धुवारक, जीवानन्दा, वसुच्छिद्रा, नत नागर कण्टका ।। २३, २४, २५ २६, २७, २८ ।।

नालश्च जाली जातीच तथाच वटपत्रिका ।
कार्तस्वरं महानीला कुन्दुरुहं सपादिका ।।२९
मण्डूकपर्णी वाराही द्वे तथा तण्डुलीयके ।
सर्पाक्षी लवली ब्राह्मी विश्वरूपासुखाकरा ।।३०
रुजापहो वृद्धिकरी तथाचैव तु शल्यदा ।
पत्रिका रोहिणी चैव रक्तमाला महोषधी ।।३१
तथामलकवन्दाकं श्यामचित्रफला च या ।
काकोली क्षीरकाकोली पीलुपर्णी तथैव च ।।३२
केशिनी वृश्चिकालीच महानागा शतावरी ।
गरुडीच तथा वेगा जले कुमुदिनीतथा ।।३३
स्थले चोत्पलिनी या च महाभूमिलता च या ।
उन्मादिनीसोमराजीसर्वरत्नानिपार्थिव ।।३४
विशेषान्मरकतादीनि कीटपक्षं विशेषतः ।
जीवजाताश्च मणयः सर्वे धार्याः प्रयत्नतः ।।३५

नाल, जाली, जाती, वट पत्रिका, कार्त्त स्वर, महानीला, कुन्दुरुई, समादिका, मण्डूक पर्णी, वृद्धिकरी, शल्यदा, पत्रिका, रोहिणी, रक्तमाला, महोषधी, आमलक, मन्दाक, श्याम चित्रफला, काकोली, क्षीर काकोली, पीलुपर्णी, केशिनी, वृश्चिकाली, वाराही दोनों—तण्डुलीपक, सर्पाक्षी, लवली, ब्राह्मी, विश्वरूपा, सुखाकरा, सुरजापद, महानाभा, शतावरी, गरुड़ी, वेगा, जल में कुमुदिनी, स्थल में उत्पत्तिनी, महाभूमि-

लता, उन्मादिनी, सोमराजी, हे पार्थिव ! समस्त रत्न, विशेष रूप से मरकत आदि–विशेष रूप से कीटपक्ष, जीवजात और सब मणियाँ यत्नपूर्वक धारण करने चाहिए ।। २६–३५ ।।

रक्षोघ्नाश्च विषघ्नाश्च कृत्यावैतालनाशना: ।
विशेषान्नरनागाश्च गोखरोष्ट्रसमुद्भवाः ।।३६
सर्पतित्तिरगोमायुवस्त्र(क)मण्ठकजाश्च ये ।
सिहव्याघ्रर्क्षमार्जारद्वीपिवानरसंभवाः ।।
कपिञ्जला गजा वाजिमहिषैणभवाश्च ये ।।३७।।
इत्येवमेतैः सकलैरुपेतन्द्रव्यैश्च सर्वैः स्वपुरं सुरक्षितम् ।
राजा वसेत्तत्र गृहं सुशुभ्रं गुणान्वित लक्षणसंप्रयुक्तम् ।।३८

राक्षसों के हनन वाले—विष के नाशक, कृत्या और वैताल के नाश करने वाले—विशेष रूप से नर और नाग—गोखर उष्ट्रों समुद्भव वाले—सर्प, तित्तिर, गोमायु, वस्त्र और मण्डकज—सिह, व्याघ्र, ऋक्ष, मार्जार, द्वीपी और वानरों से समुत्पन्न–कपिञ्जल, गज, बाजि, महिष और एण से प्रसूत इस प्रकार से इन सबसे समुपेत तथा सब द्रव्यों के द्वारा सुरक्षित अपने पुर में राजा को निवास करना चाहिए जो कि राजा का गृह सुशुभ्र–गुणों से समन्वित और सभी सुन्दर लक्षणों से सम्प्रयुक्त होना चाहिए ।। ३६, ३७, ३८ ।।

६७–राजधर्म वर्णन (२)

राजरक्षारहस्यानि यानि दुर्गे निधापयेत् ।
कारयेद्वा महीभर्ता ब्रूहि तत्त्वानि तानि च ।।१
शिरीषोदुम्बरशमीवीजपूरं घृतप्लतम् ।
क्षुद्योगः कथितो राजन् ! मासार्द्धं तु पुरातनैः ।।२

कशेरुफलमूलानि इक्षुमूलं तथा बिसम् ।
दूर्वाक्षीरघृतमण्ड: सिद्धोऽयं मासिकः परः ।।३
नर शस्त्रहतं प्राप्तो न तस्य मरणं भवेत् ।
कल्माषवेणुना तत्र जनयेत्तु विभावसुम् ।।४
गृहे त्रिरपसव्यन्तु क्रियते यत्र पार्थिव ! ।
नान्योऽग्निर्ज्वलते तत्र नात्र कार्याविचारणा ।।५
कार्पासस्था भुजङ्गस्य तेन निर्मोचनं भवेत् ।
सर्पनिर्वासने धूपः प्रशस्तः सतत गृहे ।।६
सामुद्रसैन्धवयवा विद्युद्दग्धा च मृत्तिका ।
तयानुलिप्तं यद्वेश्म नाग्निना दह्यते नृप ! ।।७

महर्षि मनु ने कहा—मही के भरण करने वाला अपने दुर्ग में जिन राज्य की रक्षा के रहस्यों को निधापित करे अथवा करावे आप कृपा करके उन तत्त्वों को बतलाइये ।। १ ।। श्रीमत्स्य भगवान् ने कहा—हे राजन् ! शिरीष, उदुम्बर, शमो, बीजपूर को घृत से प्लुत करे इसको पुरातन लोगों के द्वारा क्ष्युद्योग कहा गया है जो मास के अर्द्ध तक होता है ।। २ ।। कशेरु के फल और मूल, ईख का मूल, विस, दूर्वा, क्षीर घृत, से मण्ड मिद्ध होता है जो पर एवं मासिक होता है ।। ३ ।। शस्त्र से हत हुए नर को प्राप्त हो जावे तो उसका मरण नहीं होता है । जहाँ पर कल्माष वेणु से विभावसु का जनम करना चाहिए । हे पार्थिव ! जहाँ पर गृह में तीन बार अपसव्य किया जाता है । वहाँ पर अन्य कोई भी अग्नि नहीं जलती है--इस विषय में कोई विचारण करने की आवश्यकता नहीं है । कार्पास में स्थित हो तो उससे भुजङ्ग का निर्मोचन हो जाता है । यह धूप निरन्तर सर्पों के निर्वासन करने के कर्म्म में परम प्रशस्त होता है ।। ३, ४, ५, ६ ।। सामुद्र सैन्धव, यव, विद्युत से दग्ध मृत्तिका, इससे जो गृह अनुलिप्त किया जावे तो हे नृप ! वह वेश्म अग्नि से कभी भी दग्ध नहीं किया जाता है ।।७।।

दिवा च दुर्गे रक्ष्योऽग्निर्वाति वाते विशेषतः ।
विषाच्च रक्ष्योनृपतिस्तत्रयुक्तिनिबोधमे ।।८
क्रीड़ानिमित्तं नृपति र्धारयेन्मृगपक्षिणः ।
अन्न वै प्राक् परीक्षेत वह्नो चान्यतरेषु च ।।९
वस्त्रं पुष्पमलङ्कारं भोजनाच्छादनं तथा ।
नापरीक्षितपूर्वन्तु स्पृशेदपि महामतिः ॥१०
स्याच्चासौ वक्त्रसन्तप्तः सोद्वेगञ्च निरीक्षते ।
विषदोऽथ विषं दत्तं यच्च तत्र परीक्षते ।।११
स्रस्तोत्तरीयो विमनाः स्तम्भकुड्यादिभिस्तथा ।
प्रच्छादयति चात्मानं लज्जते त्वरते तथा ।।१२
भुवं विलिखति ग्रीवां तथा चालयते नृप ! ।
कण्डूयति च मूर्द्धानं परिलोड्याननन्तथा ।।१३
क्रियासु त्वरितो राजन् ! विपरीतास्वपि ध्रुवम् ।
एवमादीनि चिह्नानि विषदस्य परीक्षयेत् ।।१४

दिन के समय में दुर्ग में अग्नि की रक्षा करनी चाहिए । विशेष रूप से उस समय में रक्षा करनी आवश्यक है जब वायु वहन किया करता है । खास तौर से नृपति की सुरक्षा अवश्य ही करनी चाहिए । इसमें जो युक्ति अमल में लाई जावे उसको भी तुम मुझसे समझ लो । ।। ८ ।। क्रीड़ा के निमित्त राजा को मृगों और पक्षियों को धारण करना चाहिये । सर्व प्रथम अग्नि में अन्न की परीक्षा कर लेनी अत्यावश्यक है । अन्य तर पदार्थों में भी वस्त्र, पुष्प, अलङ्कार, भोजन तथा आच्छादन इन सबका महान् मति वाले राजा को पहिले भली भाँति परीक्षा किये बिना कभी भी स्पर्श नहीं करना चाहिए ।। ९, १० ।। यह वक्त सन्तप्त होने और उद्वेग के सहित विपत्तियों को देखता है । वहाँ पर दिये हुये विष की जो परीक्षा करता है अपने उत्तरीय वस्त्र को छोड़ देने वाला— उदास स्तम्भ कुड्य आदि से अपने आपको ढक लिया करता है अर्थात्

छिपा लिया करता है और उसी प्रकार से लज्जा करता है एवं शीघ्रता किया करता है ।। ११, १२।। हे नृप ! भूमि पर लिखता है-गरदन को घुमाया करता है-मस्तक को खुजलाता है और अपनी आत्मा का परिलोड़न किया करता है तथा हे राजन् ! इन विपरीत क्रियाओं में भी निश्चय ही शीघ्रता वाला होता है । इसी तरह के जो चिह्न होते हैं उन विपद के लक्षणों की परीक्षा करनी चाहिए।। १३, १४ ।।

समीपैर्विक्षिपेद्वह्नौ तदन्नं त्वरयान्वितैः ।
इन्द्रायुधसवर्णन्तु रूक्षं स्फोटसमन्वितम् ।।१५
एकावर्तन्तु दुर्गन्धि भृशञ्चटचटायते ।
तद्धूमसेवनाज्जन्तोः शिरोरोगश्च जायते ।।१६
सविषेऽऽन्ने विलीयन्ते न च पार्थिव ! मक्षिकाः ।
निलीनाश्च विपद्यन्ते संस्पृष्टे सविषे तथा ।।१७
विरज्यति चकोरस्य दृष्टिः पार्थिवसत्तम ! ।
विकृतिञ्च स्वरो याति कोकिलस्यतथानृप ! ।।१८
गतिस्खलति हंसस्य भृङ्गराजश्च कूजति ।
क्रौञ्चो मदमथाभ्येति कृकवाकुर्विरौति च ।।१९
विक्रोशतिशुकोराजन् ! सारिकावमतेततः ।
चामोकरोऽन्यतोयातिमृत्युं कारण्डवस्तथा ।।२०
मेहते वानरो राजन् ! ग्लायते जीवजीवकः ।
हृष्टरोमा भवेद्बभ्रुः पृषतश्चैव रोदिति ।।२१

समीप में स्थित लोगों का त्वरा से समन्वित होते हुए ही उस अन्न को अग्नि में प्रक्षिप्त कर देना चाहिए । इन्द्रायुध के वर्ण के समान-रूक्ष, स्फोट से संयुत, एकावर्त्त, दुगन्ध से युक्त होकर अत्यन्त चर-चर ध्वनि किया करती है । उसके धूम के सेवन से जन्तु के शिर में वेदना और रोग समुत्पन्न हो जाया करता है ।। १५, १६ ।। हे पार्थिव ! विष से युक्त अन्न में मक्खियाँ विलीन नहीं हुआ करती हैं तथा सविष अन्न

के संस्पर्श होने पर वे मक्षिकाऐं उसी में विलीन हो जाया करती हैं। ।। १७ ।। हे पार्थिव श्रेष्ठ ! चकोर पक्षी की दृष्टि विगत अर्थात् हीनता को प्राप्त हो जाया करती है। हंस की गति जो कि अति प्रशंसनीय होती है स्खलित हो जाया करती है--भृङ्गराज कूजन करता है। क्रौञ्च मद को प्राप्त हो जाता है और कृकवाकु विरुत करने लगता है। हे राजन् ! शुक विक्रोशन करता है--सारिका वमन करती है। चामीकर अन्य ओर जाता है--कारण्डव मृत्यु को प्राप्त होता है--हे राजन् ! वानर मेहन करता है--जीव जीवक ग्लानि करता है--वभ्रु हृष्ट रोमों वाला होता है और पृषत रुदन करता है ।। १८-२१ ।।

हर्षमायाति च शिखी विषसन्दर्शनान्नृप ! ।
अन्नञ्च सविषं राजश्चिरेण च विपद्यते ।।२२
तदा भवति निःश्राव्यं पक्षपर्पुषितोपमम् ।
व्यापन्नरसगन्धञ्च चन्द्रिकाभिस्तथा युतम् ।।२३
व्यञ्जनानान्तु शुष्कत्वं द्रवाणां बुद्बुदोद्भवः ।
ससैन्धवानां द्रव्याणांजायतेफेनमालिता ।।२४
सस्यराजिश्च ताम्रा स्यात् नीला च पयसस्तथा ।
कोकिलाभा च मद्यस्य तोयस्य च नपोत्तम ! ।। २५
धान्याम्लस्य तथा कृष्णा कपिला कोद्रवस्य च ।
मधुश्यामा च तक्रस्य नीला पीता तथैव च ।।२६
घृतस्योदकसङ्काशा कपोताभा च सत्तनुः ।
हरिता माक्षिकस्यापि तैलस्यच तथारुणा ।।२७
फलानामप्यपक्वानां पाकः क्षिप्रं प्रजायते ।
प्रकोपश्चैव पक्वानां माल्यानां म्लानता तथा ।।२८

हे नृप! विष के संदर्शन से शिखी हर्षको प्राप्त होता है। हे राजन्! विष के सहित अन्न चिरकाल में विपन्न करता है। उस समय में निःश्राव्य — व्यापन्न रस और गन्ध से युक्त — चन्द्रिकाओं से समन्वित और

पक्ष पर्युषितोपम हो जाता है ।।२२, २३।। व्यञ्जनों में शुष्कता—द्रव पदार्थों में बुद्बुदों की उत्पत्ति और जो सैन्धव से युक्त पदार्थ हैं उनमें फेन मालिता उत्पन्न हो जाया करती है । जो सस्यों राजि है ताम्र वर्ण वाली और पय की आभा नीली हो जाती है । मद्य एवं तोय की आभा कोकिला के तुल्य हो जाया करती है । हे नृपोत्तम ! धान्याम्ल की कृष्ण और कोद्रव की कपिल—तक्रकी मधुश्याम, नील, पीत, हो जाया करती है। घृत की उदक के समान तथा कपोत जैसी आभा हो जाती है । माक्षिक (शहद) की हरी एवं तैल की अरुण आभा होती है । जो फल अपवच होते हैं उन पर प्रकोप होता है तथा माल्यों की म्लानता हो जाया करती है ।।२४-२८।।

मृदुता कठिनानां स्यात् मृदूनाञ्च विपर्ययः ।
सूक्ष्माणां रूपदलनं तथा चैवातिरङ्गता ॥२९
श्याममण्डलता चैव वस्त्राणां वै तथैवच ।
लोहानाञ्च मणीनाञ्च मलपङ्कोपदिग्धता ।।३०
अनुलेपनगन्धानां माल्यानाञ्च नृपोत्तम ।
विगन्धता च विज्ञेयातथा राजन् ! जलस्य तु ।।३१
दन्तकाष्ठत्वचः श्यामास्तनुसत्वास्तथैव च ।
एवमादीनि चिह्नानि विज्ञेयानि नृपोत्तम ! ।।३२
तस्माद्राजा सदा तिष्ठेत् मणिमन्त्रौषधागणैः ।
उक्तैः सरक्षितो राजा प्रमादपरिवर्जकः ॥३३
प्रजावरोर्मूलमिहावनीशस्तद्रक्षणाद्राष्ट्रमुपैति वृद्धिम् ।।
तस्मात्प्रयत्नेन नृपस्य रक्षा सर्वेण कार्या रविवंशचन्द्र !।३४

जो कठिन एवं कठोर द्रव्य हैं उनमें कोमलता और जो स्वभाव से ही मृदु पदार्थ हैं उनमें विपर्यय हो जाया करता है । सूक्ष्म पदार्थों के रूप का दलन होता है तथा अतिरङ्गिता आ जाया करती है । वस्त्रों में श्याम मण्डलता होती है । सर्व प्रकार के लोह और मणियों में मल के

पङ्क की उपदिग्धता हो जाती है । हे नृपोत्तम ! जो अनुलेपन करने के द्रव्य हैं जिनमें सुन्दर गन्ध होती है उनमें और माल्यों में तथा जल में विगन्धता उत्पन्न हो जाया करती है । दन्तकाष्ठ की त्वचा श्याम और तनु सत्त्व हो जाती है । हे नृपोत्तम ! इस प्रकार से इन चिन्हों को जान लेना चाहिए । इसी कारण से राजा को सर्वदा मणि–मन्त्र और औषधों के गणों से संयुत होकर ही निवास करना चाहिए अथवा स्थित रहना चाहिए इन उक्त पदार्थों से अच्छी तरह से संरक्षित एवं प्रमाद से परिवर्जित राजा को होना चाहिए ।।२६-३३।। यहां पर अवनीश प्रजा के तरु का मूल होता है । उसका संरक्षण रहने से ही राष्ट्र वृद्धि को प्राप्त होता है । हे रविवंश चन्द्र ! इसी कारण से सब प्रकार के प्रयत्न से नृप की रक्षा करनी चाहिए ।।३४।।

६८—राजधर्म वर्णन (३)

राजन् ! पुत्रस्य रक्षा च कर्तव्या पृथिवीक्षिता ।
आचार्यश्चात्र कर्तव्यो नित्ययुक्तश्च रक्षिभिः ।।१
धर्मकामार्थशास्त्राणि धनुर्वेदञ्च शिक्षयेत् ।
रथे च कुञ्जरे चैनं व्यायामङ्कारयेत्सदा ।।२
शिल्पानि शिक्षयेच्चैनं नाप्तो मिथ्या प्रियं वदेत् ।
शरीररक्षाव्याजेन रक्षिणोऽस्य नियोजयेत् ।।३
नचास्य सङ्गो दातव्यः क्रुद्धलुब्धावमानितैः ।
तथा च विनयेदेनं यथा च यौवनगोचरे ।।४
इन्द्रियैर्नापकृष्येत सतां मार्गात्सुदुर्गमात् ।
गुणाधानमशक्यन्तु यस्य कर्तुं स्वभावतः ।।५
बन्धनं तस्य कर्तव्यं गुप्तदेशे सुखान्वितम् ।
अविनीतकुमारं हि कुलमाशु विशीर्यते ।।६

अधिकारेषु सर्वेषु विनीतं विनियोजयेत् ।
आदौ स्वल्पे ततः पश्चात्क्रमेणाथ महत्स्वपि ।।७

श्री मत्स्य भगवान् ने कहा—हे राजन् ! राजा को अपने पुत्र की रक्षा करनी चाहिये और रक्षा करने वालों के सहित नित्य युक्त यहाँ पर आचार्य को नियुक्त करना चाहिए ।।१।। उस पुत्र को धर्म—काम और अर्थ शास्त्रों को तथा धनुर्वेद की शिक्षा दिलवानी चाहिए। रथ में तथा कुञ्जर में भी दीक्षित करावे और सदा इस अपने पुत्र से व्यायाम करवाना चाहिए ।।२।। इस पुत्र को अनेक शिल्पों की शिक्षा दिलवावे । ऐसा प्रयत्न करे कि वहां आप्त अर्थात् सत्य वक्ता होवे और कभी उसे मिथ्या बोलने का अवसर ही न होवे । राजा के पुत्र के शरीर की रक्षा के मिष से रक्षियों को नियोजित करना चाहिए ।।३।। क्रुद्ध—लुब्ध और अपमानित हुए व्यक्तियों के साथ इस पुत्र का सङ्ग कभी भी न होने देवे । जैसे ही यह यौवन में पदार्पण करे इसको विनीत बनाना चाहिए ।।४।। सज्जनों के सुदुर्गम मार्ग से इन्द्रियों के द्वारा अपकृष्ट नहीं होने देवे । स्वभाव से ही अशक्य गुणों का आधान करना चाहिये। किसी गुप्त देश में सुख से समन्वित उसका बन्धन करना चाहिए। जो राज कुमार अविनीत होता है उसका कुल शीघ्र ही विशीर्ण हुआ करता है । सभी अधिकार के कार्यों में विनीत का नियोजन करना चाहिए। आदि में छोटे पद पर इसके पश्चात् क्रम से बड़े पदों पर भी नियुक्तियाँ करे ।।५, ६, ।।

मृगया पानसक्तांश्च वर्जयेत् पृथिवीपतिः ।
एतान्ये सेवमानास्तु विनष्टाः पृथिवीक्षतः ।।८
बहवो नरशार्दूल ! तेषां सङ्ख्या न विद्यते ।
दिवा स्वापं क्षितीशस्तु विशेषेणविवर्जयेत् ।।९
वाक्पारुष्यं न कर्तव्य दण्डपारुष्यमेव च ।
परोक्षनिन्दा च तथा वर्जनीया महीक्षिता ।।१०
अर्थस्य दूषणं राजा द्विप्रकारं विवर्जयेत् ।

अर्थानां दूषणञ्चैकं तथार्थेषु च दूषणम् ॥११
प्राकाराणां समुच्छेदो दुर्गादीनामसत्क्रिया ।
अर्थानां दूषणं प्रोक्तं विप्रकीर्णत्वमेव च ॥१२
अदेशकाले यद्दानमपात्रे दानमेव च ।
अर्थेषु दूषणं प्रोक्तमसत्कर्मप्रवर्तनम् ॥१३
कामः क्रोधोमदोमानो लोभो हर्षस्तथैव च ।
एते वर्ज्याः प्रयत्नेन सादरं पृथिवीक्षिता ॥१४

पङ्क के मिश्रित जल से स्नान, मही तोय से स्नान माता के उदर में प्रवेश करना, चिता पर समारोहण, शक्र ध्वज का गिरना, चाँद और सूर्य का पतन, दिव्यान्तरिक्ष भौमों का और उत्पानों का दर्शन, देव, द्विजाति, राजा और गुरु का क्रोध, कुमारियों का आलिङ्गन, पुरुष मैथुन, अपने गात्रों की हानि, विरेचन और वमन, दक्षिण दिशा की ओर गमन करना, व्याधि से अभिभव, फल की अप हानि, पुष्प हानि, गृहों का गिरना, गृह का सम्मार्जन, पिशाच, राक्षस, वानर, ऋक्ष और नरों के साथ क्रीड़ा करना, दूसरे से अभिभव और उससे ही व्यसन की उत्पत्ति, गेरुआ वस्त्रों का धारण करना, स्त्री के साथ क्रीड़न, स्नेह पान और अवगाहन तथा रक्त माल्य और अनुलेपन करना ये सब दुःस्वप्न होते हैं ।।८-१४।।

एवमादीनि चान्यानि दुःस्वप्नानि विनिर्दिशेत् ।
ऐषां सङ्कथनं धन्यं भूयः प्रस्वापनन्तथा ॥१५
कल्कस्नानन्तिलैं र्होमो ब्राह्मणानाञ्च पूजनम् ।
स्तुतिश्च वासुदेवस्य तथा तस्यैव पूजनम् ॥१६
नागेन्द्रमोक्षश्रवण ज्ञेयं दुःस्वप्ननाशनम् ।
स्वमास्तु प्रथमे यामे सम्वत्सरात्रपाकिनः ॥१७
षड्भिर्मास द्वितीये तु त्रिभिर्मासैस्तृतीयके ।
चतुर्थे मासमात्रेण पश्यतो नात्र सशयः ॥१८
अरुणोदयवेलायां दशाहेन फलम्भवेत् ।
एकस्यां यदि वा रात्रौ शुभं वा यदिवाशुभम् ॥१९
पश्चाद्दृष्ट यस्तत्रतस्यपाकविनिर्दिशेत् ।
तस्माच्छोभनकेस्वप्नेश्चात्स्वप्नोनपश्यति ॥२०

इसी प्रकार के तथा ऐसे ही अन्य दुःस्वप्न हुआ करते हैं—ऐसा ही विनिर्देश करना चाहिए। ऐसे दुःस्वप्नों का भली भाँति कथन तथा ऐसे स्वप्न देखकर फिर स्वपन करना अच्छा होता है इसका फल फिर बुरा नहीं रहा करता है। कल्क से स्नान, तिलों से होम और ब्राह्मणों का पूजन, भगवान् वासुदेव का स्तवन तथा उनका ही पूजन और गजेन्द्र मोक्ष की कथा का श्रवण करना—इनसे दुःस्वप्नों से होने वाले कुफल का नाश हो जाया करता है। स्वप्न यदि प्रथम ही याम होवे तो उसका फल एक वर्ष तक विपाक की दशा में पहुँचता है। दूसरे प्रहर में स्वप्न हो तो उसका फल छँ मास में होता है। तीसरे रात्रि के प्रहर में स्वप्न देखे तो तीन मासों में फल हुआ करता है और चौथे प्रहर में स्वप्न जो दिखाई देता है उसका फल एक मास में हुआ करता है इसमें कुछ भी संशय नहीं है। यदि अरुणोदय के समय में स्वप्न हो तो दश दिन में फल होता है। एक ही रात्रि में शुभ और अशुभ स्वप्न हो तो जो पीछे दिखाई देता है उसी का पाकनिर्दिष्ट करना चाहिए। इसी कारण से यदि कोई अच्छा

स्वप्न हो और पीछे स्वप्न नहीं देखता है तो अच्छा है अतएव अच्छा स्वप्न देखकर फिर सोना ही नहीं चाहिए ।।१५-२०।।

शैलप्रासादनागाश्ववृषभारोहण हितम् ।
द्रुमाणां श्वेतपुष्पाणां गमने च तथा द्विज ।।२१
द्रुमतृणोद्भवो नाभौ तथैव बहुबाहुता ;
तथैव बहुशीर्षत्व फलितोद्भव एव च ।।२२
सुशुक्लमाल्यधारित्वं सुशुक्लाम्बर धारिता ।
चन्द्रार्कताराग्रहणं परिमार्जनमेव च ।।२३
शक्रध्वजालिङ्गनञ्च तदुच्छ्रायक्रिया तथा ।
भूम्यम्बुधीनां ग्रसनं शत्रूणाञ्च बधक्रिया ।।२४
जयो विवादे द्युते च संग्रामे च तथा द्विज ! ।
भक्षणञ्चार्द्रमांसानां मत्स्यानां पायसस्य च ।।२५
दर्शनं रुधिरस्यापि स्नानं वा रुधिरेण च ।
सुरारुधिरमद्यानां पानं क्षीरस्य चाथवा ।।२६
अन्त्रैर्वा वेष्टनं भूमौ निर्मलं गगनं तथा ।
मुखेन दोहनं शस्त महिषीणां तथा गवाम् ।।२७
सिंहीनां हस्तिनीनाञ्च वडवानां तथैव च ।
प्रसादो देवविप्रेभ्यो गुरुभ्यश्च तथा शुभः ।।२८

अब अच्छे स्वप्नों के विषय में बतलाया जाता है—नागेन्द्र, शैल, अश्व, प्रासाद और वृषभ का समारोहण हितकर हुआ करता है। हे द्विज ! श्वेत पुष्पों वाले द्रुमों का गमन में आरोहण भी शोभन होता है। नाभि में द्रुम और तृणों का उद्भव तथा बहुत सी बाहुओं की उत्पत्ति हो जाना—बहुत सारे मस्तकों का होना और फलितोद्भव, सुन्दर शुक्ल मालाओं का धारण करना शुक्ल वस्त्रों का धारण, चन्द्र, सूर्य और तारा का ग्रहण, परिमार्जन, शक्र की ध्वजा का आलिङ्गन, उसके उच्छ्राय की क्रिया, भूमि तथा अम्बुधियों का ग्रसन, शत्रुओं के वध करने का कर्म,

विवाह, संग्राम और द्यून में जीत, आर्द्र माँस का भक्षण, मत्स्यों का भक्षण, पायस का खाना, रुधिर का दर्शन, रुधिर से स्नान, सुरा, रुधिर मद्य का पान करना अथवा क्षीर का पान, आँतों के द्वारा वेष्टन जो भूमि में हो, निर्मल गगन, मुख के द्वारा भैंसों तथा गौओं का दोहन प्रशस्त होता है। सिहनियों का, हथिनियों का और वड़वाओं का भी दोहन प्रशस्त है। देव तथा विप्रों की प्रसन्नता और गुरु वर्ग का प्रसाद भी शुभ होता है। ।।२१–२८।।

अम्भसा त्वभिषेकस्तु गवां शृङ्गाश्रितेन वा !
चन्द्राद् भ्रष्टेन वा राजन्! ज्ञेयो राज्यप्रदो हि सः ।।२६
राज्याभिषेकश्च तथाच्छेदनं शिरसस्तथा ।
मरण वह्निदाहश्च वह्निदाहो गृहादिषु ।।३०
लब्धिश्च राज्यलिङ्गानां तन्त्रीवाद्याभिवादनम् ।
तथोदकानां तरणं तथा विषमलङ्घनम् ।।३१
हस्तिनीवडवानाञ्च गवाञ्च प्रसवो गृहे ।
आरोहणमथाश्वानां रोदनञ्च तथाशुभम् ।।३२
वरस्त्रीणां तथालाभस्तथालिङ्गनमेव च ।
निगडैर्बन्धनं धन्यं तथा विष्ठानुलेपनम् ।३३
जीवितां भूमिपालानां सुहृदामपि दर्शनम् ।
दर्शनं देवतानाञ्च विमलानां तथाम्भसाम् ।।३४
शुभान्यथैतानि नरस्तुदृष्ट्वा प्राप्नोत्ययत्नाद्ध्रुवमर्थलाभम् ।
स्वप्नानि वै धमभृतां वरिष्ट ! व्याधेर्विमोक्षञ्च तथाऽऽतुरोऽपि। ।३५

जल के द्वारा अभिषेक का होना अथवा गौओं के शृङ्गों के आश्रित जल के द्वारा अभिषिञ्जन होना, हे राजम् ! चन्द्र से भ्रष्ट के द्वारा अभिषिचन का होना तो राज्य को प्रदान करने वाला ही जानना चाहिए ।।२६।। राज्याभिषेक का होना, शिर का छेदन हो जाना, मरण, अग्निका दाह, गृह आदि ये अग्नि के द्वारा दाह का हो जाना, राज्य के

चिन्हों की प्राप्ति का हो जाना, तन्त्री वाले वाद्यों का अभिवादन होना, जलों में तैरना, विषम स्थान का लङ्घन करना, गृह में हथिनी, वड़वा तथा गौओं का प्रसव होना, अश्वों पर समारोहण करना शुभ होता है। अच्छी स्त्रियों का लाभ करना तथा वरस्त्रियों का समालिङ्गन करना, निगड़ों के द्वारा बन्धन का होना, विष्ठा से अनुलेपन होना यह सब धन्य एवं शुभ होता है। जीवित भूमिपालों का तथा सुहृदों का दर्शन प्राप्त करना, दैव का दर्शन करना, विमल जलों का देखना ये सब परम शुभ स्वप्न हुआ करते हैं। मनुष्य इन ऐसे शुभ स्वप्नों को देख कर विना ही यत्न के किये ध्रुवरूप से अर्थ का लाभ प्राप्त किया करता है। हे धर्म-धारियों में वरिष्ठ ! आतुर हो कर भी व्याधियों का विमोक्ष होना शुभ स्वप्न होता है ॥३०–३५॥

१०६–यात्रा के समय मङ्गल-अमङ्गल सूचक शकुन वर्णन

गमनं प्रति राज्ञान्तु संमुखादर्शने च किम् ।
प्रशस्तांश्चैव सम्भाष्य सर्वानेतांश्चकीर्तय ॥१
औषधानि त्वयुक्तानिधान्यं कृष्णञ्चयद्भवेत् ।
कार्पासश्चतृणं राजन् ! शुष्कं गोमयमेवच ॥२
इन्धनञ्च तथाङ्गारं गुड़ं तैलं तथा शुभम् ।
अभ्यक्तं मलिनं मुण्डन्तथानग्नञ्च मानवम् ॥३
मुक्तकेशं रुजार्तञ्च काषायाम्बरधारिणम् ।
उन्मत्तकन्तथा सत्वं दीनञ्चाथ नपुंसकम् ॥४
अयः पङ्कस्तथा चर्म केशबन्धनमेव च ।
तथैवाद्धृतसाराणि पिण्याकादीनि यानि च ॥५
चण्डालश्वपचाश्चैव राजबन्धनपालकाः ।

वधकाः पापकर्माणो गर्भिणी स्त्री तथैवच ॥६
तुषभस्मकपालास्थिभिन्नभाण्डानि यानि च ।
रक्तानि चैव भण्डानि मृतंशार्ङ्गिकमेवच ॥७
एवमादीनि चान्यानि अशस्तान्यभिदर्शने ।
अशस्तो वाह्यशब्दश्च भिन्नभैरवजर्जरः ॥८

महर्षि मनु ने कहा—हे भगवान् ! जिस समय में राजा लोग गमन किया करते हैं तो समुख में दर्शन करने में क्या-क्या प्रशस्त हुआ करते हैं, यह बतलाकर इन सम्पूर्ण शकुनों का वर्णन कृपा करके करिये। ॥१॥ श्री मत्स्य भगवान ने कहा—हे राजन् ! अयुक्त औषध, कृष्ण धान्य, कपास, तृण, शुष्क गोमय, ईंधन, अङ्गार, गुड़, तैल ये सब शकुन शुभ हुआ करते हैं। अभ्यङ्ग किया हुआ, मलिन, मुण्ड, नग्न मानव, केशों को खुले हुए रखने वाला, रोग से आर्त्त, काषाय वस्त्रों के धारण करने वाला, उन्मत्त सत्त्व, दीन नपुन्सक, लोहापंक, चर्म, केशबन्धन, पिण्याक आदि सार वस्तुऐं बन्धन पालक, वधक, पाप कर्म करने वाले, गर्भिणी स्त्री, तुष, भस्म, कपाल, अस्थि, भिन्न भाण्ड, रक्त वर्ण के भाण्ड, मृत, शार्ङ्गिक इस प्रकार से इत्यादि अभिदर्शन में अशस्त होते हैं। वाह्य शब्द और भिन्न भैरव जर्जर शब्द भी अशस्त हुआ करता है ॥२—८॥

पुरतः शब्द एहीति शस्यते न तु पृष्ठतः ।
गच्छेति पश्चात् धर्मज्ञो ! पुरस्तात्तुविगर्हितः ॥९
क्व यासि तिष्ठमा गच्छकिन्तेतत्र गतस्य तु ।
अन्ये शब्दाश्च ये निष्ठास्तेविपत्तिकराअपि ॥१०
ध्वजादिषु तथास्थानं क्रव्यादानां विगर्हितम् ।
स्खलनं वाहनानाञ्च वस्त्रसङ्गस्तथैवच ॥११
निर्गतस्य तु द्वारादौ शिरसश्चाभिघातिता ।
छत्रध्वजानां वस्त्राणां पतनञ्च तथा शुभम् ॥१२
दृष्टे निमित्ते प्रथमममङ्गल्यविनाशनम् ।

केशवं पूजयेद्विद्वान् स्तवेन मधुसूनम् ।।१३
द्वितीये तु ततोदृष्ते प्रतीपे प्रविशेद्गृहम् ।
अथेष्टानि प्रवक्ष्यामि मङ्गालग्गानि तथाऽनाघ ! ।।१४

आगे की ओर से आओ—यह शब्द शस्त होता है पीछे की ओर से प्रशस्त नहीं होता है। हे धर्मज्ञ पीछे की ओर से 'गच्छ अर्थात् जाओ'—यह शब्द शस्त कहा गया है जो कि सामने गर्हित माना गया है। 'कहां जाते हो'–'रुकजाओ'–'वहा पर जाने से तुझको क्या प्रयोजन है'–ये इस तरह के तथा ऐसे ही अन्य शब्द जो होने हैं वे विपत्ति करने वाले भी हुआ करते हैं ।।६, १०।। क्रव्यादों राक्षसों का ध्वज आदि में स्थान गर्हित हुआ करता है। वाहनों का स्खलन, वस्त्र सङ्ग, द्वार आदि में निर्गमन करने वाले के शिर का अवघात तथा छत्र, ध्वज और वस्त्रों का पतन भी शुभ होता है। प्रथम में ही निमित्त के देखने पर अमङ्गल्य का विनाश होता है। विद्वान् पुरुष का कर्त्तव्य है कि भगवान् केशव का पूजन करे और मधुसूदन प्रभु का स्तवन करना चाहिये ।।६–१३।। हे अनघ ! फिर द्वितीय प्रतीप के देखने पर गृह में प्रवेश कर लेना चाहिए। इसके पश्चात् इष्ट मङ्गलों के विषय में मैं वर्णन करूंगा ।।१४।।

श्वेताः सुमनासःश्रेष्ठाःपूर्णकुम्भास्तथैव च ।
जलजाः पक्षिणश्चैवमांस मत्स्याश्चपर्थिव ! ।।१५
गावस्तुरङ्गमा नागा बद्ध एकःपशुस्त्वजः ।
त्रिदेशाः सुहृदो विप्रा ज्वलितश्च हुताशनः ।।१६
गणिका च महाभाग ! दूर्वा चार्द्रञ्च गोमयम् ।
रुक्मरूप्यन्तथा ताम्र सर्वरत्नानि चाप्यथ ।।१७
औषधानिव धर्मज्ञ ! यवाः सिद्धार्थकास्तथा ।
नृवाह्यमानं यानञ्च भद्रपीठन्तथैव च ।।१८
खङ्गं चक्रं पताका च मृदश्चायुधमेव च ।
राजलिङ्गानि सर्वाणि सर्वे रुदितवर्जिताः ।।१६

घृतं दधि पयश्चैव फलानिविविधानि च ।
स्वस्तिकं वर्द्धमानञ्च नन्द्यावर्तं सकौस्तुभम् ॥२०
वादित्राणां सुखः शब्दः गम्भीरः सुमनोहरः ।
गान्धारषड्जऋषभा ये च शस्तास्तथा खराः ॥२१

हे पार्थिव ! श्वेत पुष्प परम श्रेष्ठ होते हैं तथा पूर्ण कुम्भ भी परम शुभ हुआ करते हैं । जलज—पक्षीगण—मांस—मत्स्य—गौऐं—तुरङ्गम—नाग—वद्ध एक पशु—अज—त्रिदश—सुहृद विप्र—जलती हुई अग्नि—गणिका—ताम्र और हे महाभाग ! सब प्रकार के रत्न—हे धर्म्मज्ञ ! दूर्वा—आर्द्र गोमय—सुवर्ण–रूप्यक–औषध—यव–सिद्धार्थक–मनुष्यों के द्वारा वाह्यमान यान—भद्रपीठ—खङ्ग—चक्र—पताका—मृत्तिका—आयुध—सम्पूर्ण—राजा के चिह्न जो रुदित से रहित होवे । घृत—दधि—पय—विविध भाँति के फल—स्वस्तिक—वर्द्धमान–नन्द्यावर्त्त—कौस्तुभ—वादित्रों का सुखकर शब्द जो गम्भीर एवं मनोहर हो—गन्धार, षड्ड—ऋषभ जो कि शस्त्र तथा खर हैं ॥ १५, १६, १७ १८, १९, २०, २१ ॥

वायुः सशर्करोरूक्षः सर्वत्र समुपस्थितः ।
प्रातलोमस्तथा नीचो विज्ञेयोभयकृद्विज ! ॥२२
अनुकूलोमृदुः स्निग्धः सुखस्पर्शः सुखावहः ।
रूक्षारूक्षस्वराभद्राः क्राव्यादाः परिगच्छताम् ॥२३
मेघाः शस्ताघनाः स्निग्धागजवृहितसन्निभाः ।
अनुलोमास्तड़िच्छन्नाः शक्रचापन्तथैवच ।२४
अप्रशस्ते तथा ज्ञेये परिवेषप्रवषणे ।
अनुलोमा ग्रहाः शस्ता वाक्पतिस्तु विशेषतः॥२५
आस्तिक्यं श्रद्धानत्वं तथा पूज्याभिपूजनम् ।
शस्तान्येतानि धर्मज्ञ ! पञ्च स्यान्मनसः प्रियम् ॥२६
मनसस्तुष्टिरेवात्र परमं जयलक्षणम् ।

एकतः सर्वलिङ्गानि मनसस्तुष्टिरेकतः ।।२७
मनोत्सुकत्वं मनसः प्रहर्षः शुभस्य लाभो विजयप्रवादः ।
मङ्गल्यलब्धिः श्रवणञ्च राजन् ! ज्ञेयानि नित्यं विजयावहानि।।२८

धूलि के सहित रूक्ष वायु जो कि सभी जगह समुपस्थित है। हे द्विज ! जो प्रतिलोम और नीच है वह भय करने वाला ही समझना चाहिए। अनुकूल—कोमल—स्निग्ध—सुख देने वाले स्पर्श से युक्त—सुख का आवाहन करने वाला—रूक्ष—अरूक्ष स्वर—अभद्र—परिगमन करने वालों के क्रव्याद—हाथियों के बृंहित के सदृश घने, स्निग्ध मेघ प्रशस्त होते हैं। अनुलोम विद्युत से छन्न-शक्रचाप तथा परिवेष में प्रवर्षण प्रशस्त जानने चाहिए। जो ग्रह अनुलोम होते हैं वे प्रशस्त हुआ करते हैं और वाक्पति विशेष रूप से प्रशस्त माने गये हैं। आस्तिकता—श्रद्धानता—पूज्यगण का अभिपूजन—हे धर्मज्ञे ! ये सब प्रशस्त हुआ करते हैं और वह भी परम प्रशस्त माना गया है जो अपने मन के लिये अतिशय प्रिय होता है। यहाँ पर अपने मन की जो तुष्टि हुआ करती है वह ही परम जय का लक्षण हुआ करता है। एक ओर तो ये सभी चिह्न होते हैं और एक ओर अपने मन की तुष्टि हुआ करती है। मन की उत्सुकता अर्थात् उत्साह और मनमें होने वाला प्रहष यह ही शुभ का लाभ और विजय का प्रवाद होता है। मङ्गल्य की लब्धि और उसका श्रवण हे राजन् ! नित्य ही विजय के आवह करने वाले जानने चाहिए। ।। २२–२८ ।।

११०—वराहवतार के विषय में अर्जुन का प्रश्न

प्रादुर्भावान् पुराणेषु विष्णोरमिततेजसः ।
सतां कथयतां विप्र वाराह इति नः श्रुतम् ।।१
न जाने तस्यचरितं न विधिं नच विस्तरम् ।

न कर्मगुणसंस्थानं न चाप्यन्तंमनीषिणः ।।२
किमात्मको वराहोऽसौ किं मूर्त्तिः कास्य देवता ।
किं प्रमाणः किं प्रभावः किं वा तेन पुरा कृतम् ।।३
एतन्मे शंस तत्वेन वाराहं श्रुतिविस्तरम् ।
यथार्हञ्च समेतानां द्विजातीनां विशेषतः ।।४
एतत्ते कथयिष्यामि पुराणं ब्रह्मसम्मितम् ।
महावराहचरितं कृष्णस्याद्भुतकर्मणः ।।५
यथा नारायणो राजन् ! वाराहं वपुरास्थितः ।
दंष्ट्रया गां समुद्रस्थामुज्जहारारिमर्दनः ।।६
छन्दोगीर्भिरुदाराभिः श्रुतिभिःसमलङ्कृतः ।
मनः प्रसन्नतां कृत्वा निबोध विजयाधुना ।।७

अर्जुन ने कहा—हे विप्र ! अपरिमित तेज से युक्त भगवान् विष्णु के पुराणों में प्रादुर्भावों को कहने वाले सत्पुरुषों में हमने एक वाराह का भी प्रादुर्भाव सुना है ।। १ ।। उस वाराह का चरित्र मैं नहीं जानता हूँ और न तो उसकी कोई विधि ही मुझे मालूम है और न कुछ विस्तार का ही ज्ञान है । उनके कर्म और गुणों का संस्थान क्या था—यह भी मैं नहीं जानता हूं । उन अत्यन्त मनीषी प्रभु का तो अद्भुत ही कर्म—गुण संस्थान होगा ।। २ ।। यह वराह किस स्वरूप वाला प्रादुर्भाव था ? इनकी कैसी मूर्त्ति थी और इनका देवता कौन था ? इनका प्रमाण कितना था और क्या प्रभाव था तथा पहिले उन्होंने क्या किया था ? ।। ३ ।। श्रुति विस्तार इस वाराह को आप तात्त्विक रूप से मुझे सब बतलाइये ? विशेष रूप से ये एकत्रित हुए द्विजाति गण हैं इनके अनुसार जो भी योग्य हो श्रवण कराइये ।। ४ ।। श्री शौनक जी ने कहा—अद्भुत कर्म वाले भगवान् श्रीकृष्ण के इस महा वराह चरित्र को जो ब्रह्म सम्मित पुराण है मैं आपको कहूंगा ।। ५ ।। हे राजन् ! जिस प्रकार से भगवान् शत्रुओं के मर्दन करने वाले नारायण ने वाराह के वपु में समास्थित

होकर अपनी दाढ़ से इस समुद्र में स्थित भूमि को उठाकर इसका उद्धार किया था ।। ६ ।। छन्द, वाणी, उदार श्रुतियों से सम्यक् प्रकार से अलंकृत होकर तथा मन की प्रसन्नता करके अब उस विजय का ज्ञान करलो ।। ७ ।।

इदं पुराणं परमं पुण्यं वेदैश्च सम्मितम् ।
नानाश्रुतिसमायुक्तं नास्तिकाय न कीर्त्तयेत् ।।८
पुराणं वेदमखिलं साङ्ख्यं योगञ्च वेद यः ।
कार्त्स्न्येन विधिना प्रोक्तं सौख्यार्थं वै वदिष्यति ।।९
विश्वेदेवास्तथा साध्या रुद्रादित्यास्तथाश्विनौ ।
प्रजानां पतयश्चैव सप्त चैव महर्षयः ।।१०
मनः सङ्कल्पजाश्चैव पूर्वजा ऋषयस्तथा ।
वसवो मरुतश्चैव गन्धर्वा यक्षराक्षसाः ।।११
दैत्याः पिशाचाः नागाश्च भूतानि विविधानि च ।
ब्राह्मणाः क्षत्रियाः वैश्याः शूद्राः म्लेच्छाश्च ये भुवि।।१२
चतुष्पादानिसर्व्वाणि तिर्य्यग्योनिशतानि च ।
जङ्गमानिचसत्वानियच्चान्यज्जीवसंज्ञितम् ।।१३
पूर्णे युगसहस्रे तु ब्राह्मेऽहनि तथागते ।
निर्व्वाणे सर्वभूतानां सर्वोत्पातसमुद्भवे ।।१४

यह वराह पुराण परम पुण्यमय है और समस्त वेदों के सम्मत है । यह अनेक श्रुतियों से भी समायुक्त है । इसका कीर्त्तन किसी भी नास्तिक के समक्ष में नहीं करना चाहिए यह सम्पूर्ण पुराण वेद ही है । जो सांख्य और योग को जानता है वह पूर्ण विधि से कथित इसको सौख्य सम्पादन करने के लिये कहेगा ।। ८ । ९ ।। विश्वेदेवा, साध्य, रुद्र, आदित्य, अश्विनीकुमार और प्रजाओं के पतिगण सप्त महर्षि हैं । पूर्वज जो ऋषिगण थे वे सब मन के सङ्कल्प से ही समुत्पन्न हुए है । वसुगण, मरुद्गण, गन्धर्व, यक्ष, राक्षस, दैत्य, पिशाच, नाग, विविध

भूत, ब्राह्मण, क्षत्रिय, वैश्य, शूद्र और जो भूमण्डल में म्लेच्छ हैं—समस्त चतुष्पाद, तिर्यग्यो निगत सैकड़ों- जङ्गम सत्त्व और जो अन्य जीव संज्ञा से युक्त सब एक सहस्र युगों के पूर्ण होने पर ब्रह्माजी के दिन के समागत हो जाने पर सर्वोत्पातों के समुद्भव वाले समस्त भूतों का निर्वाण होगया था ॥ १०–१४ ॥

हिरण्यरेतास्त्रिशिखस्ततो भूत्वा बृषाकपिः !
शिखाभिर्विधमंल्लोकानशोषयत वह्निना ॥१५
दह्यमानास्ततस्तस्य तेजोराशिभिरुद्गतैः ।
विवर्णवर्णादग्धाङ्गा हतार्चिष्मद्भिराननैः ॥१६
साङ्गोपनिषदो वेदा इतिहासपुरोगमाः ।
सर्वविद्याः क्रियाश्चैव सर्वधर्मपरायणाः ॥१७
ब्रह्माणमग्रतः कृत्वा प्रभवं विश्वतोमुखम् ।
सर्वदेवगणाश्चैव त्रयस्त्रिंशत्तु कोटयः ॥१८
तस्मिन्नहनि सप्राप्ते तं हंसं महदक्षरम् ।
प्रविशन्ति महात्मानं हरिं नारायणं प्रभुम् ॥१६
तेषां भूयः प्रवृत्तानां निधनोत्पत्तिरुच्यते ।
यथा सूर्यस्य सततमुदयास्तमने इह ॥२०
पूर्णे युगसहस्रान्ते सर्वे निःशेष उच्यते ।
यस्मिन् जीवकृतं सर्वे निःशेष समतिष्ठत ॥२१

इसके अनन्तर हिरण्य रेता त्रिशिख वृषा कपि होकर शिखाओं से लोकों को विशेष रूप से धमन करते हुए वह्नि के द्वारा सबका शोषण कर दिया था। इसके अनन्तर समुद्गत उसके तेज की राशियों से दह्यमान होते हुए अर्थिमान आननों के विवर्ण वदन वाले, दग्ध अङ्गों से युक्त होकर हत हो गये थे। साङ्गवेद तथा उपनिषद, इतिहासों को आगे करके सम्पूर्ण विद्या-सर्व धर्म परायण क्रियायें और विश्व तो मुख प्रभव ब्रह्माजी को आगे करके तेतीस करोड़ समस्त देवगण उस दिन के सम्प्राप्त होनेपर महदक्षर, महात्मा, हंस उन प्रभु नारायण हरि के धाम में प्रवेश करते

हैं। प्रवृत्त हुए उनके पुनः निधन से उत्पत्ति कही जाती है जिस तरह से यहाँ पर निरन्तर सूर्य का उदय और अस्तमन हुआ करते हैं। एक सहस्र युगों के पूर्ण हो जाने पर सबका निःशेष कहा जाता है जिसमें सब जीवकृत निःशेष समवस्थित हुआ था ॥१५–२१॥

संहृत्य लोकानखिलान् सदेवासुरमानुषान्।
कृत्वासुसस्थां भगवानास्तएकजगद्गुरुः ॥२२
स स्रष्टा सर्वभूतानां कल्पान्तेषु पुनः पुनः।
अव्ययः शाश्वतो देवो यस्यसर्वमिदंजगत् ॥२३
नष्टार्ककिरणो लोके चन्द्रग्रहविवर्जिते।
त्यक्तधूमाग्निपवने क्षीणयज्ञवषट्क्रिये ॥२४
अपर्त्तगण सम्पाते सर्वप्राणहरे पथि।
अमर्यादाकुले रौद्रे सर्वतस्तमसावृते ॥२५
अदृश्ये सर्वलोकेऽस्मिन्नभावे सर्वकर्मणाम्।
प्रशान्ते सर्वसम्पाते नष्टे वैरपरिग्रहे ॥२६
गते स्वभावसंस्थाने लोके नारायणात्मके।
परमेष्ठी हृषीकेशः शयनायोपचक्रमे ॥२७
पीतवासा लोहिताक्षः कृष्णो जीमूतसन्निभः।
शिखासहस्रविकचजटाभारं समुद्वहन् ॥२८
श्रीवत्सलक्षणधरं रक्तचन्दनभूषितम्।
वक्षो बिभ्रन्महाबाहुः स विष्णुरिव तोयदः ।।२९

समस्त देव, असुर और मानवों के सहित पूर्ण सम्पूर्ण लोकों का संहार करके जगत् में गुरु एक ही भगवान् असुसंस्था करके स्थित हुआ करते हैं। इस तरह वही कल्पों के अन्त से पुनः पुनः समस्त भूतों का स्रष्टा होते हैं। वह अव्यय-शाश्वत देव हैं जिसका यह सम्पूर्ण जगत् है। सूर्य की किरण जिसमें नष्ट हो गई हैं और चन्द्र तथा ग्रहों से जो वर्जित है—धूप, अग्नि और पवन ने भी जिसका त्याग कर दिया है तथा अग्नि

रहित और यज्ञ एवं वषट् क्रिया से क्षीण, पक्षिगण के सम्पात से शून्य, समस्त प्राणियों के हरण करने वाले, अमर्यादा से आकुल, रौद्र, सब ओर से अन्धकार से समावृत मार्ग में सब लोकों के दृश्यमान होने पर, सब कर्मों के अभाव में सब सम्पात के प्रशान्त हो जाने पर इस नारायणमक लोक में स्वभाव संस्थान के गत होने पर परमेष्ठी हृषीकेश ने अपने शयन करने का उपक्रम किया था। पीत वस्त्रधारी, लोहित नेत्रों वाले, मेघ के सदृश, सहस्रों शिखाओं के विकच जटाओं के भार का समुद्वहन करने वाले श्रीकृष्ण विराजमान थे ॥ २२, २३, २४, २५, २६, २७, २८ ॥ श्रीवत्स के लक्षण को धारण करने वाले और रक्त चन्दन से विभूषित वक्ष:स्थल को रखने वाले—महान् वाहुओं से युक्त वह तोयद के समय ही श्री विष्णु भगवान् थे ॥ २९ ॥

पुण्डरीकसहस्रेण स्रगस्य शुशुभे शुभा।
पत्नी चास्य स्वयं लक्ष्मीर्देहमावृत्यतिष्ठति ।।३०
ततः स्वपिति शान्तात्मा सर्वलोके शुभावहः।
किमप्यमितयोगात्मा निद्रायोगमुपागतः ।।३१
ततो युगसहस्रे तु पूर्णे स पुरुषोत्तमः।
स्वयमेव विभुर्भूत्वा बुध्यते विबुधाधिपः ।।३२
ततश्चिन्तयत भूयः सृष्टिं लोकस्य लोककृत्।
नरान् देवगणांश्चैव पारमेष्ठ्येन कर्मणा ।।३३
ततः सञ्चिन्तयन् कार्यं देवेषु समितिञ्जयः।
सम्भवं सर्वलोकस्य विदधाति सतांगतिः ।।३४
कर्ता चैव विकर्ता च संहर्ता वं प्रजापतिः।
नारायण परं सत्यं नारायणः परं पदम् ।।३५

इन विष्णु भगवान् की पत्नी स्वय साक्षात् लक्ष्मी जो देह को आवृत करके स्थित रहती हैं एक सहस्र पुण्डरीकों की माला से वह शुभा शोभित हो रही थीं ॥ ३० ॥ इसके उपरान्त समस्त लोक में सुख का

आवहन करने वाले प्रशान्त आत्मा से सम्पन्न शयन किया करते हैं। वह अमित योग के स्वरूपधारी किसी योग निद्रा को प्राप्त हो गये थे ।।३१।। इसके अनन्तर एक सहस्र युगों के पूर्ण हो जाने पर वह विभु पुरुषोत्तम जो विवुधों के स्वामी हैं स्वयमेव ही प्रबुद्ध हो जाया करते हैं ।। २२ ।। इसके पश्चात् लोकों के करने वाले ने फिर लोक की सृष्टि के विषय में चिन्तन किया था। नरगण और देवगणों का पारमेष्ठ्य कर्म द्वारा चिन्तन करते हैं। फिर समिञ्जथ प्रभु देवों के विवय में कार्य्य का चिन्तन करते हुए सत्पुरुषों की गति प्रभु समस्त लोक की उत्पत्ति को किया करते हैं। वह प्रजापति इस जगत् के कर्त्ता-विकर्त्ता और संहार के कर्त्ता हैं। नारायण परसत्य हैं—नारायण परम पद है ।। ३३–३५ ।।

नारायणः परो यज्ञो नारायणः परा गतिः ।
स स्वयम्भूरिति ज्ञेयः स स्रष्टाभुवनाधिपः ।।३६
स सर्वमिति विज्ञेयो ह्येष यज्ञः प्रजापतिः ।
यद्वेदितव्यस्त्रिदशैस्तदेष परिकीर्त्यते ।।३७
यत्तु वेद्यं भगवतो देवा अपि न तद्विदुः ।
प्रजानां पतयः सर्वे ऋषयश्च सहामरैः ।।३८
नास्यान्तमधिगच्छन्ति विचिन्वन्त इति श्रुतिः ।
यदस्य परमं रूपं न तत्पश्यन्ति देवताः ।।३९
प्रादुर्भावे तु यद्रूपन्तदर्चन्ति दिवौकसः ।
दर्शितं यदि तेनैव तदवेक्ष्यन्ति देवताः ।।४०
यन्न दर्शितवानेष कस्तदन्वेष्टुमीहते ।
ग्राम्याणां सर्वभूतानामग्निमारुतयोर्गतिः ।।४१
तेजसस्तपसश्चैव निधानममृतस्य च ।
चतुराश्रमधर्मेशश्चातुर्होत्रफलाशनः ।।४२
चतुः सागरपर्यन्तश्चतुर्युगनिवर्तकः ।
तदेष संहृत्य जगत्कृत्वा गर्भस्थामात्मनः ।।

मुमोचाण्डं महायोगी धृतं वर्षसहस्रकम् ॥४३॥
सुरासुरद्विजभुजगाप्सरोगणैर्द्रुमौषधिक्षितिधरयक्षगुह्यकै ।
प्रजापतिः श्रुतिभिरसङ्कुलं तदा स वै'सृजज्जगदिदमात्मना प्रभुः ।।

नारायण पर यज्ञ हैं—नारायण परागति है—वह स्वयम्भू—यह जानने के योग्य हैं—वह भुवन का स्वामी सृजन करने वाले हैं ? वह सब कुछ है—ऐसा ही समझना चाहिए । यही यज्ञ और प्रजापति है । जो देवों के द्वारा जानने के योग्य है और वह ऐसा ही कीर्त्तित किया जाता है । जो कुछ भी भगवान् का वेद्य (जानने केयोग्य हैं) उसे देवगण भी नहीं जानते हैं । न प्रजापति जानते हैं और अमरगणों के साथ ऋषि लोग ही जानते हैं ।। ३६ । ३७ । ३८ ।। विशेष रूप से खोज करते हुए भी इस प्रभु के अन्त का ज्ञान कोई भी प्राप्त नहीं किया करते हैं—ऐसी श्रुति है । जो इसका पद रूप होता है उसे देवगण भी नहीं देख पाते हैं । जब इनके प्रादुर्भाव का कोई स्वरूप होता है उसी का देवगण अभ्यर्चन किया करते हैं । यदि इन्हीं ने उसे दिखला दिया है तो देवता लोग उसे देख पाते हैं । जो कभी भी उन्होंने नहीं दिखलाया है उसकी खोज करने की कौन इच्छा करता है । अथात् उसका अन्वेषण कोई भी नहीं कर पाता है । ग्राम्य समस्त प्राणियों की गति अग्नि और मारुत की होती है । तेज तप और अमृत का निधान—चारों आश्रमों के धर्म का ईश—चातु देत्रिका फलाशन—चार सागरों की सीमा तक रहने वाला—चारों युगों का निवर्त्तक वह इसका संहार करके फिर अपने गर्भ में स्थित जगत् की रचना करता हुआ महायोगी एक सहस्र वर्ष तक धारण किये अण्ड को छोड़ देता था । सुर—असुर—द्विज—भुजग और अप्सराओं के गणों से युक्त—औषधि—क्षितिधा—यक्ष और गुह्यकों से समन्वित—श्रुतियों से असंकुल इस जगत् को उस समय में वह प्रजापति प्रभु आत्मा से ही सृजन किया करता है ।। ३९—४४ ।।

१११–वराहवतार चरित्र वर्णन

जगदण्डमिदं पूर्वमासीद्दिव्यं हिरण्मयम् ।
प्रजापतेरियं मूर्तिरितीयं वैतकी श्रुतिः ॥१
तत्तु वर्षसहस्रान्ते विभेदूर्ध्वमुखं विभुः ।
लोकसर्जनहेतोस्तु बिभेदाधोमुखं नृप ! ॥२
भूयोऽष्टधा बिभेदाण्ड विष्णुर्वै लोकजन्मकृत् ।
चकार जगतश्चात्र विभागंसविभागकृत् ॥३
यच्छिद्रमूर्द्धमाकाशं विवराकृतितां गतम् ।
विहितं विश्वयोगेन यदधस्तद्रसातलम् ॥४
यदण्डमकरोत्पूर्वं देवोलोकचिकीर्षया ।
तत्र यत्सलिलंस्नसोऽभवत्काञ्चनोगिरिः ॥५
शैलैः सहस्रैं मंहती मेदिनी विषमाभवत् ।
तैश्च पर्वतजालौघैर्बहुयोजनविस्तृतैः ॥६
पीड़िता गुरुभिर्देवी व्यथिता मेदिनी तदा ।
महामते भूरिबल दिव्यं नारायणात्मकम् ॥७

महर्षि शौनक जी ने कहा यह जगत् का अण्ड पहिले परम दिव्य हिरण्य था। यह जगदण्ड साक्षात् प्रजापति की मूर्त्ति ही था—ऐसा श्रुति का वचन कहता है ॥१॥ वह एक सहस्र वर्ष के अन्त में विभुने ऊर्ध्व मुख को विभेदन किया था। हे नृप ! लोक के सर्जन के हेतु से अधोमुख का भेदन किया था। लोकों के जन्म के करने वाले भगवान् विष्णु ने फिर उस अण्ड को आठ भागों में भेदन किया था। विभाग के करने वाले प्रभु ने यहाँ पर जगत् का विभाग किया था। ऊर्ध्व आकाश में जो छिद्र था वह विवर की आकृति को प्राप्त हो गया था। विश्व के योग से जो अधोभाग था उसे रसातल किया था। देवने जो पहिले जो अण्ड किया था वह लोक को रचना करने की इच्छा से ही किया था।

वहां पर जो सलिल स्कन्न हुआ था वह सुवर्ण गिरि हो गया था। सहस्रों शैलों के होने से यह महती मेदिनी विषम हो गई थी जो कि बहुत से योजनों के विस्तार से युक्त पवंतों के जालों के ओघों से युक्त थी। उस समय में इन बड़े भारी पर्वतों से यह पीड़ित एव व्यथित मेदिनी देवी हो गयी थी हे महामते ! यह अण्ड परम दिव्य—बहुत अधिक बल वाला नारायण के स्वरूप से सम्पन्न था ।।६—७।।

हिरण्यं समुत्सृज्य तेजो व जातरूपिणम् ।
अशक्ता वै धारयितुमधस्तात्प्राविशत्तदा । ८
पोठ्यमाना भगवतस्तेजसा तस्य सा क्षितिः ।
पृथ्वीं विशन्तीं दृष्ट्वा तु तामधोमधुसूदनः ।।९
उद्धारार्थं मतश्चक्रे तस्या वै हितकाम्यया ।।१०
मत्तेज एषा वसुधा समासाद्य तपस्विनी ।
रसातलं प्रविशति पङ्के गौरिव दुर्बला ।।११
त्रिविक्रमायामितविक्रमाय महावराहाय सुरोत्तमाय ।
श्रीशार्ङ्गचक्रासिगदाधराय नमोऽस्तु ते देववर ! प्रसीद
तव देहाज्जगज्जातं पुष्करद्वीपमुत्थितम् ।
ब्रह्माणमिह लोकानां भूतानां शाश्वतविदुः ।।१३
तव प्रसादाद्देवोऽयं दिवं भुङ्क्ते पुरन्दरः ।
तव क्रोधाद्धि बलवान् जनादनजितोबलिः ।।१४

जातरूपी हिरण्मय तेज का समुत्सृजन करके उसे धारण करने के लिए अशक्त होकर उस समय में नीचे की ओर प्रवेश कर गया था। उस समय में भगवान् के तेज से वह क्षिति पीड्य माना हो गई थी। भगवान् मधुसूदन ने अधोभाग में प्रवेश करती हुई उस पृथ्वी को देखा था और फिर उस पृथ्वी के हित की कामना से उसके उद्धार करने के लिये मनमें विचार किया था ।।८, ९, १०।। श्री भगवान् ने कहा—इस तपस्विनी वसुधा ने मेरे तेज को प्राप्त करके वह दुवंल गौ पङ्क में जिस तरह

विषण्ण होती है उसी भाँति यह मेदिनी रसातल में प्रवेश करती है। ।११।। पृथिवी ने कहा—हे देव वर ! त्रिविक्रम से आयामित विक्रम वाले सुरों में उत्तम—श्री शार्ङ्ग, चक्र, असि और गदा के धारण करने वाले महावराह के लिये नमस्कार है । आप प्रसन्न होइये ॥१२।। आपके ही देह से यह सम्पूर्ण जगत् समुत्पन्न हुआ है और पुष्कर द्वीप उत्थित हुआ है। यहां पर ब्रह्मा को लोकों के और भूतों का शाश्वत जानना चाहिए । हे देव! यह आपका ही प्रसाद है कि इन्द्र देव दिवलोक का उपभोग किया करते हैं । आपके ही क्रोध से भगवान् जनार्दन के द्वारा यह महा बलवान् बलि जीतमलिया गया है ।।१३, १४.।

धाता विधाता संहर्ता त्वयि सर्वं प्रतिष्ठितम् ।
मनुःकृतान्तोऽधिपतिर्ज्वलनः पवनोघनः ।।१५
वर्णाश्चाश्रमधर्माश्च सागरास्तरवो जलम् ।
नद्यो धर्मश्च कामश्च यज्ञायज्ञस्य च क्रियाः ।।१६
विद्यावेद्यञ्च सत्वञ्च ह्रीः श्रीः कीर्तिर्धृति क्षमा ।
पुराणं वेदवेदाङ्गं सांख्ययोगो भवाभवौ ।।१७
जङ्गमं स्थावरञ्चैव भविष्यञ्च भवञ्च यत् ।
सर्वन्तच्च त्रिलोकेषु प्रभावोपहितन्तव ।।१८
त्रिदशोदारफलदः स्वर्गस्त्रीचारुपल्लवः ।
सर्वलोकमनः कान्तः सर्वसत्वमनोहरः ।।१९
विमानानेकविटपस्तोयदाम्बुमधुस्रवः ।
दिव्यलोकमहास्कन्धसत्यलोकप्रशाखवान् ॥२०
सागराकरनिर्यासो रसातलजलाश्रयः ।
नागेन्द्रपादपोपेतो जन्तुपक्षिनिषेवितः ।।२१

हे भगवन् ! आपके अन्दर धाता-विधाता और संहार करने वाला, इन तीनों कर्म्मों के करने की शक्ति विद्यमान है । मनु, अधिपति कृतान्त, अग्नि, पवन, घन, चारों वर्णः चरों ब्रह्मचर्य्यादि आश्रमों के धर्म्म, सागर,

तरु, जल, नदियाँ, धर्म, काम, यज्ञायज्ञ की क्रियाऐं—विद्या, वेद्य, सत्त्व, ह्री श्री, कीर्त्ति, धृति, क्षमा, पुराण, वेद, वेदों के समस्त अङ्ग शास्त्र, साङ्ख्य, योग, भव, अभव, स्थावर, जङ्गम, भविष्य, भवत्, यह सभी कुछ तीनों लोकों में आपका ही प्रभाव है ।।१५-१८।। देवों के उदार फल के दाता—स्वर्गीय स्त्रियों के चारु पल्लव-सब लोकों के मन के कान्त-सब सत्त्वों के मनोहर—विमानों के अनेक विटप—मेघों के जल का मधु-स्ताव—दिव्य लोक के महा स्कन्ध—सत्यलोक के प्रशाखा वाले—सागर के आकार का निर्यास—रसातल के जल का आश्रय—नागेन्द्र पादयों से समुपेत-जन्तु और पक्षिगण से निषेवित आप ही हैं !।१९-२१।।

शीलाचारार्यगन्धस्त्वं सर्वलोकमयोद्रुमः ।
द्वादशार्कमयद्वीपो रुद्रैकादशपत्तनः ।।२२
वस्वष्टाचलसंयुक्तस्त्रैलोक्याम्भोमहोदधिः
सिद्धसाध्योर्मिकलिलःसुपर्णानिलसेवितः ।।२३
दैत्यलोकमहाग्राहो रक्षोरगरुषाकुलः ।
पितामहमाधैर्यः स्वर्गस्त्रीरत्नभूषितः ।।२४
धीश्रीह्रीकान्तिभि नित्यं नदीभितः ।
कालयोगमहापर्वप्रयागगतिवेगवान् ।।२५
त्वं स्वयोगमहावीर्यो नारायणमहार्णवः ।
कालोभूत्वा प्रसन्नाभिरद्भिर्ह्लादयसे पुनः ।।२६
त्वया सृष्टास्त्रयो लोकास्त्वयैव प्रतिसंहृताः ।
विशन्ति योगिनः सर्वे त्वामेव प्रतियोजिताः ।।२७
युगे युगे युगान्ताग्निः कालमेघो युगे युगे ।
महाभारावताराय देव ! त्वं हि युगे युगे ।।२८

आप ही शीलाचार के आर्यगन्ध हैं । सर्व लोक मय आप द्रुम है। द्वादश सूर्यों से परिपूर्ण द्वीप, एकादश रुद्रों के पत्तन, अष्ट वसुओं के बल से संयुक्त, त्रिभुवनों के जल के महा समुद्र, सिद्ध और साध्यों की ऊर्मियों

से कलिल, मुपर्णानिल से सेवित, दैत्यों के लोकों के महान् ग्राह, राक्षस और उरगों के रोष से समाकुल, पितामह के महान् धैर्य, स्वर्ग की स्त्रियों रूपी रत्नों से भूषित, धी, ह्री, श्री और कान्ति इनसे तथा नित्य ही नदियों से उपशोभित, कालयोग महान् पर्व के प्रयाग की गति और वेग वाले आप अपने योग के महान् वीय तथा नारायण महार्णव हैं। आप काल होकर परम प्रसन्न जलों से पुनः आह्लादित किया करते हैं। आपने ही इन तीनों लोकों का सृजन किया है और आपने ही इनका प्रति संहार भी किया है। सब योगीजन प्रतियोजित होकर आप में ही प्रवेश किया करते हैं। हे देव ! आप ही युग-युग में युगों के अन्त करने वाली अग्नि हैं—युग-युग में आप ही काल मेघ हैं और इस महाभार के अवतारण करने के लिए आप ही युग-युग में हुआ करते हैं ॥२२–२८॥

त्वं हि शुक्लः कृतयुगे त्रेतायां चम्पकप्रभः ।
द्वापरे रक्तसङ्काशः कृष्णः कलियुगे भवान् ॥२९
वैवर्ण्यमभिधत्से त्वं प्राप्तेषु युगसन्धिषु ।
वैवर्ण्यं सर्वधर्माणामुत्पादयसि वेदवित् ॥३०
भासि वासिप्रतपसित्वञ्च पासिविचेष्टसे ।
क्रुध्यसिक्षान्तिमायासि त्वं दीपयसिवर्षसि ॥३१
त्वं हास्यसि न निर्यासि निवापयसि जाग्रसि ।
निःशेषयसि भूतानि कालो भूत्वा युगक्षये ॥३२
शेषमात्मानमालोक्य विशेषयसि त्वं पुनः ।
युगान्ताग्नावलीढेषु सर्वभूतेषु किञ्चन ॥३३
यातेषु शेषो भवसि तस्माच्छेषोऽसि कीर्तितः ।
च्यवनोत्पत्तियुक्तेषु ब्रह्मेन्द्रवरुणादिषु ॥३४
यस्मान्न च्यवसे स्थानात्तस्मात्सङ्कीर्त्यसेऽच्युतः ।
ब्रह्माणमिन्द्रञ्चयमं रुद्रं वरुणमेव च ॥३५

हे देव ! कृतयुग में आप ही शुक्ल वर्ण वाले होते हैं-त्रेता में

सुवर्ण के समान प्रभा वाले भी आप ही हैं। द्वापर में रक्त के सदृश और कलियुग में आप ही कृष्ण होते हैं ॥२८॥ आप जब युगों की सन्धियाँ होती हैं तो उस समय में विवर्णता धारण किया करते हैं। वेदों के वेत्ता आप समस्त धर्मों के वैदर्ण्य को उत्पादन किया करते हैं। आप ही दीप्त होते हैं, निवास करते हैं, प्रताप दिया करते हैं, पालन करते हैं, विशेष चेष्टा किया करते हैं, कोप भी आप ही करते हैं, शान्ति को प्राप्त होते हैं, आप ही दीपित होते हैं और वर्षा किया करते हैं। आप ही स्वयं ह्रास करते हैं, निर्वासित होते हैं, निर्वाय करते हैं, जाग्रत होते हैं, निःशेषित होते हैं अर्थात् समस्त भूतों को निःशेष किया करते हैं और युगों के क्षय में आप ही काल का स्वरूप धारण किया करते हैं ॥२९-३२॥ आप ही अपने आपको शेष देखकर फिर उसे विशेषित किया करते हैं जब सब भूतों में युगान्त अवलीढ हो जाते हैं और कुछ भी शेष नहीं रहता है इसी लिए आपको शेष इस नाम से कीर्त्तित किया गया है। च्यवनोत्पत्ति से युक्त ब्रह्मा इन्द्र, वरुण आदि के होने पर क्योंकि स्थान से च्यवन नहीं होता है इसीलिये अच्युत नाम से कीर्त्तित हुए हैं। ब्रह्मा, इन्द्र, यम, रुद्र और वरुण इनका निग्रह करके हरण करते हैं ॥३३-३५॥

निगृह्य हरसे यस्मात्तस्माद्धरिरिहोच्यसे।
सम्मानयसि भूतानि वपुषा यशसा श्रिया ॥३६
परेण वपुषा देव ! तस्माच्चासि सनातनः।
यस्माद्ब्रह्मादयो देवा मुनयश्चोग्रतेजसः ॥३७
न तेऽन्तं त्वधिगच्छन्ति तेनानन्तस्त्वमुच्यसे।
न क्षीयसे न क्षरसे कल्पकोटिशतैरपि ॥३८
तस्मात्त्वमक्षरत्वाच्च विष्णुरित्येव कीर्त्यसे।
विष्टब्धं यत्त्वया सर्वं जगत् स्थावरजङ्गमम् ॥३९
जगद्विष्टम्भना चैव विष्णुरेवेति कीर्त्यसे।
विष्टभ्य तिष्टसे नित्यं त्रैलोक्यं सचराचरम् ॥४०

यक्षगन्धर्वनगरं सुमहद्भूतपन्नगम् ।
व्याप्तं त्वयैव विशता त्रैलोक्यं सचराचरम् ॥४१
तस्माद्विष्णुरिति प्रोक्तः स्वयमेव स्वयम्भुवा ।
नारा इत्युच्यते ह्यापो ऋषिभिस्तत्त्वदर्शिभिः ॥४२

हे भगवन् ! ब्रह्मादि सबका निग्रह करके आप इनका हरण किया करते हैं इसी कारण से आपको 'हरि''–इस नाम से कहा जाता है । आप समस्त भूतों का वपु से, यश से, श्री से सम्मान किया करते हैं । हे देव ! आप पर वपु से सम्मान किया करते हैं इसी कारण से सनातन हैं । क्यों कि ब्रह्मादि देवगण और उग्र तेज वाले मुनि वृन्द सब आपके अन्त को प्राप्त नहीं हुआ करते हैं इसीलिये आप अनन्त इस नाम से कहे जाते हैं और सैकड़ों करोड़ कल्पों में भी आप न तो क्षरित होते हैं और न क्षीण ही हुआ करते हैं । इसी अक्षर होने के हेतु से आप अक्षर हैं और विष्णु इसी नाम से कीर्त्तित किये जाते हैं । आपने इस स्थावर, जङ्गम जगत् सबको विष्टब्ध कर दिया है ॥३६–३९॥ इस सम्पूर्ण जगत् के विष्टम्भन होने से आपका नाम 'विष्णु'–यह कीर्त्तित किया जाता है क्योंकि इस त्रिलोकी को विष्टब्ध करके जिसमें सभी चर एवं अचर विद्यमान हैं नित्य स्थित रहा करते हैं ॥४०, ४१॥ इसी लिये स्वयं भगवान् स्वयम्भू ने विष्णु यह नाम कहा है । नारा, इससे जल कहे जाया करते हैं जिसको तत्त्व दर्शी ऋषियों ने कहा है । वेही जल पहिले उनके अयन निवास स्थान हुए थे इसीलिए आपका नारायण यह नाम कहा गया है । हे विष्णो ! आप तो युग-युग में प्रनष्ट अङ्गों को तात्त्विक रूप से प्राप्त किया करते हैं ॥४२, ४३॥

अयनन्तस्यताः पूर्वन्तेन नारायणः स्मृतः ।
युगे युगेप्रनष्टाङ्गां विष्णो ! विन्दसितत्वतः ॥४३
गोविन्देतिततोनाम्नाप्रोच्यसेभिस्तथा ।
हृषीकाणीन्द्रियाण्याहुस्तत्वज्ञानविशारदाः ॥४४

ईशिता च त्वमेतेषां हृषीकेशस्तथोच्यते ।
वसन्ति त्वयि भूतानि ब्रह्मादीनि युगक्षये ।।४५
त्वं वा वससि भूतेषु वासुदेवस्तथोच्यसे ।
सङ्कर्षयसि भूतानि कल्पे कल्पे पुनः पुनः ।।४६
ततः सङ्कर्षणः प्रोक्तस्तत्वज्ञानविशारदैः ।
प्रतिव्यूहेन तिष्ठन्ति सदेवासुरराक्षसा. ।।४७
प्रविद्युः सवधर्मांणां प्रद्युम्नस्तेन चांच्यसे ।
निरोद्धा विद्यते यस्मान्न ते भूतेषु कश्चन ।।४८
अनिरुद्धस्ततः प्रोक्तः पूर्वमेव महर्षिभिः ।
यत्त्वया धार्यते विश्वं त्वया संह्रियते जगत् ।४९

क्योंकि आप प्रनष्ट अङ्गों का लाभ करते हैं इसी लिये आपको "गोविन्द"—इस नाम से पुकारा जाया करता है और ऋषिगण गोविन्द कहा करते हैं। हृषीक विषयेन्द्रियों को कहा जाता है जिनको कि तत्त्वज्ञान के विशारद कहते हैं। आप इनके ईशिता हैं इसी कारण से आपको हृषीकेश नाम से कहा जाया करता है। युग के क्षय में ब्रह्मा आदि समस्त भूत आप ही में निवास किया करते हैं अथवा आप सब भूतों में निवास किया करते हैं इसीलिए आपको वासुदेव कहा जाया करता है। बारम्बार आप कल्प कल्प में भूतों का संकर्षण किया करते हैं अतएव तत्त्वज्ञान के विशारदों के द्वारा आपको संकर्षण कहा गया है। समस्त देव. असुर और राक्षस प्रतिग्रह से स्थित रहते हैं और सब धर्मों के प्रविद्यु है अतएव आपको प्रद्युम्न. इस शुभ नाम से कहा जाया करता है। आपका भूतों में क्योंकि कोई भी निरोद्धा नहीं है इसीलिए पहिलेही महर्षियों ने आपका नाम अनिरुद्ध कहा गया है। हे भगवन ! आपके द्वारा इस विश्व को धारण किया जाता है और आपके ही द्वारा इस जगत् का संहार किया जाता है ।।४४–४९।।

त्वं धारयसि भूतानि भवनं त्वं बिभर्षि च ।

यत्त्वया धार्यते किञ्चित्तेजसाचबलेन च ।।५०
मया हि धार्यते पश्चान्नाधृतं धारये त्वया ।
न हि तद्विद्यते भूतं त्वया यन्नात्र धार्यते ।।५१
त्वमेव कुरुषे ! देव ! नारायण युगे युगे ।
महाभारावतरणं जगतो हितकाम्यया ।।५२
तवैव तेजसाक्रान्तां रसातलतलङ्गताम् ।
त्रायस्व मां सुरश्रेष्ठ ! त्वामेव शरणंगताम् ।।५३
दानवैः पीड्यमानाहं राक्षसैश्च दुरात्मभिः ।
त्वामेव शरणं नित्यमुपयामि सनातनम् ।।५४
तावन्मेस्ति भयं देव ! यावन्न त्वां ककुद्मिनम् ।
शरणं यामि मनसा शतशोऽप्युपलक्षये ।।५५
उपमानं न ते शक्ताः कर्त्तुं सेन्द्रा दिवौकसः ।
तत्वं त्वमेव यद्वेत्सि निरुत्तरमतः परम् ।।५६

हे भगवन् ! आप समस्त भूतों को धारण किया करते हैं और आप भवन का भरण किया करते हैं और आपके द्वारा तेज और बल के द्वारा जो कुछ भी धारण किया जाता है इसके पीछे मेरे द्वारा धारण किया जाता है और जो आपके द्वारा अधृत है उसे मैं धारण करती हूँ । ऐसा कोई भी भूत विद्यमान नहीं है जो आपके द्वारा धारण न किया जाता हो । हे देव ! हे नारायण ! इस जगत् के हित की कामना से युग-युग में आप ही इस महान् भार का अवतरण किया करते हैं । हे सुरश्रेष्ठ ! आपके ही तेज से आक्रान्त, रसातल में गई हुई और आप की ही शरणागति में गई हुई मेरा परित्राण कीजिए । में दुरात्मा दानवों तथा राक्षसों के द्वारा पीड्यमाना मैं आप ही नित्य एवं सनातन प्रभु की शरण में जाती हूँ । हे देव ! मुझे तब तक ही भय होता है जब तक ककुद्मी आपकी शरण में मन से नहीं जाती हूँ । मैं सैकड़ों का उपलक्षित करती हूँ किन्तु आपकी समानता इन्द्र आदि देवगण करने मे समथ नहीं

होते हैं। इसके तत्त्व को आप ही जानते हैं और इससे पर निरुत्तर है ॥ ५०—५६ ॥

ततः प्रीतः स भगवान् पृथिव्यै शार्ङ्ग चक्रधृक् ।
काममस्या यथाकाममभिपूरितवान् हरिः ॥५७
अब्रवीच्च महादेवि ! माधवीयं स्तवोत्तमम् ।
धारयिष्यति योमर्त्योनास्तितस्यपराभवः ॥५८
लोकान्निष्कल्मषांश्चैव वैष्णवान्प्रतिपत्स्यते ।
एतदाश्चर्यंसर्वस्वंमाधवीयंस्यवोत्तमम् ॥५६
अधीतवेदः पुरुषो मुनिः प्रीतमना भवेत् ॥६०
मा भैर्धरणि ! कल्याणि ! शान्ति व्रज ममाग्रतः ।
एष त्वामुचितं स्थानं प्रापयामि मनीषितम् ॥६१
ततो महात्मा मनसा दिव्य रूपमचिन्तयत् ।
किन्नु रूपमहं कृत्वा उद्धरेयं धरामिमाम् ॥६२
जलक्रीड़ारुचिस्तस्माद्वाराहं वपुरास्थितः ।
अदृश्यं सर्वभूतानां वाङ्मयं ब्रह्म संस्थितम् ॥६३

महर्षि शौनक जी ने कहा—इसके पश्चात् भगवान् शार्ङ्ग और चक्र के धारण करने वाले उस पृथिवी देवी पर परम प्रसन्न हो गये थे और उन हरि भगवान् ने इसकी कामना को यथोप्सित रूप से पूरित कर दिया था ॥५७॥ और भगवान् ने उससे कहा था—हे महादेवि ! आपके द्वारा कहा गया जो यह माधवीय स्तव है वह अतीव उत्तम है। जो मनुष्य इस स्तव को धारण करेगा उसका कभी भी पराभव नहीं होता है ॥५८॥ यह आश्चर्यों का सर्वस्व माधवीय उत्तम स्तव है। इसके धारण करने वाला कल्मषों से रहित वैष्णव लोकों की प्राप्ति किया करता है। ॥५६॥ वेदों के अध्ययन करने वाला पुरुष प्रीति से युक्त मन वाला मुनि हो जाता है ॥६०॥ श्री भगवान् ने कहा—हे धरणि ! हे कल्याणि ! उरोमत ! मेरे आगे शान्ति को धारण करो। मैं तुमको मनो-

षित समुचित स्थान पर प्राप्त कर देता हूँ ।।६१।। शौनक जी ने कहा—इस के उपरान्त महान् आतमा वाले प्रभु ने मन से दिव्य रूप का चिन्तन किया था कि मैं क्या करूं ।।६२।। जल में क्रीड़ा करने की रुचि थी इसी कारण से वाराह के वपु में समवस्थित हो गये थे। वह स्वरूप समस्त भूतों का अदृश्य एवं वाङ्मय संस्थित ब्रह्म था ।।६३।।

शतयोजनविस्तीर्णमुच्छ्रितं विगुणं ततः ।
नीलजीमूतसङ्काशं मेघस्तनितनिस्वनम् ।।६४
गिरिसंहननं भीमं श्वेततीक्ष्णाग्रदंष्ट्रिणम् ।
विद्युदग्निप्रतीकाशमादित्यसमतेजसम् ।।६५
पीनोन्नतकटीदेशे वृषलक्षणपूजितम् ।
रूपमास्थाय विपुलं वाराहभजितोहरिः ।।६६
पृथिव्युद्धरणायैव प्रविवेश रसातलम् ।
वेदपादो यूपदंष्ट्र क्रतुदन्तश्चितीमुखः ।।६७
अग्निजिह्वो दर्भलोमा ब्रह्मशीर्षो महातपाः ।
अहोरात्रेक्षणधरो वेदाङ्गश्रुतिभूषणः ।।६८
आज्यनासः स्रुवतुण्डःसामघोषस्वनोमहान् ।
सत्यधर्ममयः श्रीमान्कर्मविक्रतसत्क्रमः ।।६९
प्रायश्चित्तनखोघोरः पशुजानुमुखाकृतिः ।
उद्गाथा होमलिङ्गोऽथ वीजौषधिमहाफलः ।।७०

वह वाराह का स्वरूप सौ योजन के विस्तार युक्त, दुगुना इससे उच्छ्रित, नीलेमेघ के समान तथा मेघों के स्तनित से निस्वन था. गिरि के तुल्य संहनन वाला, भीम, श्वेत एव तीक्ष्ण आगे की दंष्ट्रा वाला, विद्युत् की अग्नि के तुल्य, सूर्य के सदृश तेज से युक्त, कटि देश में पीनोन्नत एवं वृष लक्षण से पूजित विपुल वराह के रूप में समास्थित श्री अजित हरि हो गये थे ।।६४, ६५, ६६।। वेदों के चरणों वाले, यूपों के दंष्ट्राओं से संयुत, क्रतुओं के दाँतों से समन्वित चितीमुख वाराह प्रभु ने इस पृथिवी

के उद्धार करने के लिये रसातल में प्रवेश किया था ॥ ६७ ॥ अग्नि की जिह्वा वाले—दर्भों के लोमों से संयुत—ब्रह्म के शीर्ष वाले—महान् तप से युक्त—अहोरात्र के नेत्रों को धारण करने वाले—वेदाङ्ग एवं श्रुति के भूषण से भूषित—आज्यकी नासिका वाले—स्रुवा के तुण्ड से युक्त—साम वेद के महान् घोष वाले—सत्य और धर्म से परिपूर्ण—कर्म और विक्रम के सन्क्रम वाले—श्रीमान्—प्रायश्चित के घोर नखों से युक्त—पशुजानु तथा मखकी आकृति वाले—उद्गाथा होम के लिङ्ग से संयुत वीज और औषधि के महान् फल वाले वह वाराह भगवान् थे ॥ ६७ । ६८ । ६९ । ७० ॥

वाय्वन्तरात्मा यज्ञास्थिविकृतिः सोमशोणितः ।
वेदस्कन्धो हविर्गन्धो हव्यकव्यविभागवान् ॥७१
प्राग्वंशकायो द्युतिमान् नानादीक्षाभिरन्वितः ।
दक्षिणाहृदयो योगी महासत्रमयो महान् ॥७२
उपाकर्मोष्ठरुचकः प्रवर्ग्यावर्तभूषणः ।
नानाछन्दोगतिपथो गुह्योपनिषदासनः ॥७३
छायापत्नीसहायो वै मणिशृङ्गइवोच्छ्रितः ।
रसातलतले मग्नां रसातलतलङ्गताम् ॥७४
प्रभुर्लोकहितार्थाय दंष्ट्राग्रेणोज्जहार ताम् ।
ततः स्वस्थानमानीय वराहः पृथिवीधरः ॥७५
मुमोच पूर्वं मनसा धारिताञ्च वसुन्धराम् ।
ततो जगाम निर्वाणं मेदिनी तस्य धारणात् ॥७६
चकार च नमस्कारं तस्मै देवाय शम्भवे ।
एवं यज्ञवराहेण भूत्वा भूतहितार्थिना ॥७७
उद्धृता पृथिवी देवी सागराम्बुगता पुरा ।
अथोद्धृत्य क्षितिं देवोजगतः स्थापनेच्छया ॥
पृथिवीप्रविभागाय मनश्चक्रेऽम्बुजेक्षणः ॥७८

रसाङ्गतामवनिमचिन्तविक्रमः सुरोत्तमः प्रवरवराहरूप धृक्।
वृषाकपिः प्रसभमथैकदंष्ट्रया समुद्धरद्धरणिमतुल्यपौरुषः ।। ७६

वायु के अन्तरात्मा वाले—यज्ञों की अस्थि विकृतियों से संयुत—सोम के शोणित से समत्वित—वेदों के स्कन्ध वाले—हवि की गन्ध से सम्पन्न—हव्य और कव्य के विभाग वाले प्राग्वंश की काया से युक्त—द्युतिमान्—अनेक दीक्षाओं से समन्वित—दक्षिण हृदय—महासत्रमय—महान् योगी—उपा कर्मोष्ठ रुचक—प्रवर्ग्यावर्त्त भूषण—नाना छन्दोगति पथ—गुह्योरनिषदासन—उच्छ्रित मणिशृङ्ग की भाँति छाया पत्नी सहाय प्रभु ने रसातल के तल में मग्न और रसातल के तल में गई हुई उस भूमि का लोकों के हित के लिये दंष्ट्रा के अग्रभाग से उद्धार किया था। इसके अनन्तर पृथिवी के धारण करने वाले वराह भगवान् ने उसे अपने स्थान पर लाकर पहिले मन से धारित वसुन्धरा को छोड़ दिया था। फिर यह मेदिनी उसके धारण करने से निर्वाण को प्राप्त हो गई थी। उस पृथ्वी ने उन शम्भु देव के नमस्कार किया था। इस प्रकार से भूतों के हित के चाहने वाले यज्ञ वराह भगवान् ने वराह होकर पहिले सागर के जल में गयी हुई पृथिवी देवा को उद्धृत किया था। इसके अनन्तर देव ने क्षिति को उद्धृत करके इस जगत् की स्थापना करने की इच्छा से अम्बुजेक्षण ने पृथिवी के प्रविभाग करने के लिये मन में विचार किया था। ।। ७१ । ७२ । ७३ । ७४ । ७५ । ७६ । ७७ । ७८ ।। अचिन्तनीय विक्रम वाले सुरों में श्रेष्ठ प्रवर वराह के स्वरूप को धारण करते हुए भगवान् ने जो वृषा कपि अतुलित पौरुष से सम्पन्न थे रसातल में गई हुई धरणी को बलपूर्वक एक दाढ़ से समुद्धृत किया था ।। ७९ ।।

११२—क्षीरोद मथन वर्णन (१)

नारायणस्य माहात्म्य श्रुत्वा सूत ! यथाक्रमम् ।
न तृप्तिर्जायतेऽस्माकमतः पुनरिहोच्यताम् ।।१
कथ देवा गताः पूर्वममरत्वं विचक्षणाः ।
तपसा कर्मणा वापि प्रसादात्कस्य तेजसा ।।२
यत्र नारायणो देवो महादेवश्च शूलधृक् ।
तत्रामरत्वे सर्वेषां सहायौ तत्र तौ स्मृतौ ।।३
पुरा देवासुरे युद्धे हताश्च शतशः सुरैः ।
पुनः सञ्जीविनीं विद्यां प्रयोज्य भृगुनन्दनः ।।४
जीवापयति दैत्येन्द्रान् यथा सुप्तोत्थितानिव ।
तस्य तुष्टेन देवेन शङ्करेण महात्मना ।।५
मृतसञ्जीविनी नाम विद्या दत्ता महाप्रभा ।
तां तु माहेश्वरीं विद्यां महेश्वरमुखोद्गताम् ।।६
भार्गवे संस्थितां दृष्ट्वा मुमुहुः सर्वदानवाः ।
ततोऽमरत्वं दैत्यानां कृत शुक्रेण धीमता ।।७

ऋषिगण ने कहा—हे सूतजी ! भगवान् नारायण के यथाक्रम माहात्म्य का श्रवण करके हमारी तृप्ति नहीं होती है अतएव पुनः आप वर्णन कीजिये ।। १ ।। विचक्षण देव किस प्रकार से पहिले अमरत्व को प्राप्त हुए थे । किसी तप के द्वारा अथवा कर्म से या किसी के प्रसाद से या तेज के द्वारा देवों को कायमता प्राप्त हुई थी ? श्री सूतजी ने कहा—जहाँ पर देव नारायण और शूल को धारण करने वाले महादेव विद्यमान थे वे दोनों उन सबके अमरत्व के प्रतिपादन करने में सहायक कहे गये हैं ।। २ । ३ ।। प्राचीन समय में देवासुर युद्ध में सुरों के द्वारा सैकड़ों दैत्येन्द्र निहत कर दिये गये थे फिर भृगुनन्दन ने अपनी सञ्जीवनी विद्या का प्रयोग करके सोकर उठे हुओं की भाँति जीवित कर दिया था ।

महात्मा देव शङ्कर ने परम सन्तुष्ट होकर महान् प्रभाव एवं प्रभा वाली सञ्जीवनी विद्या उसको प्रदान कर दी थी। महेश्वर के मुख से समुद्गत उस माहेश्वरी विद्या को भार्गव महर्षि में संस्थित देखकर समस्त दानव मोह को प्राप्त होगये थे। इसके अनन्तर धीमान् शुक्र ने दैत्यों का अमरत्व कर दिया था ॥ ४–७ ॥

या नास्ति सर्वलोकानां देवानां सर्वरक्षसाम् ।
न नागानामृषीणाञ्चनच ब्रह्मेन्द्रविष्णुषु ॥८
तां लब्ध्वा शङ्कराच्छुक्रः परां निर्वृतिमागतः ।
ततो दैवासुरोघोरः समरः सुमहानभूत् ॥९
तत्र देवैर्हतान् दैत्यान् शुक्रोविद्याबलेन च ।
उत्थापयति दैत्येन्द्रान् लीलयैवविचक्षणः ॥१०
एवम्विधेन शक्रस्तु बृहस्पतिरुदारधीः ।
हन्यमानास्ततो देवाः शतशोऽथ सहस्रशः ॥११
विषण्णवदनाः सर्वे बभूबुर्विकलेन्द्रियाः ।
ततस्तेषु विषण्णेसु भगवान् कमलोद्भवः ॥
मेरुपृष्ठे सुरेन्द्राणामिदमाह जगत्पतिः । १२॥
देवाः शृणत मद्वाक्यं तत्तथैव निरूप्यताम् ।
क्षिपतां दानवैः सार्द्धं सख्यमत्रप्रवर्तताम् ।१३
क्रियताममृतोद्योगो मथ्यतां क्षीरवारिधिः ।
सहायं वरुणंकृत्वाचक्रपाणिर्विबोध्यताम् ॥१४

जो विद्या समस्त लोकों के पास नहीं थी तथा देवों और राक्षसों के समीप में भी विद्यमान नहीं थी एवं नाग, ऋषिगण और ब्रह्मा, इन्द्र तथा विष्णु के पास भी नहीं रही उस महान् प्रभाव वाली इस विद्या को भगवान् शङ्कर से प्राप्त करके शुक्राचार्य परम निवृत्ति को प्राप्त हुए थे। इसके पश्चात् सुमहश्वर देवासुर घोर समर हुआ था ॥ ८ । ९ ॥ वहाँ पर देवों के द्वारा मरे हुए दैत्यों को शुक्राचार्य ने विद्या के बल के द्वारा

उन दैत्येन्द्रों को लीला ही से विचक्षण ने उठा दिया था। इस प्रकार से इन्द्र और उदार बुद्धि वाले वृहस्पति तथा हव्यभाव सैकड़ों और सहस्रों देवगण सबके सब विषाद युक्त मुखों वाले विकलेन्द्रिय हो गये थे। इसके पश्चात् उनके विषण्ण होने पर भगवान् कमलोद्भव जगत् के स्वामी ने मेरु पर्वत के पृष्ठ भाग पर यह सुरेन्द्रों से कहा था॥ १०। ११। १२॥ ब्रह्माजी ने कहा—हे देवगणो ! मेरा यह वाक्य सुनो और उसे वैसे ही करो। दानवों के साथ यहाँ पर सख्य भाव कर डालो। अमृत की प्राप्ति का उद्योग करो तथा क्षीर सागर का मन्थन करो। वरुण को सहायक बनाकर भगवान् चक्रपाणि को प्रबुद्ध करना चाहिए॥ १३, १४॥

मन्थानं मन्दरं कृत्वाशेषनेत्रेण वेष्टितम्।
दानवेन्द्रोबलिस्वामीस्तोककालनिवेश्यताम् ॥१५
प्रार्थ्यतां कूर्मरूपश्च पाताले विष्णुरव्ययः।
प्रार्थ्यतां मन्दरः शैलः मन्थकार्यप्रवर्त्यताम् ॥१६
तच्छ्रुत्वा वचनं देवा जग्मुर्दानवमन्दिरम्।
अल विराधेनवयंभृत्यास्तव बले ! ऽधुना ॥१७
क्रियताममृतोद्योगो व्रियतां शेषनेत्रकम्।
त्वया चोत्पादितेदैत्य ! अमृत्तेऽमृतमन्थने ॥१८
भविष्यामोऽमराः सर्वे त्वत्प्रसादान्न संशयः।
एवमुक्तस्तदा देवैः परितुष्टः स दानवः ॥१९
यथा वदत हे देवा ! स्तथाकार्यं मयाऽधुना।
शक्तोऽहमेकएवात्रमथितुं क्षीरवारिधिम् ॥२०
आहरिष्येऽमृतं दिव्यममृतत्वाय वोऽधुना।
सुदूरादाश्रयं प्राप्तान् प्रणतानपि वैरिणः ॥२१
यो न पूजयते भक्त्या प्रत्य चेह विनश्यति।
पालयिष्यामिवःसर्वानधुनास्नेहमास्थितः ॥२२

मन्दराचल पर्वत को मन्थान बनाकर उसे शेषनाग के नेत्र से

(नेती से) वेष्टित करो । दानवों का इन्द्र स्वामी बलि को थोड़े समय तक निवेशित करो । पाताल में अविनाशी भगवान् विष्णु जो कूर्म रूप वाले हैं उनकी प्रार्थना करो । शैलराज मन्दराचल की भी प्रार्थना करो और फिर मन्थन का कार्य प्रवृत्त कर दो । इस वचन को देवों ने श्रवण किया था और फिर वे सब दानवों के मन्दिर में गये थे । हे बले ! अब आप विरोध मत करो हम सब आपके भृत्य हैं । अब तो सब मिलकर अमृत की उपलब्धि का प्रयोग करो और मन्थन कार्य का नेत्र शेषनाग को बना डालो । हे दैत्य ! आपके द्वारा इस अमृत मन्थन में अमृत के समुत्पादित होने पर सब अमर हो जायेंगे और यह आपके ही प्रसाद से सुसम्पन्न होगा—इसमें तनिक भी संशय नहीं है । इस तरह से उन देवों के द्वारा कहे जाने वाला वह दानव बहुत परितुष्ट हो गया था । हे देवगण ! आप लोग जैसा भी कहते हैं हम भी सब वैसा ही मुझे भी इस समय में करना ही है । यहाँ पर मैं अकेला ही इस क्षीर वारिधि को मन्थन करने में समर्थ हूँ और अब मैं आपको दिव्य अमृत अमृतत्व के लिये लाकर दे दूँगा । सुदूर से आश्रय को प्राप्त होने वाले वैरियों का जो भक्तिभाव से पूजन नहीं किया करता है वह यहाँ पर मरकर विनष्ट हो जाया करता है । अब मैं स्नेह में समस्थित होकर आप सब लोगों का पालन करूँगा ।। १५–२२ ।।

एवमुक्त्वा स दैत्येन्द्रो देवैः सह ययौ तदा ।
मन्दरं प्रार्थयामास सहायत्वे धराधरम् ।।२३
सखा भवत्वमस्माकमधुनाऽमृतमन्थने ।
सुरासुराणां सर्वेषां महत्कार्यमिदं जगत् ।।२४
तथेति मन्दरः प्राह यद्याधारोभवेन्मम ।
यत्र स्थित्वयाभ्रमिष्यामिमथिष्येवरुणालयम् ।।२५
कल्प्यतां नेत्रकार्ये यः शक्तः स्याद्वेष्टने मम ।
ततस्तु निर्गतौ दत्रौ कर्मशेषौ महाबलौ ।२६

विष्णोर्भागौ चतुर्थांशाद्धरण्या धारणे स्थितौ ।
ऊचतुर्गर्वसंयुक्तं वचनंशेषकच्छपौ ।।२७
त्रैलोक्यधारणेनापि न ग्लानिर्मम जायते ।
किमु मन्दारकात्क्षुद्रात्घुटिकासन्निभादिह ।।२८

उसी समय में वह दैत्यराज इस प्रकार से देवगण के साथ चला गया था । धराधर मन्दर की सहायता करने के लिये प्रार्थना की थी । उसने कहा था—हे पर्वत वर ! इस समय में आप हमारे इस अमृत के मन्थन में सखा हो जाइये ! इस जगत् में सब सुर और असुरों का यह एक बहुत बड़ा कार्य्य है । ऐसा ही हो जायगा—यदि मेरा कोई आधार हो जायगा जिस पर स्थित होकर मैं भ्रमण करूँगा और सागर का मन्थन करूँगा ।। २३, २४, २५ ।। नेत्र बनने के कार्य में जो भी समर्थ हो और मेरा वेष्ठन कर सके उसकी कल्पना करिये । इसके पश्चात् महा बलवान् कूर्म और शेष निर्गत हो गये थे । भगवान् विष्णु के भाग धरणी के चतुर्थ अंश से धारण करने में स्थित हो गये थे । शेष और कच्छप दोनों गर्व से समन्वित वचन कहने लगे थे । इस त्रिलोकी के धारण करने से भी मुझको कोई ग्लानि नहीं होती है फिर एक घुटिका के सदृश यहाँ पर इस क्षुद्र मन्दर स्थल से क्या ग्लानि अर्थात् थकान हो सकती है ।। २६–२८ ।।

ब्रह्माण्डवेष्टनेनापि ब्रह्माण्डमथनेन वा ।
न मे ग्लानि र्भवेद्देहे किमु मन्दरवर्तने ।।२९
तत उत्पाट्यतंशैलं तत्क्षणात् क्षीरसागरे ।
चिक्षेप लीलया नागः कूर्मश्चाधःस्थितस्तदा ।।३०
निराधारं यदा शैलं नशेकुर्देवदानवाः ।
मन्दरभ्रामणं कर्तुं क्षीरोदमथने तथा ।।३१
नारायणनिवासन्ते जग्मुर्बलिसमन्विताः ।
यत्रास्ते देवदेवेशः स्वयमेव जनार्दनः ।।३२

तत्रापश्यन्त तन्देवं सितपद्मप्रभ शुभम् ।
योगनिद्रासुनिरतं पीतवाससमच्युतम् ।।३३
हारकेयूरनद्धाङ्गम हिपर्यङ्कसंस्थितम् ।
पादपद्मेन पद्मायाः स्पृशन्तं नाभिमण्डलम् ।।३४
स्वपक्षव्यजनेनाथ वीज्यमानङ्गरुत्मता ।
स्तूयमानं समन्ताच्चसिद्धचारणकिन्नरैः ।।३५

भगवान् शेष ने कहा—इस पूरे ब्रह्माण्ड के वेष्ठन से भी तथा पूर्ण ब्रह्माण्ड के मथन से भी मुझे कोई ग्लानि नहीं होती है फिर इस मन्दर के वेष्टन से क्या मुझे हानि हो सकती है ।। २९ ।। इसके अनन्तर उसी क्षण में उस मन्दर शैल को उत्पादित करके क्षीर सागर में उस समय में लीला ही से डाल दिया था और कूर्म तथा नाग नीचे स्थित हो गये थे ।। ३० ।। जिस समय में देव और दानव क्षीरोद के मन्थन में निराधार शैल को मन्थन करने में समर्थ न होसके थे तो वे सब बलि के सहित नारायण प्रभु के निवास स्थल पर गये थे, वहाँ पर देवों के भी देवेश्वर भगवान् जनार्दन स्वयं ही विराजमान थे ।। ३१, ३२ ।। वहाँ पर उन सबने श्वेत पद्म के समान प्रभा वाले—योग निद्रा में निरत—पीताम्बरधारी अच्युत देव का दर्शन किया था । वह प्रभु हार और केयूर से नद्ध अङ्ग वाले और शेष के पर्यङ्क पर शयन करने वाले—पद्मा के पाद पद्म से नाभि मण्डल का स्पर्श करते हुए विराजमान थे । गरुड़ उस समय में अपने पक्षों से उनका व्यजन कर रहे थे और सिद्ध-चारण तथा गन्धर्वों के द्वारा स्तवन किये जा रहे थे ।।३३–३५।।

आम्नायै र्मूत्तिमद्भिश्च स्तूयमानं समन्ततः ।
सव्यबाहूपधान तन्तुष्टुवुर्देवदानवाः ।।३६
कृताञ्जलिपुटाः सर्वे प्रणताः सर्वतो दिशम् ।
नमो लोकत्रयाध्यक्ष ! तेजसामितभास्कर ! ।।३७
नमो विष्णो ! नमो जिष्णो ! नमस्ते कैटभार्दन ! ।

नमः सर्गक्रियार्त्रे जगत्पालयते नमः ।।३८
रुद्ररूपाय शर्व्वाय नमः संहारकारिणे ।
नमः शूलायुधाधृष्य नमो दानवघातिने ।।३९
नमः क्रमत्रयाक्रान्त त्रैलोक्यायाभवाय च ।
नमः प्रचण्डदैत्येन्द्रकुलकाल महानल ! ।।४०
नमो नाभिहृदोद्भूतपद्मगर्भमहाचल ! ।
पद्मभूत ! महाभूत ! कर्त्रेहर्त्रे जगत्प्रिय ! ।।४१
जनिता सर्वलोकेश ! क्रियाकारणकारिणे ।
अमरारिविनाशाय महासमरशालिने ।।४२

उन नारायण प्रभू के चारों ओर मूर्तिमान् आम्नाय स्थित होकर स्तुति कर रहे थे। सव्यवाहु उपधान वाले उन प्रभु नारायण का समस्त देवों और दानवों ने वहां पर स्तवन किया था ।।३६।। सभी दिशाओं में वे सब अपनी अञ्जलियाँ बाँधकर तथा प्रणत होते हुए स्थित हो गये थे। देव दानवों ने कहा—हे तीनों लोकों के स्वामिन ! आपकी सेवा में हमारा नमस्कार समर्पित है। आपतो अपने तेज के द्वारा अमित भास्कर के समान हैं : हे विष्णो ! हे जिष्णो ! हे कैरभ दैत्य के मर्दन करने वाले ! आपको हम सबका बारम्बार नमस्कार है। समस्त क्रियाओं के करने वाले और इस जगती तल के परिपालन करने वाले आपकी सेवा में हमारा नमस्कार है ।।३७, ३८।। संहार के करने वाले रुद्र रूप धारी भगवान् शर्व के लिए हमारा नमस्कार है। हे शूल के अपने आयुध से नधर्षण करने के योग्य ! दानवों के धात करने वाले आपको नमस्कार है ।।३९।। हे क्रम के त्रय से आक्रान्त ! हे प्रचण्ड दैत्येन्द्रों के कुल के लिए काल ! हे महानल ! त्रैलोक्य स्वरूप और अभव आपकी सेवा में बारम्बार प्रणाम समर्पित है। आपतो अपनी नाभि रूपी ह्रद से उत्पन्न पद्म के गर्भ से महान् अचल हैं। हे पद्मभूत ! हे महाभूत ! हे जगत् के परम प्रिय ! सबके कर्त्ता और हर्त्ता आपके लिये नमस्कार है ।। ४०. ४१ ।

हे सर्व लोकों के ईश ! आप ही सबके जनन करने वाले हैं। देवों के शत्रुओं के विनाश करने वाले और महा समरशाली तथा क्रिया और कारण के करने वाले आपकी सेवा में हम सबका प्रणाम उपस्थित है ॥ ४२ ॥

लक्ष्मीमुखाब्जमधुप ! नमः कीर्तिनिवासिने ।
अस्माकममरत्वाय ध्रियतां ध्रियतामयम् ॥४३
मन्दरः सर्वशैलानामयुतायुतविस्तृतः ।
अनन्तवलबाहुभ्यामवष्टभ्यैकपाणिना ॥४४
मथ्यताममृतं देव ! स्वधास्वाहार्थकामिनाम् ।
ततः श्रुत्वा स भगवान् स्तोत्रपूर्व्वं वचस्तदा ॥
विहाय योगनिद्रान्तामुवाच मधुसूदनः ॥४५
स्वागतं विबुधाः ! सर्वे किमागमनकारणम् ।
यस्मात्कार्य्यादिह प्राप्तास्तद् ब्रूत विगतज्वराः ॥४६
नारायणेनैव मुक्ताः प्राचुस्तत्रदिवौकसः ।
